*प्रदत्तपुलकोद्‌गमा घनतुषारशीता प्रिये*
*त्वमेव दधसे तनावृतुकदम्बलक्ष्मीमिति ।।*

છંદ પૃથ્વી છે પણ પૃથ્વી છંદની બરછટતા સહેજ પણ જણાતી નથી. એ જ રીતે શ્લોક ૨૯માં માલિની છંદની પદાવલી પ્રાસાદિક છે. અહીં વપરાએલો मार्णालतन्तु પ્રયોગ નોંધપાત્ર છે. પ્રયોગ શુદ્ધ છે પણ સામાન્ય રીતે વપરાએલો જોવા મળતો નથી. એ જ રીતે પ્રભાતવર્ણન (અંક ૩, શ્લોક ૪), સંધ્યાવર્ણન (અંક ૩, શ્લોક ૩૦), સિદ્ધાશ્રમનું વર્ણન (અંક ૫, શ્લો ૩૭) વગેરે પણ વિશિષ્ટ કોટિનાં વર્ણનો છે.

આ ગ્રન્થમાં છંદોવૈવિધ્ય પણ નોંધપાત્ર છે. પ્રચલિત છંદો શાર્દૂલ, શિખરિણી, સ્રગ્ધરા જેવા મોટા છંદો, તો વસંતતિલકા, માલિની, ઉપજાતિ વગેરે મધ્યમ છંદો અને આર્યા, અનુષ્ટુપ, ગીતિ વગેરે લઘુ છંદો પુષ્કળ પ્રમાણમાં વપરાયા છે. તેની યાદી પરિશિષ્ટ-૫માં આપી છે. અશોકમંજરી (અંક ૫, પૃ. ૯૪) અને ચન્દ્રબિંબ (અંક ૪, પૃ. ૭૭) જેવા વિરલ પ્રયુક્ત છંદો પણ અહીં પ્રયોજાયા છે. 'છંદોનુશાસન'માં તેનાં લક્ષણ, ઉદાહરણ મળે છે.

કર્તાએ કથાવસ્તુનું જે કૌતુક-રંજિત સંવિધાન કર્યું છે તે ઉત્તરોત્તર જિજ્ઞાસાપોષક બન્યું છે. પહેલા 'પ્રિયાલાભ' નામના અંકમાં વિયોગી

Jain Education International For Private & Personal Use Only www.jainelibrary.org

એવા નાયક વિજય ને દેવિપ્રભાનું મિલન થાય ત્યાંથી જ વાચકના ચિત્તમાં પછીથી બનનારી ઘટના માટે કુતૂહલ જાગે છે. દેવી અજિતબલાના પરમઉપાસક આજ્ઞાસિદ્ધ નામના સિદ્ધપુત્રના પ્રયાસથી જ આ કાર્ય સિદ્ધ થાય છે. અને તે પછી બીજા 'ચક્રવર્તી-જનન' નામના અંકમાં એ દેવિપ્રભા દ્વારા પુત્રરત્નની પ્રાપ્તિ થાય છે.

આમ તો જૈન પરંપરા પ્રમાણે ચક્રવર્તી હોઈ શકે નહીં. પણ મહાસામ્રાજ્યના અધિપતિ તરીકેના રાજાને ચક્રવર્તીતુલ્ય ગણીએ તો એ શક્ય બને. એને ચક્રવર્તી બનવા માટે સિદ્ધચરુપાક બનાવવાનો છે. તે માટે 'વૈતાઢ્યારોહણ' નામના ત્રીજા અંકમાં એ વર્ણન છે. તે પછી ચોથા 'સિદ્ધાક્ષતલાભ' નામના અંકમાં એ ચરુપાક માટે આવશ્યક એવા સિદ્ધાક્ષત મેળવવામાં આવે છે તેનું વર્ણન છે. છેલ્લા પાંચમા અંકમાં એ યાગના ફળસ્વરૂપે મહાસિદ્ધિલાભ થાય છે. બે પત્ની અને એક પુત્રની સાથે વિજય રાજ્ય કરે છે. એ રીતે કૃતિ સુખાન્ત છે.

પ્રત્યેક અંકને નામ આપવાની પરંપરાનું દેવચંદ્રગણીએ અનુસરણ કર્યું છે એ હકીકત પણ નોંધપાત્ર છે.

વિ.સં. ૨૦૫૧, ગુરુપૂર્ણિમા —પં. પ્રદ્યુમ્નવિજયગણિ
જૈનનગર, પાલડી,, અમદાવાદ-૭

□

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## અનુક્રમ


* આનંદનો વિષય . . . . . . . મુનિશ્રી જંબૂવિજયજી V
* એક સંસ્કૃત રત્નનું પરિમાર્જન . . હરિવલ્લભ ભાયાણી VI
* પ્રાસ્તાવિક . . . . . . . . . . . . . . . . . . . . VIII
* ભૂમિકા . . . . . . . . . . . . . . . . . . . . XIII
  *પ્રતિપરિચય* . . . . . . . . . . . . . . . . XIII
  *કર્તાપરિચય* . . . . . . . . . . . . . . . . XIV
  *કૃતિપરિચય* . . . . . . . . . . . . . . . . XVI
* चन्द्रलेखाविजय-प्रकरणम् । . . . . . . . . . . . . . १
  *प्रथमोङ्कः* . . . . . . . . . . . . . . . . . ३
  *द्वितीयोङ्कः* . . . . . . . . . . . . . . . . . २३
  *तृतीयोङ्कः* . . . . . . . . . . . . . . . . . ४५
  *चतुर्थोङ्कः* . . . . . . . . . . . . . . . . . ६५
  *पञ्चमोङ्कः* . . . . . . . . . . . . . . . . . ८१
* परिशिष्टम् . . . . . . . . . . . . . . . . . . १०१
  *परि. १ (श्लोकानां सूचिः) . . . . . . . . . . १०१*
  *परि. २ ('या सा सा सा कथा') . . . . . . . १०५*
  *परि. ३ (सिद्धपुत्रसम्बन्धी शास्त्रसन्दर्भाः) . . . . . . २०८*
  *परि. ४ (गूढमन्त्राणि) . . . . . . . . . . . . ११०*
  *परि. ५ (वृत्तानां तालिका) . . . . . . . . . . १११*


Jain Education International For Private & Personal Use Only www.jainelibrary.org



जेसलमेर ज्ञानभंडारस्य तालपत्र पोथी क्र. ३६१, पत्र २०३

आदि-अन्तिम पत्र

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥ अर्हम् ॥

श्री देवचंद्रमुनि-प्रणीतं

# चन्द्रलेखाविजय-प्रकरणम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# प्रथमोऽङ्कः

पात्रसूचिः

१. आज्ञासिद्धः- सिद्धपुत्रः ।
२. ज्ञानबोधः- आज्ञासिद्धशिष्यः ।
३. विक्रमसेनः- विद्याधरेश्वरः ।
४. चन्द्रलेखा - विद्याधरवधूः ।
५. आहितातमा - ब्रह्मराक्षसी । (व्यन्तरनिकायी)
६. तत्त्वप्रपञ्चः- रक्तपटधारी योगी, तापसः ।
७. इन्द्रशर्माब्राह्मणः- विजयस्य पिता ।
८. विजयः- चन्द्रलेखायाः भाविपतिः ।
९. माहेश्वरी- हंसीसाहाय्यिका-चक्राङ्गनारूपधरा ।
१०. तत्त्वप्रपञ्चनः- आज्ञासिद्धशिष्यः ।
११. मतिमसृणः- तत्त्वप्रपञ्चनसहायकः ।
१२. मतिविभवः- आज्ञासिद्धप्रथमान्तेवासी ।
१३. मतिप्रपञ्चः- आज्ञासिद्धशिष्यः ।


Jain Education International For Private & Personal Use Only www.jainelibrary.org

चिन्मयमूर्तिः परमो, ब्रह्मादिभ्योऽपि यः परः पुरुषः ।
अकलितकलाभिरामो, दिशतु शिवं नाभिसूनुर्वः ॥ १ ॥ (आर्या)

अपि च –

त्रिभुवनजयोद्दामभ्राम्यच्छिलीमुखशालिनः,
कुसुमधनुषः प्रध्वंसेनाजितो विदितः प्रभुः ।
भवजलनिधौ मज्जद्विश्वं समुद्धरति स्म यः,
सुभगहृदयः स श्रेयांसि द्वितीयजिनः क्रियात् ॥ २ ॥ (हरिणी)

(नान्द्यन्ते)

**सूत्रधारः**- (समन्तादवलोक्य) कथं प्रभातप्रारम्भः ? । तथाहि –

व्योमाभोगविजृम्भिभास्वरमहःस्फारस्फुरत्केसरं,
विश्वव्यापिसहस्रपादमुदितं प्राचीगुहामध्यतः ।
दृष्ट्वा नव्यहरिं विहङ्गमरुतैश्चीत्कारमुच्चैस्तरां,
मुञ्चन्नेष निलीयते गुरुगिरिद्रोण्यां तमोवारणः ॥ ३ ॥
(शार्दूलविक्रीडितम्)

अपि च –

दृष्ट्वाऽन्धकारकलितं, पङ्कमग्नमिवाम्बरम् ।
अरुणेन गिरेर्मूर्ध्नि, क्षणं दध्रे रवे रथः ॥ ४ ॥ (अनुष्टुप्)
येनाशेषमपीदमन्धतमसं ज्योत्स्नाजलैः क्षालितं,
कामोऽनङ्गतयाऽपि येन विलसत्याकल्पमूर्वीतले ।
स श्रीकण्ठविभूषणं शशधरः शृङ्गारलीलागृहं,
धत्ते राजतदर्पणश्रियमयं प्रातः प्रतीच्यां दिशि ॥ ५ ॥ इति
(शार्दूलविक्रीडितम्)

(नेपथ्याभिमुखम्)
आर्ये ! इतस्तावत् ।
(प्रविश्य)

**नटी** – [१]आणवेदु अज्जो ।

**सूत्रधारः**– आदिष्टोऽस्मि सततार्चिततरुणरोहिणीरमणचूडामणिधरणप्रसादसमासादितोत्कटप्रतापालङ्कृतराज्यकमलाविलाससदनस्य, समराजिरविजृम्भमाण-

१. आज्ञापयतु आर्यः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रचण्डदोर्दण्डकलितकोदण्डविस्तृतशिलीमुखमण्डलखण्डित**शाकम्भरीश्वर**-कीर्त्तिकुसुमस्य **मालव**भूपालबल्लालमौलिकमलार्चितरणाङ्गणाधिदेवतस्य, आजन्मनिर्वाहितसत्यव्रततिरस्कृतकुन्तीसुतस्य, प्रत्यर्थिभूपालविलासिनीनिः-श्वासपवनप्रेङ्खोलनानवरतप्रज्वलिताद्भुतप्रतापदहनस्य, निरन्तरदानवाहिनी-प्रवाहपूरप्लवमानयशोराजहंसस्य, अमन्दकीर्त्तिमन्दाकिनीपूरपवित्रित-त्रिभुवनस्य, सर्वतोमुखप्रसरदमेयमहिमचमूचक्राक्रान्तसकलभूपालमौलि-मण्डलीमुकुटमणिकिरणचूम्बितचरणनखचन्द्रस्य, श्री**कुमारपालदेव**नरेन्द्रस्य परिषदा

यदद्य श्री**कुमारविहारे** वामपार्श्वावस्थितश्री**मदजितनाथदेवस्य** वसन्तोत्सवे त्रैविद्यस्य श्री**देवचन्द्रमुनेः** कृतिः **चन्द्रलेखाविजयं** नाम **प्रकरण**मभिनेतव्यमिति । (सचमत्कारम्)

दृष्ट : क्वापि श्रुतो वा कथयत सदसि प्रेक्षकाः ! कोऽपि भूपः,
सत्ये शौर्ये च दाने शरणमितवतां रक्षणे बद्धकक्षः ।
एनं मुक्त्वा नरेन्द्रं समितिहठहृतारातिलक्ष्मीप्रसक्त्या,
बिभ्राणं विक्रमाङ्कं दिशि दिशि निहितप्रस्फुरत्कीर्तिहारम् ।। ६ ।।
(स्रग्धरा)

अपि च –

एकाकिनैव वीरेण, येना**ऽर्णोराज**मन्थनात् ।
अनात्तमन्दराऽगेण* हठाल्लक्ष्मीः करे धृता ।। ७ ।।
(अनुष्टुप्)

**नटी** – (सविस्मयम्) [1]अज्ज ! एदस्स संपदं को नरवदी समाणो भोदि ? ।

**सूत्रधारः**– मुग्धे !

मान्धातृप्रमुखान् विहाय महतः षट्चक्रवर्तिप्रभू-
नेतस्याद्य **कुमारपाल**नृपतेः कस्तुल्यतामञ्चति ।
यः कान्तैर्विजयाक्षतै रणमखप्राप्तैर्महासिद्धये,
कीर्त्तिक्षीरभरेण वाञ्छति चरुं सिद्धं प्रतापाग्निना ।। ८ ।।
(शार्दूल.)

---

* मन्दराचलेन

१. आर्य ! एतस्य साम्प्रतं को नरपतिः समानो भवति ? ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**नटी –** [२]अहो ! अज्जस्स अन्ना कावि उत्तिवेचित्ती, जं रन्नो वन्नणे वि पत्थुदपबंधत्थो वित्थरीयदि इति । (सचिन्तम्) अज्ज ! कहं इत्थ मए सुत्थिदाए वन्नियापरिग्गहो कादव्वो ? । जं मज्झ गुरू केणावि रत्तवडधारिणा मुंडियसीसेण पलोहिय देसंतरं णीदो । तत्थ गदस्स य अन्नेण धुत्ततिलएण किं पि अपुव्वं इंदजालं दंसिऊण किम्च गहिलत्तणं संपादिदं ।

**सूत्रधारः–** प्रिये ! अलमनया चिन्तया ।

विकलः स्वःस्थितचेष्टो मितवागपरिग्रहो द्विधा चित्तः ।
परमस्पृहणीयोऽयं भविता तत्त्वप्रपञ्चनात्यागात् ॥ ९ ॥ (आर्या)

**नटी –** [३]अय्य ! एवं उवदिसंतेण तए मज्झ किं संबोहणं कदं भोदि ? जं सो परं असलाहणीयो भविस्सदि ।

**सूत्रधारः-** (विहस्य) प्रिये ! मुग्धाऽसि, उक्तस्यास्य व्याख्या इत्यवगन्तव्या, यत् – विशिष्टकलावान् स्वर्गायावस्थितव्यापारः, मितवाग् निस्सङ्ग एकमनास्तत्त्वप्रपञ्चनया [तत्त्वप्रपञ्चेन] अविमुक्तः प्रकृष्टस्पृहणीयो भविष्यति ।

**नटी –** (सानन्दम्) [४]अय्य ! अन्नं च मे सुमरिदं, जेण सो विप्पयारिय देसंतरं णीदो तस्स वि तत्तपवंचो णाम, ता किं तस्सेव संगेण सलाहणिज्जो भविस्सदि ? ।

**सूत्रधारः-** प्रिये ! एवमपि । अन्यच्च –

अनुज्झतस्तत्त्वहितोपदेशं, प्रवर्तमानस्य यथातथाऽपि ।
पुंसोऽभियुक्तस्य महत्यपीह, सिद्धिः खलु स्यान्ननु सम्मुखीना ॥ १० ॥
(उपजातिः)

---

२. अहो ! आर्यस्य अन्या काऽपि उक्तिवैचित्री, यद् राज्ञो वर्णनेऽपि प्रस्तुतप्रबन्धार्थः विस्तीर्यते ! आर्य ! कथमत्र मया सुस्थितया वर्णिकापरिग्रहः कर्तव्यः ? । यन्मम गुरुः केनापि रक्तपटधारिणा मुण्डितशीर्षेण प्रलोभ्य देशान्तरं नीतः । तत्र गतस्य च अन्येन धूर्ततिलकेन किमपि अपूर्वमिन्द्रजालं दर्शयित्वा किमपि ग्रथिलत्वं सम्पादितम् ।

३. आर्य ! एवमुपदिशता त्वया मम किं सम्बोधनं कृतं भवति ? यत् स परमश्लाघनीयो भविष्यति ।

४. आर्य ! अन्यच्च मे स्मृतम्, येन स विप्रतार्य देशान्तरं नीतः तस्यापि तत्त्वप्रपञ्चो नाम, तत् किं तस्यैव सङ्गेन श्लाघनीयो भविष्यति ? ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**नटी** – (सविस्मयम्) [५]एदं पि मह पडिबोहणं तारिसं य्येव इति (सकौतुकम्) अवि एदस्स कइणो पबंधेण रंजिदव्वा एसा सहा ।

**सूत्रधारः**- यो भाष्यार्णवमन्थमन्दरगिरिः षट्तर्कविद्यागुरुः,
साहित्यामृतसिन्धुरद्भुतमतिप्रेङ्खत्पताकाञ्चितः ।
सूक्तैस्तस्य पवित्रितत्रिभुवनैः **श्रीचित्रचिन्तामणि-***
श्लोकोन्मीलितषट्प्रबन्धललितैः को नाम न प्रीणितः ? ॥११॥ (शार्दूल.)

अपि च –
स्रोतोभिः क्रमशस्त्रिभिस्त्रिभुवने दृष्ट्वा विगाह्य स्थिता-
मेतां स्वर्गतरङ्गिणीं हरिदिशो हारश्रियं बिभ्रतीम् ।
एकश्लोकपथप्रवृत्तिमभजद् यस्यास्यसारस्वतं,
स्रोतः प्लावयितुं जगन्ति युगपत् कल्लोललीलायितै : ॥ १२ ॥ (शार्दूल.)

अथवा किं तस्य कवेर्वर्णनया ? ।
संसारोर्जितकर्ममर्मभिदुरश्वेतांशुबिम्बामल –
ध्यानोन्मीलितबिन्दुमध्यविलसन्निःशेषदृश्वप्रभुः ।
लीलानिर्दलितत्रिलोकविकसत्कन्दर्पदर्पग्रहः,
कारुण्यावनिरेष यस्य सुगुरुः श्री**हेमचन्द्रो मुनिः** ॥ १३ ॥ (शार्दूल.)

**नटी** – [६]अज्ज ! कधं एस कई नाडयपबंधपयट्टो पयरणं वित्थेरदि ?

**सूत्रधारः**– प्रिये नाटकरचना हि इतिवृत्तमनुसरन्ती क्षुण्णक्षोदनमावहति । तथा हि
क्षुण्णे मार्गे सूत्रयन्तः पदानि,
के वाऽभूवन् नात्र यातानुयाताः ।

---

५. एतदपि मम प्रतिबोधनं तादृशमेवेति । अपि एतस्य कवेः प्रबन्धेन रञ्जयितव्या एषा सभा ।

* धवलयति कलाभिर्यावदिन्दुस्त्रिलोकीं, हरति तिमिरभारं भानुमानेष यावत् ।
अभिनवचरितार्थं नाटकं तावदेतत्, प्रथयतु जगति श्री**देवचन्द्रस्य** कीर्तिम् ॥ १ ॥
जीयाज्जैनमतान्तरिक्षतरणिः प्रज्ञाहुताशाऽरणिः,
लीलोन्मुद्रितशेषभाष्यसरणिः श्रेयःसुधासारणिः)
सर्वाकारपरोपकारविपणिः श्री**चित्रचिन्तामणि** –
श्लोकाविष्कृतकीर्तिधौतधरणिः श्री**देवचन्द्रो** गणिः ॥ २ ॥
(– विलासवतीनाटिका-अन्ते प्रशस्तिः– पञ्चमोऽङ्कः)

६. आर्य ! कथमेष कविः नाटकप्रबन्धप्रवृत्तः प्रकरणं विस्तारयति ? ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

यन्नैवाऽऽसीत् सर्वथा यन्न भावि
तत्तत् किञ्चित् कलृप्तमस्मिन्नेनेन ॥ १४ ॥ (शालिनी)

अन्यच्च –

भाषाः प्रपञ्चितरसा मसृणाश्चतस्रः,
श्रव्यं वचो भणितिरप्रतिमैव यस्याम् ।
एतस्य विश्रुतकवीनपि मुद्रयन्ती,
सेयं कृतिर्विजयते जयवैजयन्ती ॥ १५ ॥ (वसन्ततिलका)

**नटी –** (अग्रतो विलोक्य) [७]एस आणासिद्धो भूमिं घित्तूण नाणबोहखंधणिवेसिदहत्थो पत्तो य्येव रंगनिही ।

**सूत्रधारः-** आर्ये तदेह्यावामपि अनन्तरकरणीयाय सज्जीभवावः ॥ (इति निष्क्रान्तौ)

(प्रस्तावना)

(ततः प्रविशति यथानिर्दिष्ट आज्ञासिद्धो नाम सिद्धपुत्रः ।)

**आज्ञासिद्धः-** (सानन्दम्).

कर्मानुयायिफलदानगुणैर्न नाम,
देव्यः कति त्रिजगति प्रथितप्रभावाः ।
दैवं विलुप्य निजशक्तिमुदञ्चयन्ती,
पुंसः सदाऽ**जितबलेव** फलं ददाति ॥ १६ ॥ (वसन्ततिलका)

आज्ञापितोऽस्मि तत्रभवत्या देव्या यत् त्वया **पाटलीपुत्रपुरे** गत्वा **अयोध्यातः विजय** इति विख्यात **इन्द्रशर्मसूनु**र्द्विजत्वेऽपि सति पूर्वजन्मसंस्काराद् अर्हद्भक्तः, सम्यक्त्वनिष्ठः, केनापि प्रयोगेण आनाय्य, उत्तरस्यां दिशि **कामसरस्य**भिधानतडागिकायां विलसन्त्याः कामरूपराजहंस्याः समीपवर्त्ती विधातव्यः ।

**ज्ञानबोधः-** [८]णं एवं कदे तस्य किं हविस्सदि ? अन्नत्थ किं का वि तादिसी हंसी न दीसदि ? ।

**आज्ञासिद्धः-** वत्स ! अनभिज्ञोऽसि प्रक्रमस्यास्य ।

**ज्ञानबोधः-** [९]ता कहिज्जदु सप्पसादं ।

---

७. एष आज्ञासिद्धो भूमिं गृहीत्वा ज्ञानबोधस्कन्धनिवेशितहस्तः प्राप्त एव रङ्गनिधिः ।
८. ननु एवं कृते तस्य किं भविष्यति ? अन्यत्र किं काऽपि तादृशी हंसी न दृश्यते ?
९. तर्हि कथ्यतां सप्रसादम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**आज्ञासिद्धः-** अस्त्युत्तरस्यां दिशि **वैताढ्यो** नाम महागिरिस्तन्मेखलायां प्रसिद्धा **मायापुरी** नाम नगरी । तस्यामेकदा विद्याधरेश्वर**विक्रमसेनस्य** पुरतः प्रवर्त्तमाने प्रेक्षणीयके विद्याधरवध्वा**श्चन्द्रलेखाया** नृत्यन्त्याः कुतोऽपि प्रमादात् सञ्जाते तालपरिभ्रंशे **आहितातमा** नाम ब्रह्मराक्षसी लब्धच्छला विद्यापहारं चकार ।

**ज्ञानबोधः-** [१०]णं तस्स ईदिसो को वि णिओओ चिट्ठदि ? ।

**आज्ञासिद्धः-** नैवम्, किन्तु पूर्वबद्धवैरा राक्षसी, चन्द्रलेखया प्रियतमेन सह क्रीडार्थं तत्र गतया तस्याः पूर्वजन्मनि हंसीतनोः कुङ्कुमबिन्दुभिः कर्बुरीकरणेन प्रियवियोगो जनित इत्यादि महत्संविधानकमस्ति ।

**ज्ञानबोधः-** [११]तदो संपदं कधं ठिदा चिट्ठइ चंदलेहा ?

**आज्ञासिद्धः-** नियतदिनमवेत्य स्वस्य विद्यापहारं,

ध्रुवम**जितबलायाः** पादपद्मप्रसादात् ।
तदनु तदुपदेशादेव हंसीतनुः सा,
स्वरुचितपतिमाप्तुं **चन्द्रलेखे**यमास्ते ॥ १७ ॥ । (मालिनी)

**ज्ञानबोधः-** [१२]भयवं ता एदस्सा को पदी हविस्सदि ? ।

**आज्ञासिद्धः-** मुग्ध ! अयमेव, यो देव्या अत्राऽऽनयनाय तत्सन्निधौ स्थापनाय चास्माकमादिष्टः । इयन्ति भाग्यानि किमन्यत्र निवसन्ति ? । अनेनैव प्रागजन्मनि अष्टोत्तरलक्षसङ्ख्यया पञ्चपरमेष्ठिमन्त्रैः साधिताया अपि महाविद्यायाः फलमात्मनः अल्पायुष्ट्वान्न गृहीतम् । तदयं जन्मान्तर-साधितविद्योऽपि कर्मानुसारि बह्वपायेभ्यो रक्षणाय देव्या मम समर्पित इत्यस्य स्वगृहादस्मत्प्रयोगेण बहिर्वासनमपि सुन्दरम् । तथाहि –

आसेदुषः स्वजनसन्निधिमेव पुंस –
स्तत्तन्महद् भवति कस्य न नाम दुःखम् ।
चन्द्रस्य पश्य रविपार्श्वगतस्य हानि –
र्दूरस्थितस्य विलसत्यपरा समृद्धिः ॥ १८ ॥ (वसन्ततिलका)

१०. – ननु तस्या ईदृशः कोऽपि नियोगः तिष्ठति ?
११. – ततः साम्प्रतं कथं स्थिता तिष्ठति चन्द्रलेखा ?
१२. – भगवन् ! तद् एतस्याः कः पतिः भविष्यति ?



Jain Education International For Private & Personal Use Only www.jainelibrary.org

अपि च –

सततं सन्निधिवासाद् गुणिनामपि गच्छतीह गुणगरिमा ।
भागीरथीजलाय स्पृहयति सर्वोऽपि दूरस्थः ॥ १९ ॥ (आर्या)

**ज्ञानबोधः-** [१३]णं सा विज्जाभट्ठा तिरिच्छिभूया तवस्सिणी असहाया तत्थ कहं कालं गमिस्सदि ? ।

**आज्ञासिद्धः-** अयि ऋजुहृदय । तदर्थे पुराऽपि व्यवसितमेवास्माभिः ।

विद्यापहारान्तरदुष्टकालव्यतिक्रमेण प्रियसङ्गमाय ।
चक्राङ्गनारूपधरा सखीत्वे **माहेश्वरी** तत्र नियोजिताऽस्ति ॥ २० ॥
(उपजाति)

**ज्ञानबोधः-** [१४]नं तहा तस्सिं तु अवायरक्खणे तईये समं संगमाय संपदं जदिस्सध ।

**आज्ञासिद्धः-** ननु तत्र तमानेतुं नियुक्तो **मतिमसृणा**नुगत**स्तत्त्वप्रपञ्चन** एव, स सर्वं विधास्यति, योऽस्मान् प्रथमान्तेवासिनं स्मरयति **मतिविभवम्** ।

**ज्ञानबोधः-** [१५]गुरुयणा ! कीदिसो सो मइविहवो ! ।

**आज्ञासिद्धः-** शृणु,

गगनतलमलङ्घ्यं यो विलङ्घ्य क्षणेन,
द्विरसनवसतिं तां लीलयैव प्रविश्य ।
दिशति परमसिद्धीर्मन्त्रविस्फूर्जितैस्तैः,
क्वचिदपि न तदास्ते वस्त्वसाध्यं यदस्य ॥ २१ ॥
(मालिनी)

**ज्ञानबोधः-** [१६]भट्टा अवणेह मे संसयं – तिहुयणपच्चक्खपहावा देवी इच्छामित्तेण आराहयजणमणोरहपूरणसमत्था कहं तुम्हे आदिसदि ? ।

**आज्ञासिद्धः-** वत्स एवंप्रभावैव देवी । परम्-

तस्मिन् पुराभवभवार्जितसर्वविद्ये,
साहायकार्थमदिशत् स मयि प्रसादः ।

---

१३. ननु सा विद्याभ्रष्टा तिरश्चीभूता तपस्विनी, असहाया, तत्र कथं कालं गमयिष्यति ?
१४. ननु तथा तस्मिंस्तु अपायरक्षणे तकया समं सङ्गमाय साम्प्रतं यतिष्यध्वे ।
१५. हे गुरुजन ! कीदृशः स मतिविभवः ?
१६. हे भर्तः ! अपनयत मम संशयम् । त्रिभुवन-प्रख्यातप्रभावा देवी इच्छामात्रेण आराधकजनमनोरथपूरणसमर्था कथं युष्मान् आदिशति ?



Jain Education International For Private & Personal Use Only www.jainelibrary.org

मन्त्रैः स्वयं विरचितैश्च मतिप्रपञ्चैः,
शिष्यैश्च तद् घटयितुं यतनीयमस्मिन् ॥ २२ ॥ (वसन्ततिलका)

तदद्य –

स्वैरं समुल्लसतु मे स मतिप्रपञ्चः,
स ब्रह्मसूनुरधिगच्छतु तां प्रतिष्ठाम् ।
हंसी प्रियेण सह खेलतु सा सविद्या,
विघ्नव्रजः सपदि स प्रलयं प्रयातु ॥ २३ ॥ (वसन्ततिलका)

(इति निष्क्रान्तौ)

॥ विष्कम्भकः ॥

**(ततः प्रविशति मतिमसृणः ।)**

**मतिमसृणः-** [१७]कहिं दाणिं णिज्जियकंदप्परूवो चंदलेहाहिययसव्वस्सं विजओ पेक्खिदव्वो ? (परिक्रम्य) गिलाणगत्तो म्हि, इह य्येव गिरिसिहरवणराईसु दाव वीसमिय वंदणिज्जं तत्तपवंचणं अवलोइस्सं । (इत्युपविशति)

(ततः प्रविशति तत्त्वप्रपञ्चनः ।)

**तत्त्वप्रपञ्चनः-** आख्यातं मम **ज्ञानबोधेन**, यत् अस्यामेव **विभ्रमरेखाभिधान**वनराज्यां गतो विजय इति । भवतु, गच्छामि । (परिक्रम्यावलोक्य च) दिष्ट्या अयमित एवाभिवर्त्तते ।

(निपुणं विलोक्य)

परिम्लानं वक्त्रं मुकुलितमिदं नेत्रयुगलं,
मनःशून्यं शश्वद्गतिरतिविषादश्लथपदा ।
तनुस्तन्वी चेयं परिकवचिता पाण्डुररुचा,
तदेव प्राचीनं स्मरति किमपि प्रेमललितम् ॥ २४ ॥(शिखरिणी)

(ततः प्रविशति विजयः ।)

**विजयः-** (स्वगतम्)

बाष्पप्रवाहसलिलप्लुतपत्रलेख-
मुन्निद्रचन्द्रसदृशं वदनं प्रियायाः ।

---

१७. कुत्र (कथम्) इदानीं निर्जितकन्दर्परूपः चन्द्रलेखाहृदयसर्वस्वं विजयः प्रेक्षितव्यः ? ग्लानगात्रोऽस्मि इहैव गिरिशिखरवनराजीषु तावद् विश्रम्य वन्दनीयं तत्त्वप्रपञ्चनं अवलोकयिष्यामि ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

कूजद्विहङ्गसरयूरशनामयोध्यां,
स्मृत्वा तदद्य हृदयं विदलत्यकाण्डे ॥ २५ ॥ (वसन्ततिलका)
कान्तावियोगवडवानललीढगर्भे
प्रोद्दामजागरमहामकरप्रकीर्णे ।
चिन्तातरङ्गवति दुःखमहार्णवेऽस्मिन्,
मग्नस्य मे विगलितः स मतिप्रपञ्चः ॥ २६ ॥ (वसन्ततिलका)

(अग्रतो विलोक्य) कथं तत्त्वप्रपञ्चन, वयस्य ! देशान्तरवियोगाग्नितप्तस्य मे भवद्दर्शनममृतवृष्टिसेकमनुकरोति ।

**तत्त्वप्रपञ्चनः-** सखे ! त्वां प्रति सुखाय परमद्धर्यै पाश्चात्यकुशलप्रवृत्त्या महाफलाय च तेषामेव पूज्यनामधेयानां प्रयोगो यतते । पश्य –

कस्तैः समस्त्रिजगति प्रथितप्रभावो,
येषां पदाम्बुजरजःकणजः प्रसादः ।
भक्तेषु सङ्क्रमितसिद्धिपुरन्ध्रिवर्ग –
रक्षाविधौ विजयते नवसौविदल्लः ॥ २७ ॥ (वसन्ततिलका)

**विजयः-** सखे ! आदिष्टं मम किञ्चित् तैः त्रिजगति विख्यातमहिमभिर्गुरुभिः ? ।

**तत्त्वप्रपञ्चनः-** अथ किम् । (पत्रमर्पयति ।)

**विजयः-** (गृहीत्वा वाचयति)

**अजित ! देव ! चन्द्र ! शेष ! राज ! विदित !**
**नाथ ! यात ! तात ! मान ।**
**सुभग ! नाग ! याग ! देविभाग हृदय याहि पाहि धेहि शं नः ॥२८॥**

(विभाव्य) सखे ! अस्य निःशेषमन्त्रमयनिर्मिताक्षरपङ्क्तेः साक्षाद्देवतामुखोद्‌गीर्णस्य तत्त्वार्थमवगच्छसि ?

**तत्त्वप्रपञ्चनः-** बाढं, जानामि । शृणु –

अर्हत्सिद्धाऽऽचार्योपाध्यायानामशेषसाधूनाम् ।
पञ्चानामपि वदति प्रणतिं परमेष्ठिनामेषः ॥ २९ ॥ (आर्या)
यस्यैषा पदपङ्क्तिः सहस्रभङ्गीभिरुल्लसन्तीह ।
प्रथयति सहस्रवदनं गुणसदनं स्वस्य सवितारम् ॥ ३० ॥ (आर्या)

**विजयः-** अयि ! एवमर्थं पदान्यप्युद्‌गिरन्ति ? उत गुरूपदेशविचारः ?।

**तत्त्वप्रपञ्चनः-** मैवम् । शृणु – रागादिभिरान्तरैर्बाह्यैश्च देवादिभिः शत्रुभिर्नाजीयत



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**इत्यजितः**, अर्हत्परमेष्ठी, सम्बोधनाद्, विध्यवसायाद् मामप्यजितं कुरु । देवादिकृताष्टमहाप्रातिहार्यैरणिमादिभिः ऋद्धिभिर्वा [१८]अमिताऽप्रतिपात्यतिशयज्ञानैश्वर्येण च ख्यातत्वाद् **विदितः** । अत्रापि विध्यवसायात् तत्प्राप्तिविधानमवसीयते । एवमन्यत्रापि ज्ञेयम् । तथा सुभगः आतिशायिको हि तव सौभाग्यमहिमा, यतस्तव सन्निधाने तिर्यञ्चोऽपि षाण्मासिकीं क्षुधं पिपासां च न वेदयन्ते, तृप्ताश्च भवन्ति । हृदयं च सर्वेषां, न हि कस्यापि भवन्तं प्रति गोपनीयमस्ति, वाचाऽपि यद् वक्तुं न शक्यते 'भयवं ! "[१९]**जा सा सा सा**" इति तदपि ज्ञापयन्ति केनाप्याकारविशेषेणेति अजितवदाचरेति* । [१]

**तथा दीव्यति** – क्रीडति कर्मपारतन्त्र्याभावात् स्वस्मिन्नात्मस्वरूपे **ज्ञानात्मके** इति 'देव ! परमेष्ठिन् ! निरुपमाव्याबाधपरमनिर्वृतिमय ! आत्मलाभात्मकसिद्धिसौधस्वामित्वान्**नाथ** ! **नाग** ! प्रधानस्वामिन् ! नागच्छसि कर्मविलयादिहेति वा **नाग** ! **याहि** मम चेतसि यथा त्वां शरणं प्रपद्ये इत्यर्थः [२] ।

चन्दनाद् – आह्लादनात् **'चन्द्र** !' आचार्य परमेष्ठिन् ! अनाचारप्रवृत्तिदिग्धं जनं अमृतमयैर्वचोंऽशुभिराह्लादयसि मार्गं च दर्शयसि, अज्ञानतमोऽपगमेनेति **चन्द्र** ! आचार्यपरमेष्ठिम् ! **यात** प्राप्त अज्ञानतमस्काण्डदिग्धेन मया अत एव **[याग]** पूज्य ! पूज्यते ह्याचार्यपरमेष्ठी मुमुक्षुभिः । **'पाहि'** माम् अनुगृहाण, पूज्यानपि पासि दुर्गतौ निमज्जत इति वा [३] ।

[शेष]- **शेषयसि**- पृथक्करोषि शिष्यवर्गं कुशास्त्रेभ्यः शास्त्रप्रणयनेनेति उपाध्यायपरमेष्ठिन् ! अत एव तातोऽसि पितृकल्पत्वाद् देविनः- क्रीडाशीलान् मार्गे दधासि इति **देविध, इहि**-आगच्छ मम चेतसि यथा ज्ञानी जायेय [४] ।

राजन्ते स्वे ब्रह्मणि **राजानः** साधु परमेष्ठिनः

---

१८. अमितः– अनश्वरः- मा हिंसायाम्, मितः- नष्टः- अमितः अनष्टः

१९. इयं कथा द्वितीये परिशिष्टे पठनीया ।

* अत्र अजितदेव इति श्लोकस्य व्याख्याने अर्हत्परमेष्ठिनः, सिद्धपरमेष्ठिनः, आचार्यपरमेष्ठिनः च चत्वारि विशेषणानि व्याख्यातानि, परम् उपाध्यायपरमेष्ठिनः व्याख्याने तृतीयपादस्थं याग इति विशेषणं व्याख्यातं न दृश्यते, तत् विचारणीयमस्ति ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

हे साधुपरमेष्ठिन् **मानय** नः – अस्मान् यथा '**शं** सुखं भवति । **भाग्याः** स(से)व्या हि भवन्तो, यत इति एतान् पञ्च **परमेष्ठिन** एकीकृत्य मनस्येकत्वेनाह परमेष्ठिन् ! **याहि** मम चेतसि यथा सर्वार्थसिद्धिनां प्रभुर्जायेय । [५]

(इति व्याख्यामधिगम्य सचमत्कारम्)

[**विजयः-**] अये ! अपरहृदयबन्धो ! कथयामि किञ्चित् – अयं पञ्चपरमेष्ठि-नमस्कारः श्रुतपूर्व इव मे, परं क्वापि ? कुतोऽपि ? इति न वेद्मि ।

**तत्त्वप्रपञ्चनः-** तदपि गुरुप्रसादात् समधिगतमेवास्ति । विभावय –

प्राचीनवन्मत्स्मृतिरेव सैषा,
न सम्प्रति क्वापि कुतोऽपि बोधः ।
श्लोकं तवातः स्मरतः सदाऽमुं,
विघ्नापनोदेन फलन्तु कामाः ॥ ३१ ॥ (उपजाति)

**विजयः-** किमस्यापि स्मरणे विघ्नावकाशः यदपनोदं विधास्यति ।

**तत्त्वप्रपञ्चनः-** ब्रह्मन् ! सर्वत्राप्यस्खलितगतिर्विघ्नसङ्घातः । यतः पूज्यनामधेयानां **श्रीवर्द्धमान**-स्वामिप्रमुखाणामपि तथा तथाऽयं दुर्निषेधः समजनि, एवमेवं च स्मरतां सहसैव व्यलीयत ।

**विजयः-** एवं गुरूपदेशो यदि तदिदमित ऊर्द्ध्वमित्थं व्यवसीयते (अजितदेवेत्यादि पठति च ध्यायति च विरतसर्वव्यापारः)

**तत्त्वप्रपञ्चनः-** तं तथा दृष्ट्वा (स्वगतम्)

सम्भाषणेऽपि शयनेऽपि विबोधनेऽपि,
सत्सङ्गमेऽपि विजनेऽपि वनान्तरेऽपि ।
क्षुत्पीडितोऽपि तृषितोऽपि सुखं गतोऽपि,
तन्निष्ठबुद्धिरजितेति वदत्यजस्रम् ॥ ३२ ॥ (वसन्ततिलका)

अपि च–

नवोन्मीलन्नीलोत्पलदलदृशां विभ्रमशतं,
पराकृत्य त्यक्त्वा तृणमिव तदैश्वर्यमसमम् ।
बहु ब्रूमः किं वा सकलविषयव्रातविरतो,
गतद्वैतं पश्यत्यजितमयमेथ(ष) त्रिभुवनम् ॥ ३३ ॥ (शिखरिणी)



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तदवश्यं फलितोऽस्मन्मनोरथः, दीव्यंतु गुरुभिः प्रपञ्चितमतिप्रपञ्चाः, प्रसीदतु श्रीमदजितबला देवी ।

(पुरतः समागच्छन्तं मतिमसृणं विलोक्य)

अये मतिमसृण ! कुतः सम्प्रति ? ।

**मतिमसृणः-** [२०](प्रणम्य) संपदं इदो वणराइदो ।

**तत्त्वप्रपञ्चनः** (अपवार्य) अस्ति सा किं तथैव तत्र ?

**मतिमसृणः-** [२१]अध इं ।

**विजयः-** (मतिमसृणं दृष्ट्वा तत्त्वप्रपञ्चनं प्रति) सखे ! क एष यः पीयूषमयूख इव दृष्टमात्रोऽप्यस्मानभिनन्दयति ।

**तत्त्वप्रपञ्चनः—** ईदृश एवायं तेषामेव गुरूणामन्तेवासी ।

**विजयः—** (सप्रश्रयम्) कच्चित् कुशलं गुरूणाम् ।

**मतिमसृणः-** [२२]जेसिं सव्वजणे मणं सकरुणं वड्ढे(ट्टे)इ णिक्कारणं
सिद्धीओ सयला वि जाण पुरदो चिट्ठंति बद्धंजली ।
सिद्धाणं तणएसु जेऽजियबलादेवीप्पसादोदिदा,
चोज्जं मे हिययम्मि जेण कुसलं तेसिं पि पुच्छीयदि ॥ ३४ ॥

(शार्दूल.)

**विजयः-** (तत्त्वप्रपञ्चनं प्रति) (एवमविमृश्य कृते यदि प्रत्यवायः कोऽपि स्यात् तन्निषेधाय तदैतदेव अजित देवेत्यादि पठति (पठामि) ।)

**तत्त्वप्रपञ्चनः-** (स्वगतम्) निषण्णोऽयमत्र श्लोके, तदेनं रसान्तरेण किञ्चित् प्रदर्श्य साध्यकार्ये प्रवर्तयामि (मतिमसृणं प्रति)
अयि किमेतत् पुरतस्तारकितनभस्तलकल्पं विलोक्यते ।

**मतिमसृणः-** [२३]अमंदमारुअंदोलिदबहलसिणिद्धनीलदलावलीहिं तरुणतमाललदा-

---

२०. साम्प्रतम् इतो वनराजीतः ।

२१. अथ किम् ।

२२. येषां सर्वजने मनः सकरुणं वर्धते (वर्त्तते) निष्कारणं,
सिद्धयः सकला अपि येषां पुरतः तिष्ठन्ति बद्धाञ्जलयः ।
सिद्धानां तनयेषु ये अजितबलादेवीप्रसादोदिताः,
आश्चर्यं मे हृदये येन कुशलं तेषामपि पृच्छ्यते ? ॥ ३४ ॥

२३. अमन्दमारुतान्दोलितबहलस्निग्धनीलदलावलीभिः तरुणतमाललताचुम्बितकलिन्ददुहितृसलिलविभ्रममुपहसन्ती गगनाङ्गणलग्नतरुशिखरविकसितविशदप्रसूनपरम्पराभिः त्रिनयनविकट-



Jain Education International For Private & Personal Use Only www.jainelibrary.org

चुंबिदकलिंददुहिदासलिलविब्भममुवहसंती, गयणंगणलग्गतरुसिहर-वियसिदविसदपसूणपरंपराहिं तिणइणवियडजडामउडमंडणतिवथया-वीथीविलासमुव्वमं(हं)ती, वियंभमाणबउलावलीबहलपरिमलुम्मत्तम-हुयरीमंजुगुंजिदमिसेण वम्महमुज्ञायरंती, अहिणवोदिदमायंदमंजरी-कवलणवायालकलयंठीकंठपरिट्ठिदपंचमरायमंदमारुयअंदोलणालहलहंत-किसलयपडायहत्थेहिं महुमत्तवणसिरिं नच्चावयंती, निरंतरत-रुलदातलसमासीणसिद्धविज्ञाहरीवंद्रविरइयमाणमहूसवसंगीयविलासमणहरा मरगयमणिविणिम्मिय-सोवाणदीहियासलिलमज्झसमुल्लसिदकुमुयवणविडंबि दभासुरतारयनियरडंबरमणोहरराई एसा सा वणराई ।

**तत्त्वप्रपञ्चनः-** यथाऽऽह भवान् । तथा हि-

तरुश्रेणिः सेयं सुरभिसुमनोभिः शवलितै-
दिशत्यर्घं शश्वद्गिरितटलुठन्निर्झरजलैः ।
सरस्यस्ता एतास्तरलतरवीचीभिरभित-
स्त्रिसन्ध्यं पान्थानां विदधति समालिङ्गनमिव ॥३५॥ (शिखरिणी)

(परिक्रम्य छायासुखमनुभूय)

विततविटपिशाखालिङ्गितोर्वीतलायां
तरणिकिरणतापे सर्वतः सन्निरुद्धे ।
तदयमिह निवासी किञ्चिदाप्नोति सौख्यं,
भवति हि परिबोधो यत्र नास्तोदितानाम् ॥ ३६ ॥ (मालिनी)

**विजयः-** (सञ्चिन्त्य) सखे ! एवमेव । पश्य,

अप्येतस्यामुदयति रवौ विश्वसौधप्रदीपे,
वृक्षच्छायातिमिरनिकरे सर्वतः सम्प्रवृत्ते ।
कोकस्त्रीणां दयितविरहक्लान्तिविच्छेदनाय,
प्रातर्बुद्धा प्रियसहचरी राजहंसी रुतेन ॥ ३७ ॥ (मन्दाक्रान्ता)

---

जटामुकुटमण्डनत्रिपथगावीथीविलासमुद्वम(ह)न्ती विजृम्भमाणबकुलावलिबहलपरिमलोन्मत्तमधुकरीमञ्जुगुञ्जितमिषेण मन्मथमुज्ञागरयन्ती, अभिनवोदितमाकन्दमञ्जरीकवलनवाचाल-कलकण्ठीकण्ठप्रतिष्ठितपञ्चमरागमन्दमारुतान्दोलनालहलहन्तकिसलयपताकाहस्तैः मधुमत्तवनश्रियं नर्तयन्ती, निरन्तरतरुलतातलसमासीनसिद्धविद्याधरीवृन्दविरच्यमानमधुपानमहोत्सव(मधूत्सव) संगीतविलासमनोहरा मरकतमणिविनिर्मितसोपानदीर्घिकासलिलमध्यसमुल्लसितकुमुदवन-विडम्बितभासुरतारकानिकरडम्बरमनोहरराजी एषा सा वनराजी ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

अपि च–

+पृथुलकुचा सद्वंशा, चन्दनतिलका(लका)वलीकलिता ।
नवपत्रवल्लिललिता कस्य न हृदयं हरत्येषा ? ॥ ३८ ॥ (आर्या)

(ततः प्रविशति यथानिर्दिष्टा राजहंसी चक्रवाकी च ।)

**हंसी** - [२४]पियसहि !

तं वेयड्ढगिरीनिवासमसमं विज्जावहारेण तं,
लायण्णामयपुण्णमंगलदियं चत्तूण तिस्सा भिया ।
एदस्सिं जडसंगमेण वरलारु(भू)एण कालो मये,
दुट्ठो निग्गमिदो तहावि स पई पत्तो न चित्ते ठिदो ॥ ३९ ॥ (शार्दूल.)

**चक्रवाकी** - सखि ! विस्रब्धा भव । समुपस्थितः स समयः, प्राप्स्यसि मनोऽभिलषितं पतिम् । यतः-

सतां तत्त्वोपदेशेन कष्टं यदनुभूयते ।
तदिष्टफलसम्पत्तेर्निर्व्याजं बीजमर्ज्यते ॥ ४० ॥ (अनुष्टुप्)

**विजयः**- (शुभनिमित्तमनुभूय)

दक्षिणाक्षिभुजस्पन्दो लाभमद्भुतवस्तुनः ।
सूचयत्येष निःशेषविपक्षविजयेन मे ॥ ४१ ॥ (अनुष्टुप)

(पुरोऽवलोक्य हंसीं दृष्ट्वा)

पक्षद्वन्द्वममन्दमुज्ज्वलमुरः स्फारोन्नतं तन्वती,
मन्दं मन्दमनिन्द्यकाञ्चनरुचिस्पर्द्धि क्षिपन्ती पदम् ।
उज्जृम्भाम्बुजरेणुभिर्विदधती कौसुम्भवासःश्रियं,
पाथःकेलिरता मनो हरति मे कान्तेव दूरादियम् ॥ ४२ ॥ (शार्दूल)

---

२४. प्रियसखि !
तं वैताढ्यगिरिनिवासमसमं विद्यापहारेण तं,
लावण्यामृतपुण्यमङ्गलद्विजं त्यक्त्वा तस्या भिया ।
एतस्मिन् जडसंगमेन वरलारूपेण कालो मया,
दुष्टो निर्गमितः तथापि स पतिः प्राप्तो न चित्ते स्थितः ॥ ३९ ॥

+वनराजीपक्षे – पृथु-लकुचा – पृथवः लकुचाः बृहत्कायफलविशेषाः यस्यां सा । सद्वंशा – सन्तः शोभनाः वंशाः यस्यां सा । चन्दनतिलकालकावलीकलिता – चन्दनाश्च तिलकाश्च चन्दनतिलकाः अलकाः कुन्तलाः, चन्दनतिलका अलका इवेति चन्दनतिलकावली, तया कलिता इति ।
नवपत्रवल्लिकलिता – नवानि-पत्राणि यासु ता वल्लयस्ताभिः कलिता । लकुचं पृथु पनसम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**चक्रवाकी** - (अभिमुखमवलोक्य विजयं दृष्ट्वा) सखि ! समाश्वसिहि समाश्वसिहि, स एवायं त्वन्मनःसरोजतरणिः । पश्य –

ज्ञान-दर्शन-चारित्रत्रयं त्रिपथगोपमम् ।
यज्ञोपवीतमिषतस्तनुमस्याधितिष्ठति ॥ ४३ ॥ (अनुष्टुप्)

**हंसी** - (सम्यगवलोक्य सानन्दम्)

[२५]अज्ज कयत्थो जम्मो, तेरिच्छिभूयं वि अज्ज मह सहलं ।
अच्चब्भुयगुणभवणं नयणपहं एस जं पत्तो ॥ ४४ ॥ (गाथा)

(निपुणं निरूप्य)

[२६]हसियसिहिकलावो रेहए केसपासो,
दलियकमलदप्पा आणणे जस्स सोहा ।
नवकुवलयलीला निज्जिदा लोयणेहिं,
अहह ! विसमबाणो को वि एसो दुदीओ ॥ ४५ ॥ (मालिनी)

(सात्त्विकस्तम्भादिभावाननुभूय स्वगतम्)

[२७]जं थंभो चलणेसु, सेयसलिलं गत्ते, सरो गग्गदो,
रोमंचो तणुयम्मि, लोयणजुये बाहप्पवाहावली ।
एदं वासरचंदकंति वयणं उक्कंपमाणं मणो,
हाहा ! वल्लहदंसणे वि विहिणा किं मज्झ इण्हिं कदं ? ॥४६॥ (शार्दूल.)

**चक्रवाकी** – (उभयोः परस्परानुरागमवलोक्य)

दृशोरेका वृत्तिः, वचसि जडता, पादयुगलं
यथावस्थं, चेतः परिहृतसमस्तव्यवसितम् ।

---

२५. अद्य कृतार्थं जन्म तिर्यग्भवनमप्यद्य मम सफलम् ।
अत्यद्भुतगुणभवनं नयनपथमेष यत् प्राप्तः ॥ ४४ ॥

२६. हसितशिखिकलापः शोभते केशपाशः,
दलितकमलदर्पा आनने यस्य शोभा ।
नवकुवलयलीला निर्जिता लोचनैः
अहह विषमबाणः कोऽपि एष द्वितीयः ॥ ४५ ॥

२७. यत् स्तम्भः चरणेषु, स्वेदसलिलं गात्रे, स्वरो गद्गदः,
रोमाञ्चः तनुके, लोचनयुगे बाष्पप्रवाहावली ।
एतद् वासरचन्द्रकान्तिवदनं उत्कम्पमानं मनः,
हा हा ! वल्लभदर्शनेऽपि विधिना किं ममेदानीं कृतम् ॥ ४६ ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तदेवं येनेदं युगपदभितः पुष्पधनुषा
द्वयं चक्रे चित्रार्पितमिव तमेकं नमत रे ॥ ४७ ॥ (शिखरिणी)

**तत्त्वप्रपञ्चनः-** (हंस्यास्तदेकाग्रतां निरीक्ष्य)

नीर-क्षीरविवेकमेकमपरे जल्पन्ति हंसान्वये
तां निःशेषरसाद्भुतप्रकटनां त्वत्रैव वीक्षामहे ।
पश्यैतस्य विशुद्धमानसमिदं निर्विश्य हंसी रसं,
कं कं न प्रकटीकरोति विमतव्यापारभाराऽप्यसौ ? ॥ ४८ ॥
(शार्दूलविक्रीडितम्)

(ऊर्द्ध्वमवलोक्य)

किं चित्रं नववल्लभा विरहजप्रो(प्रौ)ढानलोज्जृम्भित-
ज्वालाजालकरालिताः परनिजप्लोषं समातन्वते ।
यत् प्राचीचरितं स्मरन्नतिजवात् तेजो विमुञ्चन्नसौ,
मध्यस्थोऽपि तनोति हन्त सविता सन्तापमत्युल्वणम् ॥ ४९ ॥
(शार्दूलविक्रीडितम्)

तदयं समुपस्थितो मध्याह्नसमयः । (मतिमसृणं प्रति) वत्स ! त्वरयतु भवान् कनकचम्पककुसुमाहरणाय, यथा देवार्चनविधिर्विधीयते ।

(इत्युक्त्वा विसृजति ।)

(विजयो मध्याह्नवर्णनोदितमनुस्मृत्य औत्सुक्यं नाटयति ।)

(नेपथ्ये)

[२८]दसणवलिदसुंडो एस चंडो करिंदो,
कुसुममवचिणंतं मारिदुं मं पयट्टो ।
पबलनियभुयेहिं रक्खिदासेसलोओ,
ववसदु विजओ सो रक्खिदुं रक्खणीयं ॥ ५० ॥ (मालिनी)

**विजयः-** (आकर्ण्य) आः ! क एष मयि विश्वोपकारप्रवणान्तःकरणे तपस्विनमेनमभिभवति ? । (इति पटीक्षेपेण सरभसं हस्तिनोऽभिमुखमभिधावति ।)

**तत्त्वप्रपञ्चनः-** (तत्तथा विभाव्य) अहह ! महदसमञ्जसं समापतितम्, यदमुना

२८. दशनवलितशुण्ड एष चण्डः करीन्द्रः,
कुसुममवचिन्वन्तं मारयितुं मां प्रवृत्तः ।
प्रबलनिजभुजाभ्यां रक्षिताशेषलोकः,
व्यवस्यतु विजयः स रक्षितुं रक्षणीयम् ॥ ५० ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तपस्विनं मोचयताऽपि अतीवबीभत्सः समुपक्रान्तः ? । तथाहि –

विकटकरजकोटीपाटितोत्तुङ्गकुम्भ-
स्थलगलदुरुमुक्ताकल्पितस्वस्तिकश्रीः ।
क्षतजशबलिताङ्गो वीरलक्ष्म्याऽनुयातः
स्मरति न तमनिन्द्यं सिद्धविद्योपदेशम् ।। ५१ ।। (मालिनी)

**हंसी-** (अपश्यन्ती) आः ! [२७]अच्चाहिदं जादं । (इत्युकृत्वा मूर्च्छति । चक्रवाकी-समाश्वासनेन मूर्च्छाविराममनुभूय) [२८]सहि किं एदं ?

[२९]पिच्छ वयंसि ! विवायं पुव्वकयकम्मणो [धुवं] मज्झ ।
सिविणयलद्धो व्व पिओ तक्खणदिट्ठो व्व नट्ठो व्व ।। ५२ ।। (आर्या)

(इत्युकृत्वा पुनर्मूर्च्छति । क्षणेन चेतनां प्राप्य)

[३०]देवि ! अजिअबले ! दंसेहि पुणो वि तं । (चक्रवाकीं प्रति) सहि ! आणेहं तं रक्खेह मं जीविदसंसयादो । (इत्युक्त्वा पादयोः पतति)

**चक्रवाकी-** सखि ! मा विषदः ।

भविष्यत्यचिरेणैव भक्त्या भर्तृसङ्गमः ।
सङ्गमंय कृतोत्साहा यस्याः सा सिद्धदेवता ।। ५३ ।। (अनुष्टुप्)
तस्या एव पदाम्भोजप्रसादवशतः सखि !
समीहितपदप्राप्त्या विजयालङ्कृता भव ।। ५४ ।। (अनुष्टुप्)
(युग्मम्)

(ततः प्रविशति विजयः ।)

**विजयः-** (तत्त्वप्रपञ्चनं प्रति)

मृत्योर्मुखाद्यतिरसौ सहसैव कृष्टः
सन्त्रासितः स च गजो भुजविक्रमेण ।
एषाऽपि सा सुखनिधिः पुनरेव दृष्टा,
सर्वोऽप्ययं विजयते स गुरुप्रसादः ।। ५५ ।। (वसन्ततिलका)

---

२७. अत्याहितं (प्राणहानिसंभवं) जातम् ।

२८. सखि ! किम् एतत् ?

२९. पश्य वयस्ये विपाकं पूर्वकृतकर्मणो [ध्रुवं] मम ।
स्वप्नकलब्ध इव प्रियः, तत्क्षणदृष्ट इव नष्ट इव ।। ५२ ।।

३०. देवि ! अजितबले ! दर्शय पुनरपि तम् ।
सखि ! आनय तं रक्षत मां जीवितसंशयात् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**हंसी** (तं तथा दृष्ट्वा सहर्षम्) [३१]सहि ! तत्त्ववाइणी भोदी दाणिं य्येव एसो मह हिययकमलवियासणसूरो संपत्तो । पिच्छ –

[३२]लायण्णलच्छिविणिभच्छियकाममेणं
दट्ठूण वल्लहजणं सहि ! तक्खणेण ।
आणंदसायरजले अइ बुड्डियाये
को को रसो णहि समुल्लसियो मणे मे ॥ ५६ ॥ (वसन्ततिलका)

**विजयः-** (तत्त्वप्रपञ्चनं प्रति) सखे ! दिशि दिशि प्रसरद्विशालधूममण्डलीध्यामलितसकलदिगन्तरालम्, करालविलसज्ज्वालावलीकवलितविततनभस्तलम्, अतिप्रबलझञ्झानिलसमुन्मूलितनिखिलपादपकुलम्, अत्यन्ततारफेत्कारनिकरबधिरितत्रिलोकीतलम्, विकटशिलापटलसङ्घट्टसमुल्लसितस्फारझात्कारोत्तालतालाकाण्डताण्डवितप्रचण्डक्षयकालं किमेतत् पुरो दृश्यते ? ।

**तत्त्वप्रपञ्चनः-** पूर्ववैरानुबन्धेन पाताला**दाहितातमा** ।
हंसीरूपामिमां हन्तुं राक्षसीयमिहोद्यता ॥ ५७ ॥ (अनुष्टुप्)
तदेनामुद्दामज्वलनपटलीभीषणदृशं
पराकृत्य क्रूरां निजभुजबलादद्य झटिति ।
गुरोः पादद्वन्द्वं मनसि विशदे बिभ्रदनिशं,
लभस्व त्वं हंसीमधिगतपुरन्ध्रीतनुमिमाम् ॥ ५८ ॥ (शिखरिणी)

(विजयः तथैव प्रतिपद्य सरस्यभिमुखं परिक्रम्य बद्धपरिकरः "अजितदेव" इत्यादि मन्त्रं स्मरन् राक्षसीसन्त्रासाय सरभसं दत्तझम्पः सलिलान्तः प्रविशति ।)

**तत्त्वप्रपञ्चनः-** (कलकलमाकर्ण्य) आः ! किं भविष्यति ? (गुरुचरणयुगलमनुस्मृत्य)
मनुष्यस्यापि तद्दिव्यसुखसंसिद्धयेऽधुना ।
विघ्नध्वंसाय भवताद् गुरूणां मतिवैभवम् ॥ ५९ ॥
(अनुष्टुप्)

---

३१. सखि ! तथ्यवादिनी भवती, इदानीमेव मम हृदयकमलविकासनसूर्यः संप्राप्तः । पश्य –

३२. लावण्यलक्ष्मीविनिर्भर्त्सितकाममेनं,
दृष्ट्वा वल्लभजनं सखि ! तत्क्षणेन ।
आनन्दसागरजले अतिब्रुडितायाः (अतिमग्नायाः),
कः को रसो नहि समुल्लसितो मनसि मे ॥ ५६ ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

(ततः प्रविशति आकाशयानेन मतिविभवः ।)

**मतिविभवः-** पातालान्तः प्रविश्य स्फुरदमलरुचिमण्डलाग्रोर्जितश्रीः,
छित्त्वा रक्षःसुतायाः श्रवणयुगमलंदत्तविश्वप्रमोदः ।
हंसीरूपव्यपोहप्रथितसुरवधूविभ्रमां चन्द्रलेखां,
भास्वानादाय याति *क्षपितरिपु करेणैष वैताढ्यशैलम् ।।६०।। (स्रग्धरा)

।। निष्क्रान्ताः सर्वे ।।

**।। इति श्रीदेवचन्द्रगणिमिश्रविरचितचन्द्रलेखाविजयप्रकरणे प्रियालाभो नाम प्रथमोऽङ्कः ।**

---

* इदं क्रियाविशेषणम् – क्षपिता रिपवो यस्मिन् कर्मणि यथा स्यात् तथा 'क्षपितरिपु' ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# द्वितीयोऽङ्कः

## पात्रसूचिः

१. वनश्रीः - आज्ञासिद्धस्य परिचारिका ।
२. देविप्रभा - विजयस्य पूर्वपरिणीता पत्नी ।
३. विनयव्रता - आज्ञासिद्धस्य परिचारिका ।
४. व्रतरक्षिता - आज्ञासिद्धस्य परिचारिका ।
५. सिद्धव्रता - आज्ञासिद्धस्य परिचारिका ।
६. शबरी - देविप्रभासेविका ।
७. सिद्धशबरी - आज्ञासिद्धस्य परिचारिका ।
८. मानवीदेवी - देविप्रभाया गोत्रदेवता ।
९. श्रीशेषभट्टारकः - ग्रन्थकारसमकालीनप्रभावशाली सिद्धविद्यः पुरुषः ।
१०. विकटाक्षराक्षसः - आहितातमायाः भर्ता ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

(ततः प्रविशति वनश्रीः ।)

**वनश्रीः-** [१]आणत्त म्हि मदिविहवेण, जं एसा देविप्पहा इत्थ ट्ठिदा पिययमविरहकिलिन्ना जणयजणणीविउत्ता एयाइणी गब्भभरालसा दुट्ठसावयादिअवायसंघादो रक्खिदव्वा, अन्नं च सबरीभूयेण पियसहित्तमवलंबिऊण नियवयणविण्णाणपवंचणाए दूसहकालं विनिग्गमणीया । तदो एगागिणीए मज्झ दोकम्मसमायारो दुक्करो वट्टदि । (सम्मुखमायान्तीं विनयव्रतां विलोक्य) [२]कधं एसा विणयव्वदा मं लंघिऊण तुरिदतुरिदं जादुं पयट्टदि ? (उच्चैःस्वरम्) विणयव्वदे ! इत्थ अहं, कहिं तुवं गच्छसि ?

**विनयव्रता-** [३]अये वणसिरी एसा, कज्जपरवसाए मए न दिट्ठा, ता संभावेमि । (पदं सम्मुखं परिक्रम्य सप्रश्रयम्)

अये ! वणसिरि ! सुक्खिदा सि तुवं ? ।

**वनश्रीः-** [४]दुट्ठावयावियडसंकडसंगयाए
एदाइ रत्तिदियहं पलवंतियाए ।
रक्खाउवायनियरं हियये धरन्ती,
नाहं खणं पि सुहिदा सहि ! इत्थ होमि ॥ १ ॥
(वसन्ततिलका)

[५]किं तुज्झ वि इह य्येव विसए को वि आएसो, जं एवं

---

१. **वनश्रीः-** आज्ञप्ताऽस्मि मतिविभवेन, यद् एषा देविप्रभा अत्र स्थिता प्रियतमविरहक्लिन्ना जनक-जननीवियुक्ता एकाकिनी गर्भभरालसा दुष्टश्वापदाद्यपायसंघात् रक्षितव्या, अन्यच्च शबरीभूतेन प्रियसखित्वमेवालम्ब्य निजवचनविज्ञानप्रपञ्चनया दुस्सहकालं विनिर्गमिता तदा एकाकिन्या मम द्विकर्मसमाचारो दुष्करो वर्त्तते ।

२ कथम् एषा विनयव्रता मां लङ्घयित्वा त्वरितत्वरितं यातुं प्रवर्तते ।
विनयव्रते ! अत्राहम्, कुत्र त्वं गच्छसि ?

३. अयि ! वनश्रीः एषा, कार्यपरवशया मया न दृष्टा, तावत् संभावयामि । अयि ! वनश्रि ! सुखिताऽसि त्वम् ?

४. दुष्टापदाविकटसंकटसंगताया
एतस्याः रात्रिंदिवं प्रलपन्त्याः ।
रक्षोपायनिकरं हृदये धरन्ती
नाहं क्षणमपि सुखिता सखि ! अत्र भवामि ॥ १ ॥

५. किं तवापि अस्मिन्नेव विषये कोऽपि आदेशो यदेवमाकुलमना वर्तसे ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

अ(आ)उलमणा वट्टसि ? ।

**विनयव्रता-** [६]अध इं ।

[७]आणासिद्धगुरूहिं गुरुयावयरक्खणाय एदस्सिं ।
वदरक्खिदं निजुत्तं संपई अहमित्थ आइट्ठा ।। २ ।। (आर्या)

**वनश्रीः-** [८]अयि आवन्नसत्ता कहंचिय पिउणा इत्थ परिचत्ता ? जाणासि तुवं ?

**विनयव्रता-** [९]बाढं जाणामि । एदस्सा पई ताणं पहूणं पसायेण रक्खसीविद्धंसणं कादूण वेयड्ढसिहरमारूढो ताइं ताइं दिव्वाइं सुहाइं चंदलेहाये(ए) सह अणुभुंजंतो तत्थ पेसिदतत्तपवंचणमंतेहिं निरवाओ चिरगालं ठिदो । अन्नदा देवीए उव(ए)सेण एहिं य्येव गुरूहिं संसारमायं देवदं तत्थ निरूविय चक्कवट्टिजम्मनिमित्तं एणं सुमरंतो ऊसुयमाणसो कदो । तदो –

एदस्सा नवपिम्मभावमसमं चित्ते धरंतो जवा,
आगंतूण महिं निसीहसमये रंतूण छन्नो जणे ।
तं अच्चब्भुयचक्कवट्टिजणणं निक्खिव्व बीयं परं,
वंछंतो वि तदो सुहाई सहसा तस्सिं च पत्तो पुणो ।। ३ ।।
(शार्दूल.)

तदो य –

---

६. अथ किम् ।

७. आज्ञासिद्धगुरुभिः गुरुकापद्रक्षणाय एतस्मिन् ।
व्रतरक्षितां नियोक्तुं सम्प्रति अहमत्र आदिष्टा ।। २ ।।

८. **वनश्रीः-** अयि आपन्नसत्त्वा कथम् इव पित्राऽत्र परित्यक्ता ? जानासि त्वम् ?

९. **विनय-** बाढं जानामि । एतस्याः पतिः तेषां प्रभूणां प्रसादेन राक्षसीविध्वंसनं कृत्वा वैताढ्यगिरिशिखरमारूढः, तानि तानि दिव्यानि सुखानि चन्द्रलेखया सह अनुभुञ्जानः तत्र प्रेषिततत्त्वप्रपञ्चनमन्त्रैः निरपायः चिरकालं स्थितः । अन्यदा देव्या उपदेशेन एभिः एव गुरुभिः संसारमायां दैवतं तत्र निरूप्य चक्रवर्तिजन्मनिमित्तं एतां स्मरन् उत्सुकमानसः कृतः । ततः–
एतस्याः नवप्रेमभावमसमं चित्ते धरन् जवात्
आगत्य महीं निशीथसमये रन्त्वा छन्नो जने ।
तदत्यद्भुतचक्रवर्तिजननं निक्षिप्य बीजं परं,
वाञ्छन्नपि ततः सुखाय सहसा तस्याश्च प्राप्तः पुनः ।। ३ ।।
ततश्च –



Jain Education International For Private & Personal Use Only www.jainelibrary.org

अमुणियपरमत्थेहिं तं खु तहा पिक्खिऊण पियरेहिं ।
नियकुलकलंकभीएहिं सयणत्था इत्थ परिचत्ता ।। ४ ।। (आर्या)

**वनश्रीः-** [१०]सहि ! जदि एवं, तदो एस किलेसो वि सव्वो एआए चक्कवट्टिजणणेण परिचत्तो व मुणिदव्वो ।

**विनयव्रता-** (निःश्वस्य स्वगतम्) [११] कहं परिचत्तो विसेसदो भविस्सदि ? । जदो अम्हारिसाणं कज्जपरमत्थवियाणं पि –

[१२]एसा जं तणयं जणिस्सदि महाविज्ञापसादं पि दा,
तस्स य्येव बला लहिस्सदि मणा तेणं मणो तूसदि ।
जं उप्पत्तिखणे हविस्सदि पुणो एदस्स मत्ता समं,
**संदेहो विय जीविदस्स वि तदो दूमेइ संकाउलं ।। ५ ।।** (शार्दूल.)

(प्रकाशम्) [१३]वणसिरीए ! एदस्सा दुक्खपरिच्चायविसए सव्वं गुरवो मुणंति ।

**वनश्रीः-** [१४]सहि ! सव्वं पि तए कधिदं अच्चब्भुयं, मह मणो वि हिदं, परं सिद्धवदाए वयणेण किंपि आसासिद म्हि । एणं गुरूवदिट्ठं काऊण पुणो वि इत्थ आगंतव्वं ।

**विनयव्रता-** मैवम् । [१५] जदि एदस्सा पाणसंसयपडियाए रक्खणाय नाणबोहो वि पेसिदव्वो गुरूहिं मम आदिट्ठो, तदो तए समं कयवीसं(भ)भावेण

---

अज्ञातपरमार्थाभ्यां तां खलु तथा प्रेक्ष्य पितृभ्याम् ।
निजकुलकलङ्कभीताभ्यां शयनस्था अत्र परित्यक्ता ।। ४ ।।

१०. सखि ! यदि एवं तत एष क्लेशोऽपि सर्व एतस्या चक्रवर्तिजननेन परित्यक्त इव ज्ञातव्यः ।

११. **विनयव्रता-** कथं परित्यक्तः विशेषतः भविष्यति, यतः अस्मादृशां कार्यपरमार्थविदामपि–

१२. एषा यं तनयं जनिष्यति महाविद्याप्रसादम् अपि, तावत्
तस्य एव बलात् लप्स्यते मनाक्तन्मनः तुष्यति ।
यद् उत्पत्तिक्षणे भविष्यति पुनः एतस्य मात्रा समं,
संदेहः किल जीवितस्यापि ततः दुनोति शङ्काकुलम् ।। ५ ।।

१३. एतस्या दुःखपरित्यागविषये सर्वं गुरवो जानन्ति ।

१४. सखि ! सर्वमपि त्वया कथितम् अत्यद्भुतं मम मनः अपि हृतं परं सिद्धव्रताया वचनेन किमपि आश्वासिताऽस्मि, एनद् गुरूपदिष्टं कृत्वा पुनरपि अत्र आगन्तव्यम् ।

१५. मैवम् । यदि एतस्याः प्राणसंशयपतिताया रक्षणाय ज्ञानबोधोऽपि प्रेषितव्यः गुरुभिः माम् आदिष्टः, ततः तया समं कृतविश्रम्भभावेन चिरकालः संवृत्तः । अनुमन्यस्व माम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

चिरकालो संवुत्तो । अणुमन्नेह मं ।

**वनश्रीः-** [१६]एवं करेहि । अहं पि सणिओयमणुचिट्ठामि । (इति निष्क्रान्ते ।)

**प्रवेशकः**

(ततः प्रविशति यथानिर्दिष्टा शबर्याऽनुगम्यमाना देविप्रभा ।)

**देविप्रभा-** (स्वगतम्)

[१७]जं दूरे स कदो पिओ मह स(म)हालायण्णलच्छी[धरो]
जं तादो चरिएण मज्झ गमिदो निम्मम्मजोइत्तणं ।
जं एदं उवणीदमंगमहलं संतप्पिदुं सावय
तं मन्ने विहिणाऽपसायभुवणं हं य्येव एक्का कदा ।।६।। (शार्दूल.)

(शबरीं प्रति)

[१८]जो च्चिय पियसंभोओ सव्वजणाणं पि कुणइ सोक्खाइं ।
सो च्चिय कम्मक्खएणं अम्हाणं देइ दुक्खाइं ।। ७ ।। (आर्या)
[१९-अ]सुसहो पियरवियोओ, पाणवियोओ वि सहि ! तह च्चेय ।
दयियजणाण वियोओ एक्को च्चिय दूसहो लोए ।। ८ ।। (आर्या)

(अथ विहगान् दृष्ट्वा)

[१९-आ]एक्काणं सलहिज्जइ एदाणं जीवियं विहंगाणं ।
पियजणविओगदुक्खं जेहिं सिविणे वि नो दिट्ठं ।। ९ ।। (आर्या)

(सकरुणं निःश्वस्य दुःसहविरहतापकदर्थिता तनोः परित्यागं स्पृहयन्ती श्वापदान् प्रति)

---

१६. एवं कुरु । अहमपि स्वनियोगमनुतिष्ठामि ।

१७. यद् दूरे स कृतः प्रियो मम महालावण्यलक्ष्मी(धरः),
यत् तातश्चरितेन मम गमितः निर्ममयोगित्वम् ।
यद् एतत् उपनीतङ्गमफलं संतर्पितुं श्वापदान्,
तद् मन्ये विधिनाऽप्रसादभुवनं अहमेव एका कृता ।। ६ ।।

१८. यः किल प्रियसंभोगः सर्वजनानामपि कुरुते सौख्यानि ।
स किल (शुभ) कर्मक्षयेण अस्मभ्यं ददाति दुःखानि ।। ७ ।।

१९-अ. सुसहः पितृवियोगः प्राणवियोगोऽपि सखि ! तथा चैव ।
दयितजनानां वियोगः एकः किल दुस्सहो लोके ।। ८ ।।
आ. एकेषां श्लाध्यते, एतेषां जीवितं विहङ्गानाम् ।
प्रियजनवियोगदुःखं, यैः स्वप्नेऽपि न दृष्टम् ।। ९ ।।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

[१९-इ]हे सावया सुणध दाव हिदोवदेसं,
एकं पभक्खध तणु विरहग्गिभुग्गं ।
अस्सिं कदे सवदि दोवि गुणा हवंति,
तुम्हाण गच्छदि छुहा मह दुक्खभारो ।। १० ।। (वसन्ततिलका)

(वृक्षावनद्धलतां समवलोक्य सोन्मादम्)

[१९-ई]किं किं पुव्वभवे थिरेण मनसा भोदीहिं तत्तं तवो ?
आमूलं पियसंगमेण महदा जं जादि रत्तिं दिवं ।
दीणाए परिचत्तियाए पइणा काऊण कारुण्णयं,
तं अक्खेध, ममावि मुंचदि खणं जेणं न सो वल्लहो ।।११।।
(शार्दूल.)

**शबरी-** (स्वगतम्) हहा महान् प्रमादः, यत् प्रियविरहपरितप्ताङ्गी चेतनाऽचेतन-व्यवस्थामप्यनवगच्छन्ती लताः प्रार्थयते । (प्रकाशम्) सखि ! किमेताभिः, तत्त्वं स्मर, यस्मात् कर्मानुबन्धच्छेदेन समीहितफलप्राप्तिर्जायते ।

**देविप्रभा-** [१९-उ]जादो वि नेय मुणिदो संतावो पीडिए वि तयि पणदे ।
मा मुञ्चसु अज्ज तहा पियमय ! पत्तो सि पुन्नेहिं ।। १२ ।। (आर्या)

**सिद्धशबरी-** (कुसुमितबकुलं दृष्ट्वा) सखि !
नमदविरलशाखाहस्तसंसक्तभूमि –
र्मधुपकलितपुष्पैरायतस्मेरनेत्रः ।
निरुपधिबहिरन्तः स्निग्धतामादधानः,
सुतनु ! बकुल एष प्रेयसः क्वावकाशः ? ।। १३ ।। (मालिनी)

---

१९-इ. हे श्वापदाः श्रृणुत तावद्धितोपदेशं,
एकं प्रभक्षयत तनु विरहाग्निभुग्नम् ।
अस्मिन् कृते सपदि द्वावपि गुणौ भवत :
युष्माकं गच्छति क्षुधा मम दुःखभारः ।। १० ।।

१९-ई. किं किं पूर्वभवे स्थिरेण मनसा भवतीभिस्तप्तं तपः
आमूलं प्रियसंगमेन महता यद् याति रात्रिन्दिवम् ।
दीनायाः परित्यक्तायाः पत्या कृत्वा कारुण्यं
तं प्रेक्षध्वं ममापि मुञ्चति क्षणं येन न सः वल्लभः ।। ११ ।।

१९-उ. जातोऽपि नैव ज्ञातः, संतापः पीडितेऽपि त्वयि प्रणते ।
मा मुञ्च अद्य तथा प्रियतम ! प्राप्तोऽसि पुण्यैः ।। १२ ।।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**देविप्रभा-** (निपुणं निरूप्य) सखि ! भ्रान्ताऽस्मि । (परिक्रम्य सरसीषु परापरतटसंश्रयणेन वियुज्यमानचक्रवाकमिथुनमवलोक्य सकम्पमूर्द्ध्वनाटितकेन)

[२०]सहि ! रक्खेध मं पयंडचंडंसुमंडलकवलणेण नीसेसं पि तिहुयणं नासयंतीओ इमाओ संझारक्खसीओ ।

**सिद्धशबरी-** (स्वगतम्) ईदृश्येवासौ सन्ध्या । तथाहि –

पुष्यन्ती रजनीचरान् पिदधती ध्वान्तेन दिग्मंडलं
तं पञ्चेषुभटं रुतेन वयसामाऽऽसूत्रयन्ती पुरः ।
जातेयं न हि कुत्र कुत्र तपनग्रासेण भीमारुणा
यस्यास्त्रातुमिव स्वमङ्ग जगता बद्धाञ्जलि स्थीयते ॥ १४ ॥

(शार्दूलविक्रीडितम्)

(प्रकाशम्-अनुकम्प्य) मा भैषीः, नवहस्तादपि प्रासादणिक(?)-परिवृत्त्या न किञ्चिद्भयमावहति जनः । स्थिरा भव, गतप्राणाऽसौ ।

**देविप्रभा-** [२१]कुदो गदप्पाणा सप्पिणीव पसवभयंकरि त्ति मुणिमो ! ।

**सिद्धशवरी-** (स्वगतम्) आः शान्तं (पापम्)

*प्रसवेन चन्द्रातपतारादिभ्यो भयमाशङ्कमाना अस्मादेव गर्भजननात् सर्वेषामपि भयसूचनानुयायिवचनेनाकुलयत्यस्मन्मनः । (प्रकाशं ससान्त्वनम् ।) किमाकुलाऽसि न श्रुतं त्वयैतद् यत् समभिपतद्बलस्य मुखस्थितबलविनिर्जये पाश्चात्यस्य कृत एव पराजयः ।

**देविप्रभा-** [२२]एवं भोदु तुम्हाणं पणय[नासी] त्रासि एसो सो संपत्तो संझासप्पिणीए गरलुग्गारलित्तलहलहंतदारुणजीहासरिसेहिं केदुपुंजेहिं नीसेसं पि अम्हारिसजणं भीसयमाणो रयणीयरच्छलेन दुदुपसवो, ता कहं भोदव्वं ? दुरदिक्कमो एसो, न तये न मये न जु अन्नेहिं वि जं द(ट्ठि-)दव्वो । पिच्छ –

* रात्रिप्रसवेन

२०. सखि ! रक्ष मां प्रचण्डचण्डांशुमंडलकवलनेन निःशेषमपि त्रिभुवनं नाशयन्त्या सन्ध्याराक्षस्याः ।

२१. देवि – कुतः गतप्राणा सर्पिणीव प्रसवभयंकरीति जानीमः ।

२२. देवि – एवं भवतु, युष्माकं प्रणय [नाशी] त्रासी एष स सम्प्राप्तः सन्ध्यासर्पिण्या गरलोद्गारलिप्तलहलहन्तदारुणजिह्वासदृशैः केतुपुञ्जैः निःशेषमपि अस्मादृग्जनं भापयन् रजनीकरच्छलेन द्विद्विप्रसवः (चन्द्रः), ततः कथं भवितव्यम् ? दुरतिक्रम एष, न त्वया, न मया नैवान्यैरपि यद् दृष्टव्यः पश्य –



Jain Education International For Private & Personal Use Only www.jainelibrary.org

[२३]उम्मीलिदकुमुएहिं एस हसंतो रहंगमिहुणाइं ।
दुक्खिददुक्खेण सुही निक्कीवहियियो कयंता वि ॥ १५ ॥ (आर्या)

(विरहवेदनामनुभूय)

[२४]जं दीणं विरहिजणं विरमइ न खणं पि एस मारंतो ।
तेणं कलंकपंको हरगंगासंगमे वि न हु गलिओ ॥ १६ ॥ (गीतिः)

(क्रमेण अवनितलमाक्रामन्तमिन्दुमवलोक्य सप्रश्रयम्)

चन्द्रमानयागविदित नाथमान यात तात मानहृदय धेहि शं नः ।
चन्द्रमानयागविदितनाथमान यात तात मानहृदय धेहि शं नः ॥१७॥

**सिद्धशबरी-** अहो गाम्भीर्यमुक्तेः, यत् पदैरनुघुष्टस्याप्यर्थस्य विचारघटनया पदपङ्क्तिः परं रसमातनोति । तथाहि –

हे **चन्द्र** ! मानय मां, मा गा दूरं कलङ्कपङ्कमग्नां दृष्ट्वा, समानधर्मो हि भवान् अर्थान्तरसङ्क्रमितत्तेन(तत्त्वेन ?) चन्द्रमा भवान् आह्लादकः, अमृतमयत्वेन प्राणदः, माने पूजायां हृदयं तव सर्वदा, किमिति मानपूज्यां करोषि ? अनुचितमिदं पितुः पिता हि भवान् नाथमानैरस्मादृशैः **यातः** प्राप्तोऽसि कृतार्थमकृत्वा कुत्र यास्यसि । किञ्च मां विना न यागे विदितो भवसि, पत्न्या विना यागाभावादिति, स्वार्थेनापि माननीयाऽहं, तथा धेहि मां शीलात्मनि यथा सर्वेषामस्माकं सुखमुपजायते इति, यदि यागसुखं विदितं वाञ्छसि तदा अनया ममाऽऽगोमार्जनरूपया गत्या आनय काठिन्येनाऽगवद्विदितं नाथं मम प्रियतमं कथमन्यथा अरण्यान्यां त्यक्तामप्युपेक्षते, चन्द्र ! ममाह्लादक मा मा(मां) कदर्थनाय दूरं नय येन ईषदपि विस्मृता तमा शोकलक्षणा न भवति । हे मम हृदयसन्धारक ! नो-नरेन्द्र ! अस्माकं सुखं गच्छ तत्सुखं गमनेन प्राप्नुहि, किमतः परं तुभ्यं प्रददे अहयो यथामतसुखं न प्राप्नुवन्तीत्येतदर्थं । पूर्वं हि ते मां कलङ्कितां विधाय मत् (दुअ) सुखेन सुखमापुरिति । भव – (भय ?) २ सुखं तेभ्यो गृहीत्वात्मनि धारयत तच्च मम कलङ्कमावर्जनेन भवतीति एवमुन्मदे वचनेषु व्याख्यार्थमवगम्य

२३. उन्मीलितकुमुदैरेष हसन् रथाङ्गमिथुनानि ।
दुःखितदुःखेन सुखी निष्कृपहृदयः कृतान्तादपि ॥ १५ ॥

२४. यद् दीनं विरहिजनं विरमति न क्षणमपि एष मारयन् ।
तेन कलङ्कपङ्कः हरगंगासंगमेऽपि न खलु गलितः ॥ १६ ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

सखी तापकदर्थिता;

(चन्द्रं प्रति साभ्यसूयम्)

दूरं गते प्रियतमे वि(प्र)सरद्वियोग-
प्रोद्दामदावदहनग्लपिताङ्गलेखाम् ।
इत्थं हठादिव सखीं दहसि प्रकामं
हे रोहिणीरमण ! निष्करुणस्त्वमेकः ॥ १८ ॥ (वसन्ततिलका)

**देविप्रभा-** (तथैव चन्द्रातपमनुभूय सदैन्यम्) चन्द्रनाथमान याग १ (करस्पर्श-मसहमाना) राजदोष याततात यागनाथ ! पाहि याहि २ (अथ सप्रश्रयम्) अजितनाथ-राजविदितमाननागहृदय याहि ३ (सक्रोधम्) नाथमाननाग याहि ४ (साक्षेपम्) चन्द्रविदितयागहृदय ५ शेषयातनाथमान ६ ।

**सिद्धशबरी-**(ऊर्द्ध्वमवलोक्य)

श्लोकानामिह षण्णां गूढार्थनं(र्थानां) न वेत्ति कोऽप्यर्थम् ।
यदि परमहमेका त्वां रजनिपते ! बोधयाम्यद्य ॥ १९ ॥ (आर्या)

शृणु क्रमेण – चन्द्रेति आह्लादकत्वात् **चन्द्र** ! अल[ब्ध] लाभाल्लब्ध-परिपालनाच्च **नाथ,** न च तवायुक्ताचरणमुचितम् । मानय मां आवृत्त्या मा मा महासतीम् परपुरन्ध्रीम् अनया निजकरस्पर्शनलक्षणया कुट(टि)-लया गत्या आगच्छ, प्रतिषिद्धोऽसि, अन्यथा प्रत्यवायी भविष्यसि । अथ शेषाणां मत्तोऽन्यासां या प्राप्तिस्तयैव राज ता एव त्वामभिलषन्ति । किञ्च-पाषाणानपि द्रावयसि तत्रैव भवान् पुरुषस्तानेव च पिबसि इति मां द्रावयितुं पातुं च शक्नोषीति मुञ्च मम प्रत्याशां अवृत्त्या, पुरुषो हि भवान् पूज्यश्च, न च पुरुषाणां पूज्यानामनुचितदेशे गमनं श्रेयस्करम् इति, गच्छ मम दृष्टिपथात् । पाहि आत्मानं याहि मत्तोऽन्यत्र (न) निमन्त्रितोऽसि मया, अथ च एवं हि गुरुलाघववद्धर्मप्रधानत्वान्निर्देशस्य राजत्वं तव शोभते । अमृतप्राणत्वेन विदितस्त्वम् । अनङ्गसखो हि भवानिति अजितत्वम् । कलामात्रस्यापि यत् तेन दर्शनात् क्षेमकारित्वं द्वितीयाचन्द्रस्य लोके चेलोत्क्षेपदर्शनात् पूज्यत्वम् । अर्थान्तरसङ्क्रमि-तत्वेन 'होंति कमलाइं कमलाइं' इति पुरुषत्वम् उदयगिरिहृदये राजत्वं च सर्वं तव शोभते । आ इति खेदे अन्यायकारिता हि तव दुःख-मावहति ।

अन्यच्च – अथ नैवं कुलपरिपूर्णकलालक्षणो न भविष्यति अग्रे यानं



Jain Education International For Private & Personal Use Only www.jainelibrary.org

च न युक्तं परकलत्रार्तिदोषकलङ्कितानां हि गुफाप्रवेशनमेव श्रेयः ।

अथ च चन्द्रेति सम्बोधनेन अन्यायकारित्वेन विदितो अत एव राहुणा विशेषेण खण्डितः, सुलभखण्डनं अन्यायप्रवृत्तानाम् [अन्याय-प्रवृत्तो हि] प्रत्यक्षेण अन्यायवृत्तकलामत्तो न चेतयति ।

तथा कलाशेषोऽपि भवान् पूज्यते लोकेन । सम्प्रति तु पूर्णकलोऽपि कलङ्काङ्कितत्वान्न पूज्यते इति यागहृत् संवृत्तः, अत ऊर्द्ध्वमपि क्षयी भविष्यसि, स्वरूपकथनमेतत्, नहि पाप्मिनं शपन्ति तत्पापप्रसङ्गात् । किञ्च मां नाथमानस्य शेषयैव तवागमनमुचितं, राजा हि भवान्, न च राजत्वेन मम धर्षणं तव शक्यक्रियं, यतो मदीये प्राणनाथे उदयशालिनि प्रतापवति प्रतपति न मां धर्षितुं प्रभवसि, यदि तु तवास्ति किञ्चित् तदा मदीयं प्राणनाथं शेषय, तत्र अत एव गच्छ । न चैतत् तवापि शक्यक्रियं, शान्तमेतत् । तस्माद् यावदद्यापि क्षयी न भवसि तावत् अय गच्छ मदीयदृष्टिपथादित्याशासे इति । पश्य अत एव

तदीयकरसंस्पर्शप्राप्तसुखपरम्परा ।
कलङ्कितनोर्नैव करस्येष्टे मनस्विनी ॥ २० ॥ (अनुष्टुप्)

**देविप्रभा-** [२५]सखि ! निब्भच्छिदो अवगणिदो वि न हंत कहंचि विरमदि मम्मपहाराओ चंदो नूणं अस्स सरीरयस्स अकदविससणो न विरमिस्सदीदि मुणिदव्वं । पिच्छ –

[२६]एस कक्कसमणो निसायरो रस्सिजालमिह मज्झ माणसे ।
धीवरो व्व खिविऊण चंचलं मच्छुलिं व्व करिसेइ जीवियं ॥ २१ ॥
(अपरान्तिका)

(इत्युक्त्वा मूर्च्छति)

**सिद्धशबरी-** हा हा ! महान् प्रमादः । (सर्वतो विलोक्य, सत्रासम्)

इतः कुसुमसायकः क्षिपति तीक्ष्णबाणावली-
मितः कुमुदिनीपतिर्दहति निर्दयं धामभिः ।

---

२५. **देवि-** सखि ! निर्भर्त्सितः अवगणितोऽपि न हन्त कथञ्चित् विरमति मर्मप्रहारात् चन्द्रः । नूनम् अस्य शरीरकस्य अकृतविशसनः न विरमिष्यति इति ज्ञातव्यम् । पश्य –

२६. एष कर्कशमना निशाकरो रश्मिजालमिह मम मानसे ।
धीवर इव क्षिपृत्वा चञ्चलं मत्स्यीमिव कृषति जीवितम् ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

इतो रजनिमारुतः प्रतनुते वियोगानलं
कथं बत ! मयैकया सुकरमत्र रक्षाव्रतम् ? ॥ २२ ॥ (पृथ्वी)

(ततः प्रविशति व्रतरक्षिता)

**व्रतरक्षिता-** (स्वगतम्)

अस्याः समस्तविपदामिह रक्षणार्थ-
मेकः क्षमः स खलु कोऽपि गुरोः प्रभावः ।
अस्मादृशो यदि परं दिननिर्गमाय
किञ्चिच्छुचां च शमनाय निमित्तमात्रम् ॥ २३ ॥ (वसन्ततिलका)

(परिक्रम्य पुरोऽवलोक्य तथामूर्च्छितां देविप्रभां मनःशून्यत्वेन विगतव्यापारां सिद्धशबरीं च निरीक्ष्य) अयि ! किमिदमसमञ्जसं वर्तते ? ।

मृत्युतुलामधिरुढं रक्ष्यमिदं रक्षिताऽपि जडिताङ्गः ।
ननु बलवानपि लोके प्रभवति कर्तुं किमेकाकी ? ॥ २४ ॥ (आर्या)

अयि सिद्धशबरि ! कथमेवं स्थिताऽसि ? ।

**सिद्धशबरी-** (ऊर्द्ध्वं विलोक्य) कथमेषा भगवती व्रतरक्षिता ? । (प्रणमति सास्रम्)

श्वापदभयेन पार्श्वं क्षणमप्यस्या ममाविमुञ्चन्त्या : ।
शिशिरोपचारविधये जातमिदं मनसि वैधुर्यम् ॥ २५ ॥ (आर्या)

(व्रतरक्षिता उपसर्प्य करकलितकमण्डलुजलेनाभिषिच्य मूर्च्छामपहरति ।)

**(सिद्धशबरी-)** सखि ! प्रणम भगवतीम् । निःशेषोऽपि दुःखप्राग्भारोऽमीषां दर्शनाद् विघटित एव ।

(देविप्रभा कथं कथमप्युत्थाय प्रणमति ।)

**व्रतरक्षिता-** स्वस्ति भवत्यै ।

**देविप्रभा-** (निःश्वस्य स्वगतम्) [२७]कुदो सत्थि मे ? । (प्रकाशम्) भयवदि ! तुम्हाण पसादेण एदस्स हदसरीयस्स चाएण पमुसिदे दुक्खपब्भारे जदि सुहं हवदि तदा सत्थि मे ।

**व्रतरक्षिता-** वत्से मा विषदः, दुरतिक्रमः कर्मानुबन्धः । यथातथापि जीवितमेव श्रेयः किं न श्रुतम् ?

२७. **देवि.** कुतः स्वस्ति मे ? (प्रकाशम्) भगवति ! युष्माकं प्रसादेन एतस्य हतशरीरस्य त्यागेन प्रमुषिते दुःखप्राग्भारे यदि सुखं भवति तदा स्वस्ति मे ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

"एति जीवन्तमानन्दो नरं वर्षशतादपि" । (वाल्मीकि रामायणे)

तत् स्थिरा भव । (**अजितदेवे**त्यादि पञ्चपरमेष्ठिमन्त्रं कर्णे निक्षिपति ।)

**देविप्रभा-** (मनोवैक्लव्यादनाकर्णयन्ती इतस्ततो विलोक्य तथैव पतिमनुस्मरन्ती विरहतापमनुभूय) [२८]तं कं पि चिंतेदु उवायं भयवदी जेण जणिं (दाणिं) य्येव रयणीविरामो भोदि । पिच्छ –

[२९]घोरं कोसियघोसभुंगलरवे फेरुंडफिक्कारिदे
ढक्कासद्दसमे झडिल्लसरिसे चंदे करे मुग्गरे ।
पोम्मं धारिय रत्तिवायखिवणा बद्धायरो संपदं
दुव्वारो रयणीबलेण मयणो केणेस वारिज्जए ? ॥ २६ ॥ (शार्दूल.)

(इति मूर्च्छति)

**व्रतरक्षिता-** सत्यं वक्ति वराकी, दुर्निषेध एव पञ्चेषुः । (प्रियविरहे प्रणय-वैक्लव्यमवलम्ब्य एतत्पतिमुद्दिश्य)

विद्यापते ! नरपते ! सततं वियुक्ता
देविप्रभा गतविभा विगतप्रभाऽऽशा ।
कान्तारकान्तपरिरम्भणकान्दिशीका
तारस्वरं प्रलपिता गतचेतनाशा ॥ २७ ॥ (वसन्ततिलका)

आत्मानमात्मनो भिन्नं मन्यमाना एषा तव निवेदयते हे विद्यानां स्वामिन् । नराणां रक्षक ! तव भार्या देविप्रभा त्वया वियुक्ता सती ज्योत्स्नाभिर्धवलिततनुरपि कान्दिशीकत्वेन विशेषेण गतप्रभैव वर्त्तते इति । विद्याप्रभावेन जानीत एव भवान् । नरपतित्वेन रक्षणशक्तिश्चेति किमिति पुरुषमात्रमपि हृदयसन्धारणाय न प्रेषयसि ? महती हि तवाशा एतस्या, देवता त्वम्, आपद्गतैरिष्टदेवतैव स्मर्यते कान्तारस्य कान्तं यत् परिरम्भणं आलिङ्गनं तेन नष्टदिग्विभागा गतजीविताशा तारस्वरं

---

२८. देवि. तत् किमपि चिन्तयतु उपायं भगवती
येन (इदानीम्) एव रजनीविरामः भवति । पश्य

२९. घोरं कौशिकघोषभुङ्गलरवे फेरुण्डफित्कारिते
ढक्काशब्दसमे जटिलसदृशे चन्द्रे करे मुद्गरे ।
पद्मं धृत्वा रात्रिवातक्षेपणात् बद्धादरः सांप्रतं
दुर्वारः रजनीबलेन मदनः केनैष निषेध्यते(निवार्यते) ॥



Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

प्रलापान् कृतवती, सम्प्रति तु प्रलापकरणेऽप्यशक्ता वर्त्तते इत्यपि विद्याप्रभावेन जानानोऽपि किमिति उदास्ते ? ।

(सविस्मयम्) न श्चेत इति, गतघृणैर्न भाव्यमिति अपब्रूहि (?) तस्मात् हे (अ)स्वामिन् ! विप्र ! विप्रत्वं हि तव पत्न्या विना न भवति क्रियाभ्रंशादित्यस्मदुपरोधेनैव आपत आगच्छ सततं वियुक्ताया आदानाय ग्रहणाय देव्याः यतस्ते विद्याभा दीप्रा गततमस्काण्डा अत एव न विगता प्रभा तस्याः सम्प्रति आशयैव कान्तो भवान्, कथमन्यथा अस्मत्प्रार्थनां जिगीषसि कथं वा सा गतचेतनं गतस्नेहं आशास्ते अर[ण्य]कपर्यन्तस्य परिरम्भणेन कान्दिशीकं ईषत्तारस्वरं प्रलपिष्यति सा गतप्राणत्वादिति यावत् अद्यापि प्राणिति तावदागत्य संधारय, अथ प्रयोजनानि विधाय आगमिष्यामीति स्थिरीभूयाः कियन्तमपि कालमित्यप्यनालम्बनं सिद्ध-प्रयोजनत्वाद् विद्यायाः सिद्धेः चन्द्रलेखायाश्च प्राप्तेरित्याह ।

– **विद्यापते** इति हे पते रक्षक नरं – पुरुषविशेषं विद्या कर्त्री भवन्तं आप प्राप्तवती, विद्यायाः पूर्वं सिद्धत्वात्, ता एव त्वां मृगयन्ते, विद्या वा प्राप्नोषि साहसिकत्वात्, उभयानुरागितामनेनाह, इदमेव च सिद्धेर्लिङ्गं यतस्ते देविन्या विलसनशीलया प्रभया आगता प्राप्ता प्रभा यया तया आविरक्षितम् सततं विस्तरप्रासं सर्वं वस्तु सर्वमपि तव प्रभया रक्ष्यते मुक्त्वा एकां मामिति गता मम प्रभाया आशा यतो अद्यापि वियुक्तैवाहं त्वया पक्षिभिश्च युक्ता, कान्तारसदृश एव कान्तो मम परिरम्भणमपि कांदिशीप्रकायं (कप्रायं) भयद्रुतानामपि नष्टदिक्कतो-पजायते, परिरम्भणेऽपि तदपि इति तथोच्यते, तारः स्वरो यत्र तत् प्रलपिता प्रलपामि शपामि यदि हि तन्नाभविष्यत्तदा सम्प्रति शोकशङ्कुरपि नाभविष्यत् । चकारस्य व्यवहितसम्बन्धात् इतः प्राप्तो नाशो मयेत्य-नागतोऽप्यागतवदाचरेति किं प्रज्ञाशाली अ(आ)गमनप्रत्याशया मां कांदिशीकां विधत्ते स एव हि भगवान् (भवान्) अथ मा विषदः, चन्द्रलेखां विधाय आगमिष्यामि, तदप्युत्तरमात्रम् । सञ्जाता चन्द्रलेखा आगतचेतनाशा प्राप्तचैतन्या, नष्टा ब्रह्मराक्षसी, ते तव विद्याप्रभावात् । **विद्यापो** हि भवान् । पूर्वं हि **देविप्रभा** सा देवीत्वात् । पश्चाच्च राक्षसीशापाद् वित्वेन पक्षित्वेन **युक्ता** सततं सा याता हंसी जाता ततो



Jain Education International For Private & Personal Use Only www.jainelibrary.org

गतप्रभा हे **नरपते** विद्याप्रभावात् पुन**र्देविप्रभा**सती **विशेषेण गताः** प्रभा दीप्तयो यस्याः तीर्णाऽपायसागरं चन्द्रलेखां पुनः कां तारयितुं तत्र तिष्ठसि समीपस्थपरिरम्भणसुखा च अनेन भाविवियोगोऽपि सूचितः तारस्वरा प्रवदति स्मेति ।

किञ्च द्वयोरावयोर्विशेषो नास्ति विद्यापते इत्यादि हे पते पुरुषरक्षक ते तव सम्बन्धिनी विद्याधरी सततं त्वया **विशेषेण युक्ता** सम्बद्धा, अहं तु देविप्रभा सर्वदा त्वया सह **वियुक्ता** विरहिता, सा वित्वात् पूर्वं अदेविप्रभा सती देविप्रभा सञ्जाता अहं तु देविप्रभा सती अदेविप्रभा संवृत्ता पित्रादिभिः परिहृतत्वात् । तथा सा त्वत्प्रसादात् ।

**आगतप्रभा** भास्वरशरीरा, अहं तु **गतविभा** विरहखिन्नत्वात् । सा न विशेषेण गतप्रभाशा अहं तु गतप्रभाशा ।

विभा – शारीरं तेजः, प्रभा त्वान्तरं तेजोऽवष्टम्भनरूपं, प्रभावानयमिति, यथा गोबलीवर्दन्यायेन सा कान्तालिङ्गनावाप्त-परमानन्दत्वात् कांदिशीका अहं तु कांत(ता)रस्य परिरम्भणाद् भयद्रुता । काष्ठाप्राप्तसुखदुःखावस्थयोः समानत्वम् अन्तर्मुखा(ख)त्वात् । तथाहि – सुखमग्ना योगिनो न चेतयन्ते दुःखमग्नास्त्वचैतन्येन मूर्च्छागतवत् सा सुखमग्ना तारस्वरं प्रवदति । अहं तु दुःखमग्ना पूत्करोमि सा आगतचेतनाशा गतविघ्नत्वात् अहं तु प्राप्तविघ्नत्वात् गतजीविताशा, सा विदं ज्ञानं प्राप्ता विद्यानां सिद्धेः, अहं तु विदं सत्तां यता(तः) सत्तामात्रेणैव सम्प्रति तवाहं न ज्ञानरूपेण अथवा सा वेदनं विद्यारूपं ज्ञानं प्राप्ता अहं तु वेदनां दुःखं हस्त एव त्वया दग्धः । (क्षणं विमृश्य) आः स्नेहानुकम्पया मयाऽप्यनया इव प्रलपितं ।

(ससंभ्रममुत्थाय नमस्कारमनुस्मृत्य गुरुपदद्वन्द्वनिषण्णमानसा सलिलेनाभिषिच्य मूर्च्छापनोदं विधत्ते ।)

**देविप्रभा-** (उद्बुध्य) [३०]भयवदि ! केणेदं कदं ? भोदीहि ?।

जदो

[३१]झाणोवणीदपइणा सह संगदाए

मुच्छाहि (इ) जं मह सुहं इह किं पि आसि ।

३०. देवि. भगवति ! केनेदं कृतम् ? भवतीभिः ? यतः-



Jain Education International For Private & Personal Use Only www.jainelibrary.org

इन्हिं तए कदपबोहवसाउ दूरं
तस्सिं गदे दिगुणदुक्खभरो फुरेइ ।। २८ ।। (वसन्ततिलका)

**व्रतरक्षिता-** (स्वगतम्) ईदृश एवायं पतिविरहः, ततः किं कर्तव्यम् ? अन्तःस्मरणे नास्ति उपयोगो देवताह्वानाय, मा कथञ्चन तद्दर्शनेन दुःखापनोदः स्यात् । (प्रकाशम्) वत्से ! विस्रब्धा भव । (निकटे उपवेश्य कर्णे एवमेव मन्त्रमुपदिशति ।)

**देविप्रभा-** (तथैव प्रतिपद्य ध्यानं नाटयति वदति च)

अजित तातमान विदितशेषराज
हृदयदेविभाग सुभग धेहि शं नः ।
अजिततातमान विदितशेषराज
हृदयदेविभागसुभग धेहि शं नः ।।२९।।

**व्रतरक्षिता-** (सचमत्कारम्) किमद्यापि तद्दैवतं चिरयति ? ।

**सिद्धशबरी-** भगवति !

मन्त्रन्यस्तहृदेषा ध्यानावेशात् पवित्रतनुलेखा ।
जल्पति किमविस्पष्टं तद्बोधय मां जवादद्य ।। ३० ।। (आर्या)

**व्रतरक्षिता-** किं न बुध्यसे त्वम् ? एषा इष्टकुलदेवतां मानवीमुद्दिश्य यद् वदति तत् शृणु – हे देवि मानवि जानाति भवती मदीयां चेतोवृत्तिं पतिव्रतात्वं चेति (कि)मिति मामुपेक्षसे, मार्जय कलङ्कं, प्रत्यायय पितरौ, आनय प्रियतमं ज्ञातपरमार्थं, अत गच्छ अजितं मदीयस्नेहेन कुलीनत्वेन च,भाहि तव स्फीता न केनापि जीयते, वशीकुरु पितरौ येन निःप्रत्यूहा भवतीमाराधयेयं, गतप्राणा सती प्राणविद् भवामि ? शीलं हि स्त्रीणां प्राणास्तत्प्रत्यायनेन शीलं ज्ञायते जनेन, यतो भवती दितानां खण्डितानां तिरस्कृतानां शेषाणां राज्ञां च हृदयं प्रयच्छति किं पुनर्ममाबलायाः कांदिशीकाया न प्रयच्छति, अजि(वि)भागेन च सर्वेषां सौभाग्यं दधासि किमिति मां दौर्भाग्यकलङ्कितां विधत्से मदीयं च सुखम् अहीनां दुष्टानां कलङ्कोत्पादकानां संवृत्तं

३१. ध्यानोपनीतपतिना सह संगतायाः
मूर्च्छायां यत् सुखम् इह किमपि आसीत् ।
इदानीं त्वया कृतप्रबोधवशात् दूरं
तस्मिन् गते द्विगुणदुःखभरः स्फुरति ।।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

मदीय(याऽ)सुखेन ते मोदमापुरिति जनापवादमार्जनेन यथा तत्सुखं मय्येवावस्थितिमनुबध्नाति तथा यतस्व, तथा यथापूर्वं भवत्या अदेवि क्रीडितम् हन्त शेषाणां राज्ञां हृदयार्थं तथा ममापि सौभाग्यधारणाय अत गच्छ । (विरामाविवक्षाविवक्षाभ्यां सन्ध्यसन्धी) भागेति कोमलामन्त्रणे ।

**सिद्धशबरी-** (ऊर्द्ध्वमवलोक्य) भगवति ! किमेतत् द्वादशार्कमण्डलकल्पं गगनाङ्गणे ज्योतिरुज्जृम्भते ? ।

**व्रतरक्षिता-** वत्से तदेवैतत् गोत्रदैवतं मानवीसंज्ञकमेनां त्रातुमित एवाभिवर्तते ।

(ततः प्रविशत्याकाशयानेन मानवी ।)

**मानवी-** श्रुतशीलशालिनी आज्ञाव्रतधारिणी परोपकारकारिणी गुणकलाकलापमालिनी आजन्मनो गुरुजनोपदिष्टमार्गानुवर्त्तिनी गुणैर्महत्तरा श्रीसुव्रता त्वं वत्से !

इति विद्धि । यतस्तवाखण्डितं विनयव्रतम्, अतिशायिनी गुरुभक्तिः, सेवनीया प्रवृत्तिः, माननीयं वचः, प्रगल्भा चेतोवृत्तिः, न्याय्यः परिवारः, आश्रयणीया जनस्य, भाविशुभोदर्का चेति, न गणनीयः प्राकृतजनासत्प्रलापः, न भेतव्यं क्षुद्रोपद्रवेभ्यः, यास्यन्त्युपद्रवाः शमम्, प्राप्स्यसि परां प्रतिष्ठाम्, लप्स्यसे पुत्रपौत्रैः सहाकलङ्कितसाम्राज्यं प्रियतममिति ।

(देविप्रभा श्रुत्वा आत्मानं चेतयते धैर्यं चालम्बते)

(देवी पुनः पठति)

विगतसकलदोषं मुद्रिताशेषनिद्रं
विलसदतुलकान्तिं चारुमान्यप्रतापम् ।
प्रमुदितसकलाशं दत्तविश्वप्रकाशं
जनयसि सुतमेकं रत्नपुञ्जं सुवेषम् ॥ ३१ ॥ (मालिनी)

द्वितीयाया अभावे प्रथमा युक्ता सती त्वमप्येवंविधेति ।

विगतसकलदोषा मुद्रिताशेषनिद्रा
विलसदतुलकान्तिश्चारुमान्यप्रतापा ।
प्रमुदितसकलाशा दत्तविश्वप्रकाशा
जनयसि सुतमेका रत्नपुञ्जा सुवेषा ॥ ३२ ॥ (मालिनी)

(इति पूर्वोक्तदोषा देव्या क्रमेण निरस्ताः ।) त्वद्भक्तिसत्त्वाकृष्टचेताः



Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रीशेषभट्टारकोऽपि तव कृत्येषु जागरूक एवेति । मुद्रिता शेषस्य निद्रा त्वया । त्वत्प्रयोजनव्यग्रतयाऽसौ गतनिद्र एव । वत्से ! किमिति शोकशङ्कुना आत्मानं कदर्थयसि ? तथा –

श्रद्धासारा मालिनी यस्य चित्ते
भाग्यैः प्राप्ता शालिनी मानवी या ।
सेव्या देवी चन्द्रकान्तोपलाभा
धन्यैर्दृष्टा सा मुदे नोऽस्तु नित्यम् ॥ ३३ ॥ (शालिनी)

देव्या देविप्रभायाश्चन्द्रलेखायाश्च कान्त प्रिय ! यस्य कस्यापि चित्ते पित्रादेः सपत्न्यादेर्वा मलिनात् मालिन्यादागता तत्र भवा वा श्रद्धा दुर्बुद्धिलक्षणा सकलङ्केयमिति सा असारा तुच्छैव को हि सकर्ण एवंविधां महासतीम् अकलङ्कां कलङ्कयति श्रीशेषभट्टारके विलसति सति । अभाग्यैरेव तैः सा प्राप्ता अभाग्यानि तेषामुपस्थितानि यद्यपीयं शापशालिनी न भवति उत्तमप्रकृतित्वात् । को हि पाप्मिनं विगतप्राणं शपति ? तत्पापप्रसङ्गात् । तथापि वयं सोढुमशक्तारः । अशोभां च प्राप्ता इयं बुद्धिः । असेव्या चेयं । तद्वन्तः प्रज्ञाशालिभिर्न सेवनीयाः ।

***'न केवलं यो महतां विभाषते शृणोति तस्मादपि यः स पापभाग्'** भवति । अधन्या एव ता, न श्रद्धाव(वं)तः पश्यन्ति, धनं लक्ष्मीं ये नार्हन्ति, तत् संसर्गो हि धनापहारकारी आज्ञासारनृपति-विरुद्धसङ्गन्यायेन । यतः सा दुराशा नित्यमस्माकममोदायैव प्रभवति, उपलवदाभासते साऽसारत्वादिति, सा हि मानवीं याति, तया मानवी देवी शासिका सम्प्रति प्राप्ता इति मुञ्चत दुरध्यवसायं, आश्रयत देविप्रभां । अन्यथा न भवथेति एतेन देव्या लोकप्रत्यायनं विहितम् ।

सम्प्रति ताम् अनुसान्त्वयति 'श्रद्धासारे' त्यादि – श्रद्धावती भवती सैव च श्रद्धा तव सारो बलं स्थिरा च अत एव च अचित्ते गतप्रेम्णि प्रियतमे मालिनीयसि मालिन्यामिवाचरसि गृहीतमालामुपलभ्य मोदते जनः स्निह्यति च, देवता हि कुलस्त्रीणां भर्त्ता, निराश्रया च भक्तिः फलवती, सा च त्वय्येव, अत एव च श्रीशेषराजोऽपि यतते, जन्मान्तरसञ्चितैरेव च भाग्यैः सा प्राप्यते, एतावतीं कालकलां स्वमहिम्ना

* कुमारसंभवे - सर्ग ५-८३.



Jain Education International For Private & Personal Use Only www.jainelibrary.org

सा श्रद्धा स्थिरीकृता, सम्प्रति भाग्यैः कर्मभिः प्राप्ता, तान्येव स्थिरीकरणे यतिष्यन्ते इति निर्व्यापारा सती सुखं स्वपिहि, शालिनी च मानवी या हि भवती मनोरपत्यापत्यत्वात्, अनेन कुलमेव दृढत्वे हेतुः । इत्याह । सेव्या च सेवार्हा च सर्वेषां त्वं जातेति किमिति प्रावृडश्रुपातैरात्मानं मलिनयसि ? यतो देवी साक्षाद् भवति मदीयपुत्रीत्वाच्चन्द्रकान्तो-पलवन्निर्मला आ(भा) तव च वर्तते यतो धन्यैः श्रीशैषभट्टारकप्रभृतिभिः दृष्टा अन्यदर्शनमप्रयोजकमेव वर्तते सा च त्वमस्माकं मुदे हर्षाय संवृत्ताऽसीति यथा प्रेयसि मालिनीयसि तथै(वा)ऽमृतकुण्डीय(सि ?) प्रेयसि । चन्द्रीयसपत्नीजने कान्तीयपरिजने उपलीयदुर्जने राजायते तवात्मा स्थेमायते बन्धुवर्गः प्रेयते जन्तुसन्ततिः, बन्धूयते सपत्नीजनः, साधूयन्ते खलाः, परिवृढायते दुर्बलः, कृतार्थायते जीवलोकः, अभिमनायते शीलसम्पत्, सुखायते कुलं तव शीलमहिम्नेति । पूर्वं हि जातमालिन्या बहुलाघवा संवृत्ता पुनर्देव्या मार्जितकलङ्का भूयासा (भूयसां) कृतलाघवा स्वयं प्राप्तगौरवा मालिनीकृता ततः पित्रोरा-पादितलाघवा सर्वगुरुशालिनीत्वेन भाससे । (इत्युक्त्वा देवी तिरोदधे ।)

**व्रतरक्षिता-** (देविप्रभां प्रति –) वत्से ! देवीवचःश्रवणात् स्वास्थ्यं गताऽसि उत न ।

**देविप्रभा-** (स्वगतम्) [३२]आ ! जादे जामिणीविरामे कहं सत्था हविस्सं । (प्रकाशम्) भयवदि ! सुत्थिदा सुत्थिदा ।

**व्रतरक्षिता-** (स्वगतम्) वीप्सया वदन्ती अद्यापि तदेव पतिविरहदुःखं वराकी प्रथयति (प्रकाशम्) किं तमेव रजनीविरामे समीहसे ?

**देविप्रभा-** [३३][अध इं । अंतट्ठिदभावं] भयवदि य्येव मुणेदि (इति पादयोः पतति क्षणान्तरे ऊर्ध्वालोकनेन गग[न]मध्यमध्यासीनं प्रालेयांशुमवलोक्य (त) थैव विरहदाहज्वरमनुभूय सत्रासम् संस्कृतमाश्रित्य)

एतस्मिन्नुदयाचलावनितले रिङ्खत्यनुष्णद्युतौ
छायामण्डलवर्मणा वपुरिदं प्रच्छाद्य संरक्षितम् ।

---

३२. **देवि.** आः ! जाते यामिनीविरामे कथं स्वस्था भविष्यामि । (प्रकाशम्) भगवति ! सुस्थिता, सुस्थिता ।

३३. **देवि.** (अथ किम् । अन्तःस्थितभावम्) भगवती एव जानाति ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

दूरं ध्वस्तसमस्तसंहततमः क्षोणीभृतां मूर्द्धनि
स्फूर्जद्भानुभरे मया कथमिव प्राणिष्यते सम्प्रति ॥ ३४ ॥ (शार्दूल.)

**सिद्धशबरी-** भ(ग)वति ! अतः परमसौ चन्द्रातपकदर्थिततनुरवश्यं प्राणांस्त्यक्ष्यति, तच्चिन्त्यतां कोऽप्युपायः ।

**व्रतरक्षिता-** (विमृश्य) देविप्रभे ! अस्मिन् माधवीलतानिकुञ्जान्तरे प्रविश्य रजनीविरामेण एतदुपद्रवेभ्यः स्वरक्षाविधये स एवोपदेशः स्मरणीयः ।

**देविप्रभा-** (स्वगतम्) [३४]जुत्तं भणेदि भयवदी पुरावि एदेणोपदेसेण देवीसमासासणमेत्तं संवुत्तं, दाणिं तु जदि किंपि न हवसदि तदो अस्सिं अंधयारे लुक्किदाए एदाओ दुट्ठचंदातवाओ मा कहं खणं रक्खणमेत्तं हवेदि त्ति । (प्रकाशम्) भयवदि ! एवं करेमि । (इति परिक्रामति स्खलितमभिनीय सानन्दम्) इत्थंधयारबहले कुंजे निविट्ठाए दुट्ठसप्पादि-उवद्दवो जदि हवदि ता एदं हदसरीरयं मुञ्चंतीए जधासमीहिदं फलदि। (कुञ्जान्तरे प्रविशति)

**सिद्धशबरी-** (सचमत्कारम्) भगवति ! विजृम्भमाणोत्तालवेतालकिलकिलकोलाहलवाचालितसकलदिगन्तरालं बहलधूममण्डलीकवलीकृतनिखिलनक्षत्रमालं गगनान्तरालतरलचलदुष्टा (दुल्का ?) वलीतुलितकल्पान्तकालोदितद्वादशमार्तण्डमण्डलं महाप्रलयसमयसमुद्यतभैरवोन्मुक्तविकटाट्टहाससमगर्जितरवेण बधिरितत्रिलोकीतलं प्रस्फुरत्फेनावलीकल्पतारकानिकरकलितगगनार्णवान्तर्विजृम्भमाणतेजःपुञ्जविडम्बितवाडवानलं किमिदं पुरःस्थमवलोक्यते।

**व्रतरक्षिता-** (क्षणं विमृश्य) –

एतत्तदेव गुरुभिः कथितं यदासीदस्य द्विजोत्तमशिशोरपहारहेतुः ।
रक्षो निजप्रियतमानिकृतिप्रगाढवैरं स्मरत्यहह
किं किमतः परं स्यात् ॥ ३५ ॥ (वसंततिलका)

---

३४. **देवि.** – युक्तं भणति भगवती, पुरापि एतेनोपदेशेन देवीसमाश्वासनमात्रं संवृत्तम् । इदानीं तु यदि किमपि न भविष्यति ततः अस्मिन् अन्धकारे मग्नाया एतस्मात् दुष्टचन्द्रातपात् मा कथं क्षणं रक्षणमात्रं भवेत् इति ।

भगवति ! एवं करोमि –

अत्रान्धकारबहले कुञ्जे निविष्टायाः दुष्टसर्पादि-उपद्रवो यदि भवति तदा हतशरीरकं मुञ्चन्त्याः यथासमीहितं फलति ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**सिद्धशबरी-** (सविस्मयम्) किमुक्तं भगवत्या, कोऽयमत्र द्विजशिशुः, किं च रक्षः, का च प्रिया, कश्च परिभवो, यस्मादस्य प्रकोपः ।

**व्रतरक्षिता-** (सहासम्)अयि ! न जानाति भवती वृत्तान्तमिमम् ? । अवधेहि अस्या एव देविप्रभाया भर्त्रा विजयेन तैस्तैर्गुरुप्रयुक्तप्रयोगैः पुराऽस्य विकटाक्षनाम्नो राक्षसस्य दयिताया आहितातमाया हंसीग्रसनोद्यताया नासाच्छेदेन चन्द्रलेखाप्राप्तौ महान् परिभवः समजनि तदयमस्य सम्प्रति समुत्पन्नशिशोर्भाविचक्रवर्तिपदस्यापहारमकार्षीत् ।

**सिद्धशबरी-** किं किमियं प्रसूता ? ।

**व्रतरक्षिता-** अथ किम् अत्रैवान्तरे नभस्तलविजृम्भमाणदुन्दुभिध्वनिरपि न श्रुतः ।

**सिद्धशबरी-** एतदाश्वासनोपायं चिन्तयन्त्या मनोवैयग्र्यात् न लक्षितः । (मुहूर्त्तमेकं विचिन्त्य) भगवति ! स्ववितर्कं निवेदयामि, यद्येतदेवमेव तदा परित्यक्तमेव जीवितमनया ।

**व्रतरक्षिता-** मैवम् ।

पुत्रोत्पत्तिसुखानन्दमिलिताक्षी तपस्विनी ।
जडाङ्गीयमिदं कर्म क्रूरं नाद्यापि बुध्यते ॥ ३६ ॥ (अनुष्टुप्)

**सिद्धशबरी-** तर्हि समाश्वासयितुमेनां किमद्यापि विलम्ब्यते ।

(इति परिक्रम्य कुंजान्तरे प्रवेशं नाटयतः । तां तथा दृष्ट्वा)

**सिद्धशबरी-** (सदैन्यम्) भगवति ! किं भविष्यति ? चिन्त्यतां कश्चन सम्बोधनोपायः ।

**देविप्रभा-** (चेतनामवाप्य । ऊर्द्ध्वालोकनेन व्रतरक्षितामुपलक्ष्य सहर्षम्) [३५]भयवदि ! फलिदं तत्तभोदीए पसादेण, विगलिदो सव्वो वि दुखपब्भारो पत्तो सयल-सुहाणं पि निही पुत्तो । पिच्छीयदु (इत्युक्त्वा पार्श्वमवलोक्य पुत्रमपश्यन्ती सोरस्ताडं) हा हडम्हि मंदभाइणी (इति मूर्च्छति)

**सिद्धशबरी** वल्कलाञ्चलेनोपवीजयति ।

---

३५. **देवि.-** भगवति ! फलितं तत्र भवत्याः प्रसादेन विगलितः सर्वोऽपि दुःखप्राग्भारः प्राप्तः सकलसुखानामपि निधिः पुत्रः । पश्यतु (......) सोरस्ताडं हा हताऽस्मि मन्दभागिनी ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**देविप्रभा-** (चैतन्यमवाप्य)

[३६]हा सव्वसुंदर हहा तयलोयदीव
हा लच्छिवासहर हा नयणिक्कचंद ।
हा पुत्त मज्झ सुहपायवमूलकंद
चत्तूण इत्थ गहणे कह तं गदो सि ॥ ३७ ॥ (वसन्ततिलका)

[३७]जं दूरट्ठिदवल्लहेण जणिदं जं तायमाएहि मं
चत्ता अंकुरिदं थिरेहिं हवियप्पाणेहिं जं वड्ढिदं ।
जं तुज्झाणणदंसणेण णिहदं दुव्वारदुक्खं जवा
तं एदं सयलं वि तुज्झ गमणे भूओ वि उम्मीलिदं ॥ ३८ ॥ (शार्दूल.)

(ऊर्द्ध्वमवलोक्य व्रतरक्षितादर्शनाद् द्विगुणदुःखानुभवने साक्रन्दम्) भयवदि !

[३८]सो पियविरहो सो चाओ अइसिणिद्धजणणीजणयस्स ।
विहडणं मज्झ सुयस्सवि दारइ कयवं व मे हिययं ॥ ३९ ॥
(आर्या)

[३९]जो अमयवुट्ठिसरिसो पुत्तो गुरुदुक्खदावदड्ढाए ।
सो मज्झ अज्ञ विहुर कड्ढइ जीयं कयंतो व्व ॥ ४० ॥
(आर्या)

**व्रतरक्षिता-** (स्वगतम्) कथमद्यापि चिरयति ज्ञानबोधः । (प्रकाशम्) वत्से !

---

३६. हा सर्वसुन्दर ! हहा त्रैलोक्यदीप !
हा लक्ष्मीवासगृह हा नयनैकचन्द्र ! ।
हा पुत्र मम सुखपादपमूलकन्द
त्यक्त्वा इह गहने कथं त्वं गतोऽसि ॥

३७. यद् दूरस्थितवल्लभेन जनितं यद् तातमातृभ्यां मां
त्यक्त्वा अङ्कुरितं स्थिरैः भूत्वा प्राणैः यद् वर्तितम् ।
यत् तवाननदर्शनेन निहतं दुर्वारदुःखं जवात्
तद् एतत् सकलमपि तव गमने भूयोऽपि उन्मीलितम् ॥

३८. स प्रियविरहः स त्यागः अतिस्निग्धजननीजनकस्य ।
विघटनं मम सुतस्यापि दारयति क्रकचमिव मे हृदयम् ॥

३९. योऽमृतवृष्टिसदृशः पुत्रः गुरुदुःखदावदग्धायाः ।
स मम अद्य विधुरं कृषति जीवितं कृतान्त इव ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

संज्ञानवर्म हृदये विनिवेश्य शोकशङ्कोः शरीरकमिदं परिरक्ष तावत् ।
संसारसागरनिमज्जनजातमेतज्जाड्यं
विमुच्य मतिमर्पय पुत्रि बोधे ॥ ४१ ॥ (वसन्ततिलका)

[ततः प्रविशति ज्ञानबोधः]

**ज्ञानबोधः-** (ससम्भ्रमम्) क्वास्ते सा जीवितनिरपेक्षा वराकी । (परिक्रम्य पुरोऽवलोक्य व्रतरक्षितासिद्धशबरीभ्यां समन्विता सेयमित एवाभिवर्तते) व्रतरक्षिते ! साध्वनुष्ठितं, यदस्मदागमनावधि विधुरतां धारयन्तीयं सम्बोधिता ।

**व्रतरक्षिता-** (विलोक्य सगौरवं प्रणमति । देविप्रभां प्रति) वत्से ! प्रणम प्राक्समुपार्जितपुण्यसञ्चयसमुपनीतान् गुरून् । इत ऊर्द्ध्वममीषां प्रसादेन समग्रदुःखापनोदस्तव भविष्यति ।

**देविप्रभा-** (कथं कथमप्युत्थाय तथा करोति वदति च)
[४०]करुणं काऊण परं देउ गुरु कं पि मज्झ उवएसं ।
हयजीवियस्स चाओ हवइ जहा मज्झ सहस त्ति ॥ ४२ ॥ (आर्या)

**ज्ञानबोधः-** वत्से ! अलमावेगेन । सकलकल्याणकल्पद्रुमस्त्वयि वर्त्तते परमगुरूणां प्रसादः ।

**देविप्रभा-** (स्वगतम्) [४१]किं अदो उद्धं गुरुप्पसाएण ?

**ज्ञानबोधः-** (तथावस्थां निरीक्ष्य) पुत्रि ! मा विषादं गमः । नावगन्तव्यं पुत्रापहारो मम जात इति, यतः-
पुत्रं हत्वा प्रयान्तं तव विकटमपाकृत्य नक्तंचरेशं,
जग्राह व्योमचारी शृणु मतिविभवः पूर्वशिष्यो गुरूणाम् ।
तस्मादेतत्प्रसादव्यपगतविपदं वर्द्धमानं विदित्वा,
स्वास्थां (स्वास्थ्यं) गच्छ त्वमस्माननुसर
कतिचिद्वासरानिष्टसिद्ध्यै ॥ ४३ ॥ (स्रग्धरा)

**देविप्रभा-** तथैव प्रतिपद्य अनुगमनं नाट्यति ।

[निष्क्रान्ताः सर्वे]

॥ चक्रवर्त्तिजननो नाम द्वितीयोऽङ्कः ॥ छ ॥

४०. करुणां कृत्वा परं ददातु गुरुः कमपि ममोपदेशम् ।
हतजीवितस्य त्यागः भवति यथा मम सहसा इति ॥

४१. **देवि.** (स्वगतम्) किमत ऊर्ध्वं गुरुप्रसादेन ?



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# तृतीयोऽङ्कः

पात्रसूचिः

१. शुद्धबुद्धिः- आज्ञासिद्धशिष्यः ।
२. मतिमसृणः - आज्ञासिद्धशिष्यः ।
३. चन्द्रलेखा - विद्याधरी ।
४. कनकचूलः - पातालवासी तत्त्वप्रपञ्चनमित्रम् ।
५. चेटी - चन्द्रलेखायाः दासी ।
६. बोधप्रदा - देवता ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

[ततः प्रविशति शुद्धबुद्धिः]

**शुद्धबुद्धिः-** आदिष्टोऽस्मि आज्ञासिद्धेन गुरुणा यत् त्वया वैताढ्यशिखरमारुह्य मायापुरीनिवासी चन्द्रलेखापतिर्विजयो नाम ब्रह्मसूनुः परमविद्यासाधनाय समीपस्थिततत्त्वप्रपञ्चनात् तेन तेनोपायेन इह समानेतव्यः, तत्र स्थितस्य च विद्याधरीभोगसुखमुपभुञ्जानस्य अपायकदम्बकविद्रावणाय तस्यैव तत्त्वप्रपञ्चनस्य इदमादेश्यम् । ततस्तं क्व विलोकयिष्यामि । (सम्मुखमायान्तं मतिमसृणं दृष्ट्वा) अहो मतिमसृण ! क्व गन्तव्यं भवता ?

**मतिमसृणः-** (वलितग्रीवमवलोक्य) [१]कहमेस सुद्धबुद्धी ता किं कारणमिहागमणे मुणिदव्वं, (वि[नि]वृत्त्योपसर्प्य सप्रश्रयम्) [२]सखे ! संदिट्ठकज्जसाहणो-सुयमाणसेण तुवं न दिट्ठो सि, कहेदु कुसलं गुरूणं ? ।

**शुद्धबुद्धिः-** एवं ।

**मतिमसृणः-** [३]किं कज्जमिहागमणेण ?

**शुद्धबुद्धिः-** शृणु जानात्येतद् भवानपि यत् तदा तां दुष्टराक्षसीमपाकृत्य विद्याधरीमे-नामासाद्य इह विलाससुखमुपभुञ्जानस्य तेन संसारमायाप्रपञ्चेन इतः स्थानादाकृष्योपनीतभार्यायां चक्रवर्तिबीजनिषेकार्थं नीतस्य तत्क्षण एवात्रत्यसुखमनुस्मरत इहागतस्य सा दुष्करं जीवितमादधे ।

**मतिमसृणः-** [४]एदमन्नं च थोवं किंपि तत्तपवंचणेण मह कहिदं वट्टदि जं तइया निसीहभरे मुत्तूण इत्थ आगदे भत्तरि तिस्सा आवन्नसत्ताए पिउणा कुलकलंकभयेण अडवीहिं परिच्चाओ कदो, तदो अज्जवि जीवदि तत्थ ट्ठिदा सा ? ।

**शुद्धबुद्धिः-** अथ किम् । कल्याणपुत्रप्रसविन्यपि बभूव ।

**मतिमसृणः-** [५]किं तेण चक्कवट्टिणा भोदव्वं ?

---

१. **मति.** कथमेषः शुद्धबुद्धिः, ततः किं कारणमिहागमने ज्ञातव्यम् ।
२. सखे ! संदिष्टकार्यसाधनोत्सुकमानसेन त्वं न दृष्टोऽसि, कथयतु कुशलं गुरूणाम् ? ।
३. किं कार्यमिहागमनेन ?
४. **मति.** एतद् अन्यत् स्तोकं किमपि तत्त्वप्रपञ्चनेन मम कथितं वर्त्तते । यत् तदा निशीथभरे मुक्त्वा अत्र आगते भर्त्तरि तस्याः आपन्नसत्त्वायाः पित्रा कुलकलङ्कभयेन अटव्यां परित्यागः कृतः ततोऽद्यापि किं जीवति तत्र स्थिता सा ? ।
५. **मति.** किं तेन चक्रवर्त्तिना भवितव्यम् ? ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**शुद्धबुद्धिः-** न केवलं चक्रवर्तिना, अस्यापि विजयस्य महाविद्याप्रसाधने करिष्यमाण-महाचरुपाके उत्तरसाधकेन भवितव्यम् ।

**मतिमसृणः-** (सविस्मयम्) [६]तदो किमेस इदो ठाणाओ तत्थ गमिस्सदि ? ।

**शुद्धबुद्धिः-** गमिष्यति गमिष्यति ।

**मतिमसृणः-** (सचकितं स्वगतम्) [७]एवं पुनरुत्तेण वदं[यं]तो कंपेदि मं । नूणं चंदलेहाए वियोगेण भविदव्वं, अम्हेहिं वि पुणो अडवी सेविदव्वा । (प्रकाशम्) णं सो जणिदपुत्तो तस्सिं य्येव अडवीहिं तिस्सा समीवे चिट्ठदि ? ।

**शुद्धबुद्धिः-** (विहस्य)

स जातमात्रोऽपि निजप्रभावान्न्यक्कृत्य रक्षः शुशुभे महौजाः ।
पार्श्वे गुरूणामभिवर्द्धमानः क्षिपूत्वा तमिस्रं नभसीव भानुः ॥ १ ॥
(उपजातिः)

**मतिमसृणः--** (सचमत्कारम्) [८]ण किं रक्खं जं तस्स पहावेण पराभूदं ? ।

**शुद्धबुद्धिः-** तस्या एव**वाहितातमायाः** पति**र्विकटाक्षः** ।

**मतिमसृणः-** [९]तदो जदि एवं विजयो सुणिस्सदि ता नूणं तिस्सा एव रक्खसीए पहि पेसइसदि ।

**शुद्धबुद्धिः-** साधूक्तं, न किञ्चिदसाध्यं विजयस्य, सम्प्रति कथं कथं विलाससुखमनुभवतीति बोधय ।

**मतिमसृणः-** [१०] सो देवदूसवसणाइं अलंकरेदि,
धम्मिल्लए वहदि णिच्चं वि पारियायं ।

---

६. **मति.** ततः किमेष इतः स्थानात् तत्र गमिष्यति ? ।

७. **मति.** एवं पुनरुक्तेन वदन् कम्पयति माम् । नूनं चन्द्रलेखायाः वियोगेन भवितव्यम् । अस्माभिरपि पुनरटवी सेवितव्या । (प्रकाशम्) ननु सः जातपुत्रः तस्यामेवाटव्यां तस्याः समीपे तिष्ठति ? ।

८. **मति.** ननु किं रक्षः यत् तस्य प्रभावेन पराभूतम् ।

९. **मति.** ततः यदि एवं विजयः श्रोष्यति ततः नूनं तस्या एव राक्षस्याः पथि प्रेषयिष्यति ।

१०. **मति.** – स देवदूष्यवसनानि अलङ्करोति,
धम्मिल्लके वहति नित्यमपि पारिजातम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

अंकाउ मुंचदि खणं पि न चंदलेहं,
रत्तिंदिवं गमइ सुंदरकाणणेसुं ॥ २ ॥ (वसंततिलका)

**शुद्धबुद्धिः-** अपायबहुलानि कान्ताराणि, किमिति पुरं त्यक्त्वा तेषु बद्धरतिः ।

**मतिमसृणः-** [११] जत्थ सदोदिदललिदा वियरदि तत्तपवंचमइजुन्हा ।
तत्थ कह अवयासो महदो वि अवायतिमिरस्स ॥ ३ ॥ (आर्या)

**शुद्धबुद्धिः-** यद्येवं तथापि – निकटे समुपवेश्य कर्णे एवमेव गुरूपदिष्टं तत्त्वप्रपञ्चनोद्योगाय निवेदयते वदति च) क्व सम्प्रति भवता गन्तुं प्रारब्धमासीत् ।

**मतिमसृणः-** (कर्णे एवमेव) पातालवासिनः कनकचूलस्य सन्दिष्टं कथयति ।

**शुद्धबुद्धिः-** तर्हि त्वरा[रया] याहि । अहमपि गुरूणामत्रत्योपलब्धिं सर्वां निवेदयामीति ।

(निष्क्रान्तौ)

**विष्कम्भकः**

[प्रविशति यथानिर्दिष्टो विजयः चन्द्रलेखा च । विभवतश्च परिवारः]

**विजयः-** अहह प्रभातसमयः कं नाम नाऽऽमोदयति । तथाहि-

युक्तं यञ्जनयन्निवैष सविता विश्वं तमिस्रोदरात्,
मित्राख्यः सुखमुत्सृजन्नघभरं भिन्दन् हरिर्गीयते ।
निःशेषं खलु वर्तयन्नपि महश्चक्रेण चक्रं जवा-
देतच्चित्रमहो जगाम न जने तां चक्रवर्तिप्रथाम् ॥ ४ ॥
(शार्दूलविक्रीडितम्)

**तत्त्वप्रपञ्चनः-** मैवम् ।

नत्वेषा पदवी तनोति परमं माहात्म्यमुच्चैस्तरा-
मन्येष्वेव जगत्त्रयैकतिलकेऽमुष्मिन्ननौचित्यभृत् ।
अम्भोजासनचक्रपाणिगिरिशैरन्वीयमानोऽन्वहं
बालोऽप्येष तिरस्करोति न विभुः किं चक्रवर्तिश्रियम् ॥ ५ ॥
(शार्दूलविक्रीडितम्)

---

अङ्कात् मुञ्चति क्षणमपि न चन्द्रलेखां,
रात्रिन्दिवं गमयति सुन्दरकाननेषु ॥

११. **मति.** – यत्र सदोदितललिता विचरति तत्त्वप्रपञ्चनमतिज्योत्स्ना ।
तत्र कथमवकाशो महतोऽप्यपायतिमिरस्य ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**विजयः-** (परिक्रम्य उद्यानान्तर्विहरमाणः समीरणस्पर्शसुखमनुभूय)
आलिङ्गन्तो गगनतटिनीलोलकल्लोलमालाः
क्रीडोद्याने विचकिललता मन्दम(मा)न्दोलयन्तः ।
लु म्पन्त्ये ते सु रतललितक्लान्तकान्ताकपो ले
लीलापत्रावलिविलुलितान् स्वेदबिन्दून् समीराः ॥६॥ (मन्दाक्रान्ता)

**तत्त्वप्रपञ्चनः-** सुभुवनमभिपुनानः कुम्भयोनेर्दिगन्तात्
मलयजनभ[ग]शाखासङ्गमासाद्य सद्यः । (तरु)?
जलधि+सवनशुद्धः सञ्चरत्यत्र पूर्व-
स्मरणकलितभीत्येवैष मन्दं समीरः ॥ ७ ॥ (मालिनी)

**चन्द्रलेखा-** [१२]निब्भच्छिदमुत्ताहल [सरसी] सीयरेहिं रूसिदो एस ।
अक्खइ हंत कयत्थं रयणायरसंगएण अप्पाणं ॥ ८ ॥ (आर्या)

**विजयः-** साधूक्तम् । कस्त्वदन्यो (जनः) नामैवमेनमुत्प्रेक्षते । सत्यं सद्यःकविरसि । (परिक्रम्य पुरः सरसीमवलोक्य चन्द्रलेखां प्रति) प्रिये ! सेयं सरसी पुनर्नयनवर्त्मनि वर्तते यस्यां पुरा त्वया सह क्रीडता क्षणमिव रात्रिन्दिवमतिवाहितं मया, सम्प्रत्यथावयोर्दर्शनात् पश्य यादृशीमानन्दसम्पदमावहति-

विकचकमलचक्रा लोलकल्लोलहस्ता
प्रकटितवलयाभाऽऽवर्त्त*चारीविलासा ।
[मधुकर] मधुगुञ्जा वेणुनादे समन्ताद्
विलसति मुदितेयं दीर्घिका नृत्यतीव ॥ ९ ॥ (मालिनी)

(इतस्ततोनिरीक्षमाणस्तटस्थितमालतीवनमवलोक्य)
उज्जृम्भमाणनवकाञ्चनपद्मकोशे
पीत्वा मुहुर्मधु सुगन्धि मधुव्रतोऽयम् ।
उद्यन्मदभ्रमिसलीलनिमीलिताक्षः
प्रत्यङ्कमालुठति सम्प्रति मालतीनाम् ॥ १० ॥ (मालिनी)

---

+ सवनं = स्नानम्. अभिचि. ६३८

१२. निर्भर्त्सितमुक्ताफल [सरसी] शीकरैः स्पृष्ट एषः ।
आख्याति हन्त कृतार्थं रत्नाकरसंगतेन आत्मानम् ॥

* नहि चारीं विना नृत्ये नृत्यत्याङ्गं प्रवर्तते । (शब्दरत्न.)
एकपादप्रचारो यः स चारीत्यभिधीयते ॥ (नाट्यशास्त्र अ. १०)



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**चन्द्रलेखा** - [१३]सलहिज्जइ एस परं भुवणयले छप्पओ छइल्लाणं ।
सयलवणराइरत्तो मालइए जो तउव्विट्ठो ॥ ११ ॥ (आर्या)

**विजयः**- (स्वगतम्) अन्योक्त्या मामुद्दिश्य निश्चितं वदति वल्लभेयम् । तद् रसान्तरेण प्रतारयामि । (प्रकाशम्) पुरः क्रीडाशैलं दर्शयन्

स्मरसि किमिह मुग्धे स्वैरमीर्ष्यायितस्य
स्फटिकघटितभित्तावात्मनो वीक्ष्य बिम्बम् ।
अपरयुवतिशङ्काव्याकुला पादघातैः
सपदि हृदि तदा मे ताडनं यत् व्यधास्त्वम् ॥ १२ ॥

(मालिनी)

**चन्द्रलेखा** - (विलासशैलमवलोक्य सोत्कम्पम्)
[१४] मा वच्चसु पिय अस्सिं न मुयइ जस्सिं नरं सवित्ती सा ।
नूणं पत्तो तीए होसि तुमं दुल्लहो मज्झ ॥ १३ ॥ (आर्या)

**चेटी** - (स्वगतम्) आः शान्तं पापम् । किमुक्तमनया देव्या स्ववियोगभावि [व]चः ।

**तत्त्वप्रपञ्चनः**- (स्वगतम्) अहह ! दैवमपि गुरुणा चिन्तितार्थकारि यदियं भविष्यद्विप्रयोगसूचामभिहितवती ।

**विजयः**- प्रिये ! तर्हि ऋतुषट्कसमुत्सवसमृद्धमुद्यानोद्देशमवलोकयामः ।

**चन्द्रलेखा**- [१५]एवं किज्जदु ।

**विजयः** - (निपुणं वपुःश्रियमवलोक्य सानुरागम्) तिष्ठतु तावदथवा वनान्तोद्देशः ।

स्फुरत्परभृतस्वरा विकचकान्तमल्लीस्मिता
समुन्नतपयोधरा विशदचन्द्रवक्त्रद्युतिः ।
प्रदत्तपुलकोद्गमा घनतुषारशीता प्रिये
त्वमेव दधसे तनावृतुकदम्बलक्ष्मीमिति ॥ १४ ॥

(पृथ्वी)

**चन्द्रलेखा** - (तामेव स्फटिकशिलान्तः स्वप्रतिबिम्बेन सपत्नीं स्मरन्ती साभ्यसूयम्)

---

१३. **चन्द्र.** श्लाध्यते एष परं भुवनतले षट्पदः छेकानाम् ।
सकलवनराजिरक्तः मालत्यां यः तदा उपविष्टः ॥

१४. मा व्रज प्रिय ! अस्मिन् न मुञ्चति यस्मिन् नरं सपत्नी सा ।
नूनं प्राप्तः तया भवसि त्वं दुर्लभो मम ॥

१५. **चन्द्र.** एवं क्रियताम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

[१६]अणुमन्नसु जामि घरं दूमइ सव्वं पि मह मणं एयं ।
मा कह तुज्झ विउत्ता लहेमि दुक्खस्स वीसामं ।। १५ ।।      (आर्या)

**विजयः-** (तत्त्वप्रपञ्चनं प्रति) सखे ! इत्थमपि वदन्ती सुखयतितरामियमस्मान् परं कथयामि किञ्चित् ।

लक्ष्मीः प्रेम च घटितं द्रव्येणैकेन वेधसा मन्ये ।
अत एवात्र द्वितये हृद्येऽपि हि चापलं तुल्यम् ।। १६ ।।      (आर्या)

**तत्त्वप्रपञ्चनः-** मैवम् ।

सर्वगुणेष्वप्यस्मिंश्चञ्चलता वहति परमसौन्दर्यम् ।
रसनिस्यन्दिपदेष्वप्युक्तेरिव वक्रता काव्ये ।। १७ ।।      (आर्या)

**चन्द्रलेखा-** (गाढपरितापमनुभूय) [१७]कहं मज्झन्हसमओ वट्टदि ।

[१८]लुक्को पुव्वदिसाए एस रवी वहइ निबिडसंतावं ।
संपत्तो अवराए जइ कहमवि निव्वुदिं लहइ ।। १८ ।।      (आर्या)

**तत्त्वप्रपञ्चनः-**

ब्रह्मन् ! गगनमध्यमध्यासीनः सर्वतः परितापदुःसहः सहस्रांशुः ।
तदत्र प्रियङ्गुलतामण्डपान्तः स्थिताः कियन्तं समयमतिवाहयामः ।

[सर्वे प्रवेशं नाटयन्ति चन्द्रशिलातले उपविशन्ति च]

**विजयः-** (चेटीवर्गोपनीतमृगमदमलयजरसादिसुगन्धिद्रव्योपभोगं प्रियया सममनुभूय) प्रिये !

किमु निशि हिमपिण्डैरात्तमार्णालतन्तु-
र्विरचयति विरिञ्चिः पाथसोऽन्तः प्रविश्य ।
मलयजरसमुख्यान्येष वस्तून्यमूनि
प्रबलतरणितापं यत् क्षणेन क्षिपन्ति ।। १९ ।।      (मालिनी)

अथ मृगमदेन भालतले प्रियाया अर्द्धचन्द्रं विरचय्य (तत्त्वप्रपञ्चनं प्रति) वयस्य ! दीयतां दृष्टिरत्र ।

---

१६. **चन्द्र** अनुमन्यस्व यामि गृहं दुनोति सर्वमपि मम मन एतत् ।
मा कथं तव वियुक्ता लभे दुःखस्य विश्राममम् ।।

१७. **चन्द्र.** कथं मध्याह्नसमयो वर्तते ? ।

१८. लीनः पूर्वदिशि एष रविर्वहति निबिडसंतापम् ।
संप्राप्तोऽपरस्यां यदि कथमपि निर्वृतिं लभते ।।



Jain Education International      For Private & Personal Use Only      www.jainelibrary.org

नायं ललाटे कान्ताया वक्रः कस्तूरिकाशशी ।
सीमन्तकुल्यया निर्यल्लावण्यरसभाजनम् ।। २० ।। (अनुष्टुप्)

**तत्त्वप्रपञ्चनः-** नेयं भालतले तिर्यक् कस्तूरीतिलकावली ।
काममद्यपराजस्य शिप्रा लावण्यशीधुनः ।। २१ ।। (अनुष्टुप्)

**विजयः-** (पुरःस्थितदोलामवलोक्य प्रियां प्रति)
अये ! सेयं दोला तिलकनतशाखाप्रणयिनी,
लसन्मल्लीमालापरिमलमिलद्भृङ्गविरुतैः ।
करोतीवाह्वानं चरमदिवसाश्लेषजनितं,
स्मरन्ती तत्सौख्यं पुनरपि भवत्याः श्रमनुदे ।। २२ ।। (शिखरिणी)
तदियमध्यारोहणेण कृतार्थीक्रियताम् ।
(चन्द्रलेखा अध्यारुह्य दोलाविलाससुखमनुभवति)

**विजयः-** उदञ्चति कुचस्थलात् तरलतारहारावली,
गलन्ति गलकन्दलाद् विकचमल्लिकामालिकाः ।
समाह्वयति मन्मथं मुखरमेखलाघण्टिका,
कुरङ्गरमणीदृशः किमु न हारि दोलाक्षणे ।। २३ ।। (पृथ्वी)

**तत्त्वप्रपञ्चनः—** दोलान्तरालतरलं वदनं कृशाङ्ग्या
दूरोल्लसत्कुवलयं स्मितचन्द्रिकाभिः ।
बिभ्राणमङ्ककमलामलकावलीभिः
सत्यं विडम्बयति तं शशिनो विलासम् ।। २४ ।। (वसन्ततिलका)

**चन्द्रलेखा-** (चन्द्रशिलातलप्रतिबिम्बितां निजप्रतिकृतिं निरीक्ष्य सेर्ष्यम्)
[१९]दूरं चत्ते वि नगे तुह दइया मुयइ नेय मह पासं ।
सग्गं पत्ते वि खरे न हु मिल्लइ दाम्वणं पिट्ठिं ।। २५ ।। (आर्या)
(तत्क्षणमवतीर्य द्रुतपदं क्रामन्ती निजसद्मसम्मुखं गमनं नाट्यति)

**विजयः-** (अञ्चलेऽवधार्य)
सततं मामनुरक्तं त्यक्त्वा सपदि क्व यासि मदिराक्षि ! ।
अनुकूले प्रतिकूलं कुर्वन्ननु कः सुखी लोके ? ।। २६ ।। (आर्या)
(चन्द्रलेखा सरोषमनाकर्णयन्ती च हुं हुं वदन्ती तथैव गच्छति)

१९. दूरं त्यक्तेऽपि नगे तव दयिता मुञ्चति नैव मम पार्श्वम् ।
स्वर्गं प्राप्तेऽपि खरे न मुञ्चति दाम (बन्धनं) पृष्ठम् ।।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**तत्त्वप्रपञ्चनः—** चन्द्रलेखे ! नेयमविमर्शकारिता भवत्याः कदापि शोभां प्राप्स्यति ।

**चन्द्रलेखा -** (वलिततग्रीवमवलोक्य) [20]तत्तपवंचण ! दिट्ठावराहसहस्सा खुऽहमेवं समाचरेमि किं अविमरिसकारित्तमित्थ सव्वदा एसो अम्मज्जं य्येव मयि समाचरेदि ता सच्चं सप्पो बंभणो य अइपीणिदोवि अवज्ञकारी होइ ।

**तत्त्वप्रपञ्चनः-** मैवम् ।

अवद्यमनवद्यं स्यात् वाडवस्थितिमावहत् ।
ग्रासोद्ग्रासैरशुद्धोऽपि सिन्धुः कस्य न शुद्धये ॥ २७ ॥ (अनुष्टुप्)

अत्र त्ववद्यमपि न किञ्चिदस्य अन्यच्च शिक्षयामि भवतीम् ।

प्रणयं मनसि दधत्या प्रियस्य सह्यानि विप्रियशतानि ।
क्रियते यदि जलवासस्तन्मकरादेरुपद्रवः कलितः ॥ २८ ॥ (आर्या)

**चन्द्रलेखा-** (ईर्ष्याविरामं नाटयन्ती)

[21]न कया वि तुम्हाणं भासिदमहं अन्नधा करिस्सामि ।
*एसुणो वारं वारं तं दरिसयंतो न विरमिस्सदि ॥ २९ ॥ (आर्या)

(इति विवृत्य सम्मुखीभवति)

**तत्त्वप्रपञ्चनः-** (विजयं प्रति) अन्तर्गूढोपहासं इत ऊर्द्ध्वं न कदापीदृशं विरुद्ध-मस्यास्त्वया दर्शयितव्यम् ।

**विजयः** तथेति प्रतिपद्य, तां हस्ते गृहीत्वा लतागृहाद् बहिर्गन्तुमुपक्रमते । (दिशो निरीक्ष्य)

कथमस्ताचलचूलामधिरूढः सम्प्रति सहस्रांशुः । तथाहि-

सन्ध्यावधूं भजति भास्वति सानुरागा-
मीर्ष्यां परां कमलिनी विकटं दधाना ।
मीलत्सरोजमुकुलां तरुणी नु भृङ्गी-
गुञ्जामिषात् सकरुणं ननु रोदितीव ॥ ३० ॥ (वसन्ततिलका)

२०. तत्त्वप्रपञ्चन ! दृष्टापराधसहस्रा खलु अहम् एवं समाचरामि, किम् अविमृश्य-कारित्वमत्र, सर्वदा एषः अमर्याद एव मयि समाचरति, ततः सत्यं सर्पः ब्राह्मणश्च अतिप्रीणितोऽपि अवद्यकारी भवति ।

२१. न कदापि युष्माकं भाषितमहमन्यथा करिष्यामि ।
एष पुनः वारं वारं तं दर्शयन् न विरमिष्यति ॥

* एस उणो = एष पुनः । नात् पुनर्नादाईवा ८-१-६५. अतोडोविसर्गस्य ८-१-३७. लुक् ८-१-१०



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**चेटी-** [२२]भट्टिदारिये संझाखणो वट्टदि । ता सयलसुरलोयवंदणिज्जं देविं अजियबलं पूजेध । आसन्नाओ इमाओ आरामाओ कुसुमाइं अवचिणिय आणेमि त्ति ।

(तत्र प्रवेशं नाटयति)

**विजयः-** (तत्क्षण एव आरामान्तः तारं पूत्कारमा[क]र्ण्य सविस्मयम्) अयि किमेतद्घोरश्वापदाक्रान्तं कण्ठावरोधादनभिव्यक्तमारटति परित्राणायोत्सुकयति चास्मान् ।

तत्रैव ।

**[चेटी-]** [२३]एदस्सिं गिरिकन्दरे तुह भुयादंडप्पहासुत्थिदे
नीसंकं कुसुमाइ मे इह खणे चुंटंतियाए जवा ।
एसो सो विजइंदवारणमुहो सद्दूलदुट्ठोऽधुणा
दीणाए तुरिदं तए गुरुकिवं काऊण वारिज्जदु ॥ ३१ ॥

(शार्दूल.)

**विजयः-** (पुनराकर्ण्याबद्धपरिकरस्तत्त्वप्रपञ्चनं प्रति)
यावद्दुष्टमिमं हत्वा मोचयामि तपस्विनीम् ।
तावत् त्वया प्रियाभ्याशे भूयतामप्रमादिना ॥ ३२ ॥ (अनुष्टुप्)

इत्युक्त्वा शौण्डीर्यलक्ष्म्यलङ्कृतविग्रहः शार्दूलाभिमुखगमनेन निष्क्रान्तः ।

**चन्द्रलेखा -** (सभयं सदैन्यं च)
[२४]देवो सिरिअजियजिणो सासणदेवी य तस्स अजियबला ।
अणुकंपदु मं इण्हिं रक्खंती सावयाउ इह नाहं ॥ ३३ ॥

(आर्यागीति)

(आरामान्तः)

---

२२. **चेटी -** भर्तृदारिके सन्ध्याक्षणः वर्तते । तस्मात् सकलसुरलोकवन्दनीयां देवीमजितबलां पूजयत । आसन्नात् अस्मादारामात् कुसुमान्यवचित्यानयामि, इति ।

२३. एतस्मिन् गिरिकन्दरे तव भुजादण्डप्रभासुस्थिते
निःशङ्कं कुसुमानि मे इह क्षणे चिन्वत्या जवात् ।
एष स विजयेन्द्रवारणमुखः शार्दूलदुष्टोऽधुना
दीनायाः त्वरितं त्वया गुरुकृपां कृत्वा वार्यताम् ॥

२४. देवः श्रीअजितजिनः शासनदेवी च तस्याजितबला ।
अनुकम्पतां मामिदानीं रक्षन्ती श्वापदादिह नाथम् ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

[चेटी -] [२५]हा हा एस पयंडो अगणंतो जीवियं पि मुहविवरे ।
निवसइ छुरियाहत्थो अंतयसरिसस्स दुट्ठस्स ॥ ३४ ॥ (आर्या)

**चन्द्रलेखा** - (श्रुत्वा सकम्पम्) [२६]अहो महंतो पमादो वट्टदि । (तत्त्वप्रपञ्चनं प्रति) ता तुम्हे वि पसादं कडुय अणुगच्छद पियं जेण अयाले मह वेहव्वं न हवदि । जदो –

[२७]सूरो वि हु एक्कंगो कह साहइ वंछियं (सयं) कज्जं ।
पिच्छ नहंगणभूमिं अरुणसहायो परिक्कमइ ॥ ३५ ॥ (आर्या)

[२८]तदो सव्वधा अनुगिन्ह मं तुमं नियवयस्साणुगमणेन ।

**तत्त्वप्रपञ्चनः**- (स्वगतम्) यद्येवमपि स्थिते नैनमनुसरामि तदा प्रियस्य कुतश्चित् प्रमादात् तत्र अत्याहिते संवृत्ते गुरूणां किमुत्तरं दातुं शक्नोमि । अथास्या एवं मुक्तायाः किमपि स्यात् ततः किं कार्यम् ? भवतु द्वयोरपि कार्ययोः युगपदापादने गरीयसि प्रयतितव्यम् । तन्म......(अत्र १०६ तमं पत्रं त्रुटितमस्ति ।)

[**विजयः**- (स्वगतम्)]

[सिंहो] हतः सपदि रक्षितमायुरस्या
मित्रं हितं निकटवर्त्तिकृतं प्रियायाः ।
स्थानेऽपि तत्र गमनाय समुद्यतोऽस्मि,
तत् किञ्चिदस्ति न भयं मम दुर्निमित्तात् ॥३६॥ (वसन्ततिलका)

(सम्मुखमागच्छन् मित्रमवलोक्य सविषादम्) हा हतोऽस्मि हतविधिना यदयं तां विमुच्य इह समायातः सर्वथैव गता सा कथं पुनरधिगम्या (खेदं नाटयति सगद्गदं वदति च) अयि ! ऋजुहृदय तत्त्वप्रपञ्चन ! कुतस्तां विहाय मामनुगतोऽसि ।

---

२५. हा हा एष प्रचण्डः अगणयन् जीवितमपि मुखविवरे ।
निवसति छुरिकाहस्तः अन्तकसदृशस्य दुष्टस्य ॥

२६. अहो महान् प्रमादो वर्त्तते ।.... तस्मात्
यूयमपि प्रसादं कृत्वा अनुगच्छत प्रियं येन
अकाले मम वैधव्यं न भवति । यतः

२७. सूरोऽपि खलु एकाङ्गः कथं साधयति वाञ्छितं(स्वकं)कार्यम्
पश्य नभोऽङ्गणभूमिमरुणसहायः परिक्रामति ॥

२८. ततः सर्वथा अनुगृहाण मां त्वं निजवयस्यानुगमनेन ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**तत्त्वप्रपञ्चनः-** तत्रैव तिष्ठति सा, तदुपरोधाच्चेट्या आर्त्तभाषिताच्च व्याकुलहृदयस्त्वां प्रपन्नोऽस्मि, न शङ्कनीयम् । इदानीमेव आयातोऽस्मि । सम्प्रत्येव तत्र संप्राप्तः । (वदन् परिवृत्त्य त्वरितगतिं नाटयति)

**विजयः-** सर्वथा दुरापा प्रिया सम्प्रति ।

**तत्त्वप्रपञ्चनः-** (गत्वा शून्यं स्थानमवलोक्य) हहा मुषितोऽस्मि मन्दभाग्यः, किं करवै ? (तत्रैवोपविश्य जानुद्वयान्तर्मुखं निक्षिपन् वैलक्ष्यं नाटयति)

**विजयः-** (तं तादृशं दृष्ट्वा सानुतापम्) सर्वथा गतैवाद्य दयिता, क्व प्राप्तव्या ? कथं तां विना क्षणमपि प्राणितव्यम् । नूनं निरनुबन्धः कर्मानुबन्धः । अन्यथा –

एकाकिनी कथमगात् कुसुमानि हर्तुं
चेटी कथं मृगरिपुर्वसतौ समेतः ।
कान्तां समर्प्य कथमस्य गतस्तदाऽहं
त्यक्त्वा तु तां कथमयं श्रयति (स्म चा)स्मान् ।। ३७ ।। (वसन्ततिलका)

(मित्रं प्रति)

ऋजुहृदय ! किमेतज्जातमस्मासु कष्टं, हृदयभिदुरमेवं सावधानेष्वपीह ।
अविरतरतिरित्थं मामयं पीडयित्वा,
किमपि फलमवाप्ता विश्वकृत्तन्न विद्मः ।। ३८ ।। (मालिनी)

(इतस्ततोऽवलोक्य)

यदि कथमपि जातस्तापसत्वाज्जडोऽयं
भगवति वनलक्ष्मि ! त्वं किमासीरुदासा ।
यदिह तनुजकल्पस्तत्र वध्वा समाया-
मिति विघटितवत्यां ज्ञापितोऽप्येष नाहम् ।। ३९ ।। (मालिनी)

(पुनः स्मृतिमभिनीय सविषादम्)

एषा मृगी वलितकन्धरमीक्षमाणा
हंसाङ्गनाऽथ सविलासमियं चलन्ती ।
तं पंचमं पिकवधूरियमुद्गिरन्ती
विस्मारन्त्यहह तां न कदाप्यमूनि ।। ४० ।। (वसन्ततिलका)

(अनुसंहितप्रियामुद्दिश्य)

नीलीरागमकृत्रिमप्रियसखं विश्वासलीलागृहं
चेतोजन्मकलागुरुं नवनवप्रीतिप्रपञ्चास्पदम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्वच्चित्तानुगतं सुखस्य परमां विश्रामजन्मक्षितिं
मुक्त्वा सम्प्रति मां मृगाक्षि ! भवती बध्नाति कुत्र स्थितिम् ।। ४१ ।।
(शार्दूल)

**तत्त्वप्रपञ्चनः-** (सचिन्तम्) सर्वथा महतीयमनर्थपरम्परा । तत् किं मयाऽप्यनेनेव शोकपरायणेन भवितव्यम्, उत उद्युक्तेन । (क्षणं विमृश्य)

आपद्‌गते प्रणयिनि प्रलयं गतेषु
पुण्येषु ही गुरुषु दूरतरं गतेषु ।
पुंस्त्वानुगव्यवसितौ स्थितमानसस्य
किञ्चिद् विधास्यति विधिर्न तदत्र वेद्मि ।। ४२ ।। (वसन्ततिलका)

(साभ्यूहम्)

विपुलमतेरपि कस्मात्, समजनि हृदये ममाद्य वैधुर्यम् ।
(क्षणं स्थित्वा)
यदि परममुष्य सौख्यात् प्रतिपद्ये स्वास्थ्यविभवेन ।। ४३ ।। (आर्या)

(ततः प्रविशत्याकाशयानेन मतिविभवः)

**मतिविभवः-** मा गाः खेदं क्वचिदपि न ते दूरतः सास्ति बन्धो !
पातालान्तर्वसति स रिपुर्योऽपहारं व्यधत्त ।
मार्गेऽमुष्मिन् कतिपयपदप्राप्य एवास्ति कूपो
दत्त्वा झंपां द्विजवर ! इह ध्वंसतां स्वं सपत्नम् ।। ४४ ।।(मन्दाक्रान्ता)

(इत्युक्त्वा तिरोदधे)

**तत्त्वप्रपञ्चनः-** अयि ! विजयेन्द्र ! श्रुतं भवता गगनान्तरवर्तिसिद्धवचनम् ।

**विजयः-** (तत्क्षणं मुक्तशोकः सोत्साहम्) सखे ! विस्पष्टमश्रावि ।
तत् किमद्यापि विलम्ब्यते । दर्शय मार्गम् । प्रवणोऽस्मि योद्धुम् ।

**तत्त्वप्रपञ्चनः-** (चिन्तां नाटयति) सखे ! नाद्यापि तत्र नेदीयसी गतिः, दारुणो विकटसञ्चारश्च खल्वयमन्धकूपः, तदुपायः कोऽपि महांश्चिन्तनीयोऽस्ति !

**विजयः-** यद्येवमस्ति ततस्तच्चिन्तने किं चिरयसि ? ।

**तत्त्वप्रपञ्चनः-** (स्मृत्वा) अस्त्युपायः । (इत्युक्त्वा ध्यानं नाटयति वदति च)
मित्रापदि गतेनाद्य, मित्रं पातालसंश्रय(यं) ।
स्मर्यतेऽत्र मया नागरूपं नोपैति किन्तु तत् ।। ४५ ।।
(अनुष्टुप्)



Jain Education International For Private & Personal Use Only www.jainelibrary.org

(ततः प्रविशति विकटविवरद्वारेण निर्गत्य पातालवासी कनकशू(चू)लनामा नागः)

**नागः-** पश्यामि मित्रमहमत्र किमार्त्तचित्तं
स्त्यानास्यमेतदधिकं किमु मित्र मित्रम् ।
सख्या तया विरहितं किममुं वनान्तं
तन्मा कथञ्चन विधिः प्रतिकूल एषु ॥ ४६ ॥ (वसन्ततिलका)

(उपसर्प्य) स्वस्ति भवते परमबान्धवाय, मुच्यतां मोहः संदिश्यतां कर्तव्यवस्तु ।

**तत्त्वप्रपञ्चनः-** (नेत्रे उन्मील्य प्रत्यभिज्ञाय) किं तदेव मित्रं क्षणान्तः सम्प्राप्तं वर्त्तते ? (सानुनयम्) अपरहृदयमभिवादये भवन्तं, कच्चित् कुशलं युष्मभ्यम् ।

**कनकचूलः-** श्रीशेषराजप्रसादात् सदैव सुखमस्मासु, परं भवानेवंविधः सम्प्रति दुनोति । तत् किमेतत् ? ।

**तत्त्वप्रपञ्चनः-** पातालवासी विकटाक्षनामा, द्विजोत्तमस्यास्य वधूं जहार ।
तदत्र कूपे विशतस्त्वयाद्य, पन्थाश्च कथ्यः स च दर्शनीयः ॥ ४७ ॥
(उपजातिः।)

**कनकचूलः-** पुराऽपि तावत् प्रहितेन मतिमसृणेन किञ्चित् ज्ञापितोऽभूवम् । एवमिति चेत् तदिदानीमेव त्वर्यताम् । यावदेनं प्रापय्य जयोत्सवकथया अभिनन्दयामि तावत् त्वया अस्यैव कूपस्य तटे स्थातव्यम् ।

विजयः सोत्साहं शकुनग्रन्थिं चेतसि बद्ध्वा संनह्यते, नागमनुसरति च ।

तत्त्वप्रपञ्चनः तथेति प्रतिपद्य उभौ विसृजति ।

(विजयः नागेन सह विश्रम्भालापान् कुर्वन् त्वरितपदं निष्क्रान्तः)

**चेटी -** (सानुतापम्, स्वगतम्) [२९]किं कदं अमुणियपरमत्थमेदेण कज्जं जं भट्टिदारिया एयागिणी कट्ठयरक्खसाउ अवहारिदा । एसो य विजइंदो सहत्थेणं य्येव दुट्ठसप्पस्स समप्पिदो । (प्रकाशम्)
[३०]भयवं फुडु अवियारिय कज्जमिमं अइमहंतमाचरियं ।
जं पढमं सो विहिणो दिन्ना एसो कलंतरे पच्छा ॥ ४८ ॥ (आर्या)

२९. किं कृतं अज्ञातपरमार्थमेतेन कार्यं यत् भर्तृदारिका एकाकिनी कष्टदरक्षसा अपहारिता । एष विजयेन्द्रः स्वहस्तेन दुष्टसर्पस्य समर्पितः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**तत्त्वप्रपञ्चनः-** (विहस्य) (मुग्धा वराकी न वेत्ति परमार्थमित्यवधीर्य परिक्रम्य च । कूपसविधे उपविशति । विचिन्त्य क्षणं स्थित्वा) अयि किमद्यापि चिरयति नागः । (इतस्ततो विलोकयति ।)

**चेटी -** (कूपान्तराद् धगद्धगिति तेजसः स्फुलिङ्गान् कल्पान्तवह्निकल्पानुद्गच्छतो विलोक्य सचकितम्) [३१]भयवं किं संपदं तुम्हाण महयसंहारवारओ वट्टदि ? (तेजःप्रभावमसहमाना निपतति)

**तत्त्वप्रपञ्चनः-** (तत्तादृशं दृष्ट्वा सहर्षम्)

कृतकृत्येन मित्रेण तेजःपटलधारिणा ।
तं तमिस्रसमं हत्वोत्पत्यते वडवामुखात् ॥ ४९ ॥ (अनुष्टुप्)
स्निग्धान्धकारकलिता काचबद्धेव मेदिनी ।
तेजसां पटलेनैषा क्रियते कनकप्रभा ॥ ५० ॥ (अनुष्टुप्)

[ततः प्रविशति कनकचूडः]

**कनकचूडः-** (समन्ताद् विलोक्य) सानन्दं वर्द्धाप्यसे मित्रस्य जयोत्सवेन ।

**तत्त्वप्रपञ्चनः-** (सहर्षम्) किं किं समजनि ?

**कनकचूडः-** किं विस्तरेण ? तं दुष्टं पराजित्य तेन सा समासादितेति । कथं कथमिति चेत् तदिदमाख्यायते ।

दृष्ट्वा कूपमगाधं, धरान्त[रा]वर्त्म मय्य(यि)निर्दिशति ।
सहसैव दत्तझंपः प्राप गृहं द्विजवरस्तस्य ॥ ५१ ॥ (आर्या)
ततस्त्वरितं मयानुगम्य तस्मिन् रक्षसि दर्शिते एवमुक्तवान् ब्रह्मवीरः ।
रे पाप ! प्रकटं मम प्रियतमां हत्वा समैष्यद्यदि
प्रख्यातो भुजविक्रमस्तव तदा लोकेऽभविष्यत्परम् ।
यत्त्वन्यत्र मयि स्थिते सुहृदि च प्राप्ते मदन्तं भवा -
नेवं कर्म समाचरत्तदुचितं नक्तञ्चर ! त्वत्कुले ॥ ५२ ॥ (शार्दूल.)

सम्प्रति च कृतान्तमुखमायातेन जन्तुना यत् क्रियते तद् विधीयतामिति तर्जितेन रक्षसा सरभसमुत्थाय करकलितकरवालेन सम्मुखमुपक्रान्तम् ।

---

३०. भगवन् ! स्फुटमविचारितकार्यमिदमतिमहदाचरितम् ।
यत् प्रथमं सा विधेः दत्ता एष कलान्तरे पश्चात् ॥

३१. भगवन् ! किं साम्प्रतं युष्माकं महत्संहारवारकः वर्तते ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**तत्त्वप्रपञ्चनः-** ततः किम् ?

**कनकचूडः-** शृणु यत् ।

घोरैः खड्गप्रहारैः करकलितमुभौ खेटकं खण्डयन्तौ
रक्षन्तौ पृश्चघातीं वपुषि नवनवं तेनतुः शस्त्रचित्रम् ।
उत्प्लुत्याथ द्विजेन्द्रः सपदि भुजमदाद्दक्षिणं राक्षसस्य
प्रीतः कान्तां गृहीत्वा भुजगयुवतिभिर्गीतकीर्त्तिः समेति ॥ ५३ ॥
(स्रग्धरा)

**विजयेन्द्रः-** (क्षणान्तस्तथैव प्रियया दत्तहस्तावलम्बः प्रविश्य अभितो निरीक्ष्य तत्त्वप्रपञ्चनं प्रति अङ्गुल्या कनकचूलं दर्शयन्)

साधिते ऽस्मिन् कार्ये सर्वोऽप्यमीषां प्रभाव इति ।

(अत्र ११६ तमं पत्रं त्रुटितमस्ति ।)

(उद्बुध्य तत्तादृशं दृष्ट्वा सानन्दम्)

**(चेटी ?)** – [३२]अहह महापहावो तत्तपवंचणस्स जो सव्वहा विहडियं पि एयं पुणोवि एवं संधेदि । (उपसर्प्य पादयोः पतति) खमिज्जदु मे सच्छंद-भासिदाओ अवराहं ।

**तत्त्वप्रपञ्चनः-** (विहस्य) न कोऽप्यपराधस्ते केवलमज्ञानतैवापराध्यतीति । (वदन् पृष्ठं करेण स्पृशति ।)

**विजयेन्द्रः-** प्रिये ! निशीथसमयः प्रवृत्तो वर्त्ततेऽतः सौधतलमलङ्क्रियताम् (इति – वदन् प्रियां हस्ते विधृत्य तत्त्वप्रपञ्चनेन समं सपरिवारः परिक्रामति, क्षणान्तः सोपानमलंकुर्वाणः सौधमधिरोहति ।

तत्त्वप्रपञ्चनः कोणान्तर्विजने समुपविश्य ध्याननाटितकेन बोधप्रदां देवतां प्रत्यक्षीकृत्य गुर्वादिष्टं निवेदयति ।)

**बोधप्रदा-** तथेति प्रतिपद्य विजयाङ्गमञ्चति ।

(अत्र ११८ तमं पत्रं त्रुटितमस्ति ।)

दवतमसविटंकान्निर्गता घोरकूपात् ।

३२. अहह महाप्रभावः तत्त्वप्रपञ्चनस्य यः सर्वथा विघटितमपि एतत् पुनरपि एवं संदधाति । क्षाम्यतु मम स्वच्छन्दभाषिण्या अपराधम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

पतिपतिसखमुक्ताप्युद्धृता श्वापदेभ्यः
कथमिव तदमुष्माज्जीवितं धारयिष्ये ॥ ५४ ॥ (मालिनी)

(चन्द्रातपकदर्थिताङ्गी कलितबहलवैधुर्या सोन्मादम्)

[३३]गुरुसन्निहिगमणमिसा पियजुवइं नाह पत्थिदो रंतुं ।
ता तिस्सा तणुफंसा दूसियदेहं तुमं न कामेमि ॥ ५५ ॥ (आर्या)

(इति परावृत्य तिष्ठति)

**चेटी** - [३४]भट्टिदारिये कहिं सो पिओ जदो एवं चिट्ठसि ।

**चन्द्रलेखा** - [३५]इह य्येव पुरदो वट्टदि (निपुणं निरूप्य सवैलक्ष्यं) हला भुल्लम्हि (सोन्मादं चेटीं प्रति) पिहेहि दुवारं, मा कहउ ण निवारिदो विसमो हि सो ता किं कादव्वं (क्षणेन विरहव्यथामनुभवन्ती विघटमानं मानं प्रोत्साहयन्ती भर्त्तरि सपत्न्यां च साभ्यसूयं संस्कृतमाश्रित्य) देव **याहि तातमान देवया हि तातमान** हे मान मा श्लथीभूयास्त्वं प्रियप्रेयसीः प्रियोऽपि मया त्वद्बलान्मुक्त इति देवय मां क्रीडय मा गा दूरम् । यत आहितातमारात्रिर्देवे देवशर्मणि न तु मयि कथमन्यथा मां सतीमपि न पश्यति तामेव पश्यति विद्याधरीं च चतुरां मुक्त्वा घटदासीं भूमिगोचरां रमते एवं चाहितान् क्षिपसि । हे अतमानमाना देवेति चाटु न तवास्मिन् समये अन्यत्र यातमाशास्महे यत उपस्थिता तमस्काण्डे शालिनी केकारवमुखरितदिङ्मुखी(खा) कृतस्तनिता घोराट्टहासा विलसद्विद्युल्लता-कृतफूत्कारा प्राप्तावकाशा त(ता ?) मेव मामाहितातमा नाम राक्षसी भीषयते इति कथं त्वां विना विस्तृता सती देवे क्रीडयामि । सन्निहिते तु त्वयि तां विस्तृता सति देवेऽहं बुद्ध्वा प्रियतममायान्तं दृष्ट्वा आह-**नाथ यात मान तात देव नाथ यातमानतात देव तात** । तात हे नाथ स्वेच्छाचारी भवान् तथापि यात यूयमा आत आगच्छ अतता अद्यापि ता

---

३३. गुरुसंनिधिगमनमिषात् प्रिययुवतीं नाथ प्रस्थितः रन्तुम् ।
तस्मात् तस्याः तनुस्पर्शाद् दूषितदेहं त्वां न काम्यामि ॥

३४. भर्तृदारिके कुत्र सः प्रियः यतः एवं चेष्टसे ।

३५. इहैव पुरतः वर्तते । हला भ्रान्ताऽहम् ।
पिधेहि द्वारं, मा कथयतु, न निवारितः विषमो हि सः ।
तस्मात् किं कर्त्तव्यम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

(विस्तृतासीति तनुतानवं नास्ति) तदेव तव स्खलितं स्मरन्ती अथ पुरोषा (पुरोगा) अहं अहङ्कारशालीति गन्तुं नेशे तर्हि आत आगच्छ नाथ उपतापय मां मा नता (भ) तव अतति गच्छति न चैतदबलाकदर्थनमुचितं, देवता हि भवान् इति सर्वथा अत गच्छ सत्कारपूर्वकं व्यापारितोऽसि किञ्चित् स्थिरीभूतमानमुपलभ्य सञ्जातात्मसम्भावना पुनराह-

शेष मान शेष यात, यात शेष यात देवि
देवि यात देवि मान, मान देवि मानशेष ॥ ५६ ॥

(श्लोक)

हे मान क्षुभ्नादित्वाल्ल(ण्ण) त्वाऽभावः शीलं हि तव पृथक्करणे तव महिम्नैव प्रियं विप्रियीकृत्य त्वां क्रीडयामि अस्खलितमहिमा हि भवानिति प्रियप्रेयसीं प्रियतमं शेषयातभया इत शेषपादे व्यभिधानयामया सपत्न्या सह सर्वदा कुटिलया वक्रभणितिरूपया प्रियस्य प्रेमोत्पादयति नतु सौभाग्यमहिम्नाऽनासा (भासा) इति अत तत्र गच्छ अ(ा) विष्णो द्या(व्या)पकत्वात् त्वं सर्वत्र यासि देविनः क्रीडाशीलस्य मम प्रेयसो देव्या वा खण्डनाय खण्डितो ह्यसौ मां सपत्न्या सह पादपतनादिनाऽनुनेष्यति वियात प्रगल्भो भवानस्मिन् कर्मणि देविनमात्मानं मनुते तं देविमानं देवशर्माणं प्राणमत् यतो मानधना मनस्विन्यो भवं(ति) । (१२३ तमं पत्रं नास्ति ।)

तथा हि – अत्र शेषयातदेविमानेति पदचतुष्टयं श्रीव(त्स)बंधरूपेण संस्थाप्य शेषपदं मानयाताभ्यां सम्बध्यते यातेति शेषदेविभ्यां देवीति यातमानाभ्यां मानेति देविशेषाभ्याम् इति षोडशपात्रप्रतिबद्धो नाट्यारम्भो नाम बन्धविशेषो [१]**दण्डरासक** इति **भरतमुनिः** नाट्यमानिनीति छन्दसा कृतः । समा – (१२४/२ तमं पत्रस्य द्वितीयपृष्ठम् - १२५/१ तम पत्रस्य प्रथमपृष्ठं घर्षिताक्षरमस्ति, अतो न वाचनक्षमम् ।)

१. टिप्पणी – राजशेखरविरचितायां कर्पूरमञ्जर्यां, दण्डरासकस्य वर्णनम् –
परिब्भमंतीउ विचित्तबन्धं इमाउ **दोसोलहणच्चणीओ** ।
खेलंती तालाणुग अप्पआओ तुहंगणे दिसइ **दंडरासो** ॥ ११ ॥
समं ससीसा, समबाहुहत्था, रेहा विसुद्धं अवराउ देंति ।
पंतीहिं दोहि लअतालबंधं परोप्परं साहि मुहीउ चल्लि ॥ १२ ॥
चतुर्थजवनिकान्तरे.



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**सखी-**(एवमेव) पश्य –

प्राचीमुखं भजति कुङ्कुमरागलक्ष्मीं
ज्योत्स्नां जहाति परमामयमिन्दुरद्य ।
एतेऽपि बिभ्रति हि हीनमहः प्रदीपा-
स्तत्कृत्यकर्मणि कथं न समुत्सुकाऽसि ॥ ५७ ॥        (वसन्ततिलका)

**चन्द्रलेखा** - एवं क्रियते इति ।

(निष्क्रान्ताः सर्वे ।)

॥ वैताढ्यारोहणो नाम तृतीयोऽङ्कः ॥



Jain Education International    For Private & Personal Use Only    www.jainelibrary.org



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# चतुर्थोऽङ्कः

पात्रसूचिः

१. बोधश्रीः- आज्ञासिद्धसेविका ।
२. मनोगतिः- आज्ञासिद्धसेविका ।
३. चन्द्रिका- आज्ञासिद्धसेविका ।
४. निजदृष्टिः- आज्ञासिद्धसेवकः ।
५. तात्त्विकी देवता ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

[ततः प्रविशति बोधश्रीः]

**बोधश्रीः-** प्रेषिताऽस्मि गुरुभिरुज्जयिन्यां महाराज्ञ्या देविप्रभायाः समीपम् "त्वया तु तत्र गत्वा वैताढ्यादायातस्य विजयेन्द्रस्य भर्तुरागमनेन सा वर्द्धापनीया"। तत् मम प्रत्यहं गुर्वादेशप्रापणेन वैयग्र्यादात्मावबोधक्षणो न वर्त्तते, श्रमश्च महान् वपुषि, तदत्र अशोकतरुच्छायायां मुहूर्त्तमेकमुपविश्य श्रमापनोदं विदधामि (इत्युपविशति)

प्रियविश्लेषसन्तापमध्वखेदातपभ्रमिम् ।
दृष्टमात्रो हरत्येष [अशोकः शोकनाशनः] ॥ १ ॥ (अनुष्टुप्)

(इत्यशोकप्रथान्तः तदध्वश्रमापनोदं विदधत् निश्चितमिष्टागमजनितसुखमपि वितरिष्यति, तदैव सम्मुखमायान्तीं **मनोगतिं** दृष्ट्वा सानन्दम्) अयि मनोगते ! कुतः सम्प्रत्यागम्यमानमास्ते ।

**मनोगतिः-** [1](स्वगतम्) कहमेसा बोधसिरी वयरक्खियाए दुदीयहियय़ं गुरूणं च महापसायभायणं, ता किं कारणमिहागमणे मुणिदव्वं, भोदु आलावाओ सव्वं पयडीहविस्सदि (सप्रश्रयम्) अज्जे बोहसिरी एसा मणोगई पणमंती दिट्ठीया संभाविज्जदु । (इति प्रणमति)

**बोधश्रीः-** स्वस्ति भवत्यै, किं साधितगुवदिशा ?

**मनोगतिः-** [2]अध इं ।

**बोधश्रीः-** तत्त्वप्रपञ्चनेन तेन तेनोपायेनाकृष्य समानीते विजयेन्द्रे पश्चात् कीदृशीमवस्थामभजच्चन्द्रलेखा यस्या वर्त्तमानायास्तद् गुर्वादिष्टमनुष्ठितम् ।

**मनोगतिः-** [3]किं कहिज्जदि, सुणादु होदी, सविधवट्टिणीणं पियसहीणं पुरदो जं भणेदि ।

---

१. **मनो.** कथमेषा बोधश्रीः व्रतरक्षिताया द्वितीयहृदयं, गुरूणां च महाप्रसादभाजनं, तस्मात् किं कारणमिहागमने ज्ञातव्यं, भवतु, आलापतः सर्वं प्रकटीभविष्यति । आर्ये एषा मनोगतिः प्रणमन्ती दृष्ट्या संभाव्यताम् ।

२. **मनो.** अथ किम् ।

३. **मनो.** किं कथ्यते, शृणोतु भवती सविधवर्त्तिनीनां प्रियसखीनां पुरतः यद् भणति ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

*[४]कइया सहि सो भत्ता गओ मं मिल्लिऊण सुसिणिद्धं ।
अज्जित्ति कहिद अज्जे कइ दियहा होंति पुच्छेइ ॥ २ ॥ (आर्या)

अन्नं च –

[५]विरहानलतत्ताए तिस्सा चंदो रवी य सारिच्छो ।
कामंधाए य पुणो रयणीदिवसो य एक्को व्व ॥ ३ ॥ (आर्या)

**बोधश्रीः-** कामं कामाभिभूता वराकी न किञ्चिदात्मन्यवबुध्यते, कष्टशक्या सा भवादृशीभिश्चेतयितुं, तत् कथं भविष्यति ?

**मनोगतिः-** [६]पढमं य्येव गुरूहि आदिट्ठं जइ कहंचिय तुम्हारिसाणं सा अगोयरे वट्टदि ता सिद्धासमादो अप्पावबोहो तहिं नेदव्वो तदो मए तिस्सा विसमं सरूवं दट्ठूण अणालवंतियाइ वि तं चत्तूण आणीदो तहिं अप्पावबोहो ।

**बोधश्रीः-** युक्तमिदं सर्वं भवत्यात्मावबोधेन ।

प्रेम्णो धनस्य पठितस्य सुरूपतायास्तावन्मनः समधिरोहति हन्त मोहः ।
एतद्विपाटनपटुर्जगति प्रसिद्धो, नात्मावबोधसुभटः समुपैति यावत् ॥ ४ ॥
(वसन्ततिलका)

तत् किं कृतमनेन ?

**मनोगतिः-** [७]तं कदं जेण अज्जवि मणो मह विंभयं वहदि, जं आयादमेत्तेण वि

* तुलना - कइआ गओ पिओ 'अज्ज पुत्ति' अज्जेण कइ दिणा होंति ।
एक्को एद्दहमेत्ते भणिए मोहं गआ बाला ॥ सरस्वतीकंठाभरण पृ. ६४३

**छायाः** कदा गतः प्रियः, अद्य पुत्रि अद्येति कतिदिनानि भवन्ति ।
एकम् एतावन्मात्रं भणित्वा मोहं गता बाला ॥

४. कदा सखि ! स भर्ता गतो मां मुक्त्वा सुस्निग्धाम् ।
अद्य इति कथयित्वा आर्ये कति दिवसा भवन्ति (इति) पृच्छति ॥

५. विरहानलतप्तायाः तस्याः चन्द्रः रविश्च सदृक्षः ।
कामान्धायाश्च पुनः रजनीदिवसश्च एक इव ॥

६. प्रथमं चैव गुरुभिः आदिष्टं यदि कथंचित् युष्मादृशानां सा अगोचरे वर्तते ततः सिद्धाश्रमात् आत्मावबोधः तत्र नेतव्यः तदा मया तस्या विषमं स्वरूपं दृष्ट्वा अनालपन्त्या एव तां त्यक्त्वा आनीतः तत्र आत्मावबोधः ।

७. **मनो.** तत् कृतं येन अद्यापि मनः महद् विस्मयं वहति, यत् आयातमात्रेणापि सहस्र-किरणेन मोहतिमिरम् अपसार्य तस्याः नलिन्याः इव बोधविकासः वितीर्णः । ततः प्रभृति तस्य पददर्शनेन इष्टदेवताध्यानपरा वासरं सकलमपि निर्गमयति रजन्यां पुनः तस्मिन् निजाश्रमं गते अतिक्लेशमावहति प्रेषयति विविधान् अनङ्गलेखान् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

सहस्सकिरणेण मोहतिमिरं ओसारिय तीए नलिणीए व्व बोहवियासो वितिन्नो । तदो पभुदि तस्स पयदंसणेण इट्ठदेवदाझाणपरा वासरं सयलं पि णिग्गमेदि ।

रयणीहिं पुणो तस्सिं नियासमं गदे अइकिलेसमावहदि, पेसयदि विविहाओ अणंगलेहाओ ।

**बोधश्रीः-** ईदृश एव प्रियविरहः । परं तत्कृतमात्मावबोधेन यदन्यो मनसाऽपि धर्तुं न शक्तः ततोऽस्यापि विजयेन्द्रस्य गुरोः परमोपदेशमुद्वहतो ऽपि तदनुध्यानविक्लवमानसस्य वनान्तःस्थितस्य एष व (ऽव)बोधं तं च दिव्यं लाभमुत्पादयितुं यदि समर्थः स्यात् ।

**मनोगतिः-** [८]अय्ये ! एवं पि महा(ह) गुरूहिं संदिट्ठं आसि जं तस्स वि विखेवहरणेण असमफलवियरणाय तए सो पेसिदव्वो, तदो मा कहं गदो तत्थ हविस्सदि ।

**बोधश्रीः-** प्रियं तर्हि ।

**मनोगतिः-** [९]तुम्हेहिं कह चलिदव्वं ?

**बोधश्रीः-** किं कथ्यते जानात्येतद्भवत्यपि स विजयेन्द्रसूनुः शिशुरपि तेन तेनोपायेन श्रीमदुज्जयिन्यां राज्यश्रियमासादितः **रत्नपुञ्ज**ेति संज्ञया जगति प्रसिद्धः । परमियत्यपि कृते कस्मादपि कार्याद्गुरवो नाद्यापि विरमन्ति । यतः संसारमायाप्रपञ्चेन वैताढ्याद्विप्रकृष्येहानीतस्य कस्या अपि महासिद्धेः साधनाय उद्योगीकृतस्यास्य द्विजेन्द्रस्यागमनवर्द्धापनव्याजेन देविप्रभासमीपे तस्य राज्ञः पित्रा सह सङ्गमाय गुरुभिः प्रेषितास्मि ।

**मनोगतिः-** [१०]सव्वं मह तत्थ गदाए एदं संवुत्तं, ता गुरूण सव्वंगेण वि एयस्सिं दियवरे महापसादो वट्टदि नूणं सपुत्तो सकलत्तो य सच्चं अभिणंदिस्सदि त्ति मुणेमि ।

---

८. **मनो.** आर्ये ! एवमपि मम गुरुभिः संदिष्टमासीत् यत् तस्यापि विक्षेपहरणेन असमफलवितरणाय त्वया स प्रेषयितव्यः तदा मा कथं (कथंचित्) गतः तत्र भविष्यति ।

९. युष्माभिः कथं चलितव्यम् ?

१०. **मनो.** सर्वं मम तत्र गताया एतत् संवृत्तम्, तावत्, गुरूणां सर्वाङ्गेणापि एतस्मिन् द्विजवरे महाप्रसादः वर्तते नूनं सपुत्रः सकलत्रश्च सत्यमभिनंदिष्यतीति जानामि ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

[इत्युभे निष्क्रान्ते]

**विष्कम्भकः ।**

(ततः प्रविशति यथानिर्दिष्टो वनान्तस्थस्तत्त्वप्रपञ्चनेन सह विजयेन्द्रः)

**विजयेन्द्रः-** (स्मरणमभिनीय) –

सिद्धिं दिशन्नपि ममाद्य गुरोः प्रसादः
कालुष्यमर्पयति मे रभसाद्वियोगात् ।
उद्योतयन्नपि विशालगृहान्तरालं
मालिन्यबद्धमतिदीपशिखाप्ररोहः ॥ ५ ॥ (वसंततिलका)

**तत्त्वप्रपञ्चनः-** पूज्यपादैरेवममरत्वपदवीप्राप्तये भवतश्चिन्त्य(मानोऽस्त्युपायः)अपि (तद)धिगतुं [मुञ्च] व्यामोहं मुग्ध ! यथा सम्प्रति तैर्यतितुं प्रारब्धमस्ति तथानेकशस्तादृशीः [सिद्धीः] प्राप्स्यसि तन्मा धासीर्वैधुर्यम् । किं न श्रुतम् ? ।

व्रजत्यधोऽधो यात्युच्चैर्नरः स्वैरेव कर्मभिः ।
खनितेव हि कूपस्य, प्रासादस्येव कारकः ॥ ६ ॥ (अनुष्टुप्)

तस्मात् सर्वमिदं विस्मार्य गुर्वादेशपरायणेन भवितव्यम् ।

**विजयेन्द्रः-** वयस्य ! जानामि सर्वं परमित्यर्द्धोक्ते (तथा स्तम्भं) नाटयति ।

**तत्त्वप्रपञ्चनः-** (स्वगतम्) कथंकारं कर्त्तव्यकर्मणि प्रवर्तिष्यते, निबिडो ग्रहस्तस्यामस्य, तदयमेकहेलया निषिध्यमानः सर्वथा विनंक्ष्यतीति पयःपूरपूर्यमाणस्तडाग इव परीवाहविमुच्यमानः क्षेममावहति । (प्रकाशम्)

तथैव कान्तया युक्तः स्थिरस्कन्धो भविष्यसि ।
अन्तरैतद्वियोगान्धकूपान्तस्तेन मा पतः ॥ ७ ॥ (अनुष्टुप्)

**विजयेन्द्रः-** (सप्रत्यासम्) अयि ! तां पुनरपि प्राप्स्यत्ययं जनः ।

**तत्त्वप्रपञ्चनः-** श्रूयतां गुरुप्रसादाद् यद् यद् अधिगमिष्यसि ।

गन्तव्यं पुनरेव तत्र शिखरे सैवाभिनन्द्या प्रिया
पुत्रस्योर्जितचक्रवर्त्तिपदवीमातन्वतः क्ष्मातले ।
कर्त्तव्यं वपुषः स्थिरत्वमसमा देविप्रभा सा सती
सिद्धिं लब्धवताऽथ पट्टमहिषी कार्या त्वयान्तःपुरे ॥ ८ ॥
(शार्दूलविक्रीडित)



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**विजयेन्द्रः-** (सानन्दं सविस्मयं च) कः पु प्र०
(१३३ तमं पृष्ठं त्रुटितमस्ति ।)
........ स्ते रामचन्द्रप्रमुखा नरेन्द्राः ॥ ९ ॥

**विजयेन्द्रः-** (स्वगतम्) न कोऽपि गुरूणामहमिव प्रसादपात्रम् । य एवमभितोऽनुगृहीतः (प्रकाशम्) वयस्य ! साऽपि पुत्रान्तिकमलङ्करोति ।

**तत्त्वप्रपञ्चनः-** अथ किम् । (नेपथ्ये)

[११]मा पत्तिज्ज नराणं, अणुराए अवररत्तचित्ताणं ।
अइरत्तो वि दिणेसो पिच्छ तुमं दिणसिरिं मुयइ ॥ १० ॥ (गीति)

तत्रैव –

[१२]कित्तियकालं कुसलं गरुयाण वि परधणेसु लुद्धाणं ।
दियरायस्स वसूणं हरणे हरिणो वि किं(नु) फलं[जादं] ॥११॥ (आर्या)

**विजयेन्द्रः-** (कथं प्रदोषसमयः ? प्रियानुस्मरणनाटितकेन तत्त्वप्रपञ्चनं प्रति) अवधारयतु भवान् किञ्चिन्मदुक्तम् । गुरुप्रसादात् पुत्रकलत्रसङ्गमेऽपि जाते तां विना किं सुखमस्माकम् । नूनमीदृशप्रदोषसमयरजनीप्रभृति विकटकालगहननिपतिता त्यक्ष्यति वराकी सा प्राणान् । अथवा –

तनयस्य च पत्न्याश्च, सङ्गमेऽपि सुखाय सा ।
संसारफललुब्धस्य, यथाऽर्थो धर्मकामयोः ॥ १२ ॥ (अनुष्टुप्)

ततः-

क्षणमपि तां विना नैव जीवितं धर्तुमुत्सहे ।
(उदितमिन्दुमवलोक्य विरहकातर्यं नाटयन्)

कामः पञ्चशरः किलेति वितथं ताराप्रसूनार्चिते
व्योमान्तः खुरलीतले रतिपतेः खेलिष्यतः श्यामया ।
यत्सेवापरया लसच्छरशतैः सेवाप्रपञ्चांचित –
प्रालेयांशुमिषादिदं प्रगुणितं नाराचयन्त्रं पुरः ॥ १३ ॥ (शार्दूलविक्रीडित)

---

११. मा प्रतीयात् नराणामनुरागानपररक्तचित्तानाम् ।
अतिरक्तोऽपि दिनेशः पश्य तां दिनश्रियं मुञ्चति ॥

१२. कियन्तं कालं कुशलं गुरुकाणामपि परधनेषु लुब्धानाम् ।
द्विजराजस्य [१]वसूनां हरणात् [२]हरेरपि किं फलं जातम् ॥
१. वसु = तेज २. हरि = सूर्य



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तन्मुहूर्तमस्यामेव द्राक्षामण्डपतलान्तःस्थितहिमशिलायामुपविश्य एवं तापमुपशमयामि इहैव मित्रेण । (प्रवेशं नाटयति सुहृदुपनीतशिशिराद्युपचारमनुभूय)

कुकूलतितरां तनौ मृदुमृणालिनीसंस्तरः
स्फुलिङ्गति समन्ततः शिशिरशीकराडम्बरः ।
हलाहलति चन्दनं शबलमेणनाभीरसै –
र्दवानलति शीतलाप्यहह सान्द्रचन्द्रद्युतिः ॥ १४ ॥

(पृथ्वी)

(तथैव चन्द्रातपव्यथां नाटयन्)

वैवर्ण्यं तनुते यदेतदुचितं दृष्टाऽपि कस्तूरिका
सन्तापं तपनप्रिया कमलिनी दत्ते च तत्सम्मतम् ।
वैकल्यं बकुलः करोतु मधुना पूर्णोऽस्य यद्दोहदः
स्वं धात्वर्थमतीत्य निर्दहति मां यच्चन्द्रिकेत्यद्भुतम् ॥ १५ ॥

(शार्दूलविक्रीडित)

[ततः प्रविशति चन्द्रिका]

**चन्द्रिका-** कः कोऽत्र भोः ? निवेद्यताम् ब्रह्मवीराय विजयेन्द्राय यत् राज्ञ्याः श्रीचन्द्रलेखाया उपलब्धिं गृहीत्वा वैताढ्यगिरेरुपेता चन्द्रिका द्वारि तिष्ठति ।

**तत्त्वप्रपञ्चनः-** (श्रुत्वा सविस्मयं स्वगतम्) साधु संवृत्तमनयोपलब्ध्या अवश्यं यास्यति स्वास्थ्यमसौ । (त्वरितपदं निष्क्रम्य चन्द्रिकां हस्ते गृहीत्वा प्रविश्य) ब्रह्मन् ! चन्द्रिकेयं प्रणमति तदनुगृह्यतां दृष्ट्या ।

**विजयेन्द्रः-** (निरीक्ष्योपलक्ष्य सहर्षम्) अयि चन्द्रिके ! जीवति प्रिया ?

**चन्द्रिका-** (सविश्वासम्) जीवति जीवति ।

**विजयेन्द्रः-** (औत्सुक्यं नाटयन्) कथमित्थं तापयसे माम् ? इयत्कालं यावत् यदि त्वत्संधारणया जीविता तदवश्यं जीविष्यत्येव सर्वं परित्यज्य तत्रायातमेव मां विद्धि, परं कथयतु भवती मयि प्रणयं विधाय कथं कथं गमयति दिनं कथं च रजनीम् ।

**चन्द्रिका-** अवधारय ।

लीलागारे लिखितमसकृच्चित्रभित्तौ भवन्तं
सा पश्यन्ती गमयति दिनं विस्मृतत्वद्वियोगा ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

ध्वान्तस्तोमैः सकलककुभां सन्निरुद्धेऽवकाशे
शङ्के कष्टं व्रजति रजनी कल्पकल्पा कृशाङ्ग्याः ॥ १६ ॥
(मन्दाक्रान्ता)

अन्यच्च –

नक्तंदिनं विषमबाणशरप्रहार –
दाहज्वरव्यतिकरज्वलिताङ्गलेखा ।
सा जीवितं कलयति क्षणलब्धसौख्या
संकल्पकल्पितभवन्नवसङ्गमेन ॥ १७ ॥ (वसन्ततिलका)

**विजयेन्द्रः-** (सचिन्तम्) कियन्तं कालमवलम्बयति संकल्पदर्शनम् । धिक् धिक्मां पराधीनवृत्तिं यदद्यापि तां न प्रतिगृह्णामि । चन्द्रिके ! कथय कथय

यद् वस्तु तापोपशमाय तस्या, यद् वस्तु नक्तंदिननिर्गमाय ।
यद् वस्तु तद्व्याधिविखण्डनाय यद् वस्तु हर्षप्रतिवर्द्धनाय ॥ १८ ॥
(उपजातिः)

**चन्द्रिका -** यदि मां पृच्छसि तदा त्वत्सङ्गम एव तद् वस्तु, यत्रासक्ता नान्यानि वस्तून्यपेक्षते । तथाहि –

गृह्णाति स्म सखीजनस्य वचनैस्ताम्बूलमुद्वेजिता
किञ्चिन्न स्मरति स रात्रिमखिलां त्वां द्रष्टुमुत्कण्ठिता ।
पाणौ नागलतादलप्रणयिनि स्थास्नौ तथैवानने
श्रीखण्डप्लुतपूगफालिकलिते कं कं न साऽपीडयत् ॥ १९ ॥ (शार्दूल.)

अन्यच्च – चन्द्रातपकदर्थिताङ्गी सोन्मादा मां प्रति यद्वदति तदप्यवधीयताम् ।

दूरे कुरुष्व शशिनः सखि ! रोहिणीं तां,
या जीवितव्यतुलनां कलयत्यमुष्य ।
वेगाद्वियोगदहनज्वलिताङ्गलेखो,
जानात्यसावपि यथा परदुःखभारम् ॥ २० ॥ (वसन्ततिलका)

अथवा –

एनमेव कुरु दूरवर्त्तिनं सन्निवेश्य गिरिगह्वरे क्वचित् ।
वेत्तु दुःखमपरार्त्तिशीतलः शीतदीधितिवधूजनश्चिरात् ॥ २१ ॥
(रथोद्धता)

आहोश्वित्



Jain Education International For Private & Personal Use Only www.jainelibrary.org

कयाऽपि युक्त्या हरभालवह्नौ विक्षिप्य भस्म(स्मी)क्रियतां शशाङ्कः ।
अस्मादृशं वल्लभविप्रयोगे दुनोति नूनं न पुनर्यथाऽयाम्(यम्) ।। २२ ।।
(उपजातिः)

अथ चन्द्रिका पाथसि निमज्जन्ती यन्मन्त्रयते तदप्यवधार्यताम् ।

ज्योत्स्नापूरं न तु कथमलं चञ्चुपात्रैश्चकोराः,
पातुं विश्वप्रसृतमभितः प्रोषितप्लावनाय ।
कर्मण्यस्मिन् सरसिजभुवा किं न सृष्टाः करीन्द्रा,
येषां पानात् सपदि सकलोऽप्येष शोषं प्रयाति ।। २३ ।।(मन्दाक्रान्ता)

(क्षणेन उद्धर्वावलोकनं नाटयन्ती दुःसहतारकानिकरमवलोक्य)

आवर्त्त्य तारककदम्बमुषर्बुधान्तः
सख्यः क्षणात्कुरुत राजतपिण्डपाण्डु ।
एतानि हालहलपुष्पसहोदराणि
शक्यानि नेक्षितुमपि स्मरकातराभिः ।। २४ ।। (वसन्ततिलका)

विचारपरा तु यच्चिन्तयति तदपि श्रूयताम् ।

चन्द्रोऽयमेकः क्रियते कथञ्चित् ताराः समस्ता यदि यान्ति नाशम् ।
अमूभिरेकत्वगताभिरिन्दोः कृते द्वितीये क्व नु जीवितव्यम् ।। २५ ।।
(उपजातिः)

अन्यच्च –

राहोर्जडत्वमसमं सखि ! पश्य येन
ग्रस्तः सुधानिधिरयं सहसा विमुक्तः ।
नो चेत् तथैव मुखमध्यमधिष्ठितेऽस्मिन्
सन्धानमैष्यदचिरेण कबन्धसन्धिः(न्धेः) ।। २६ ।। (वसन्ततिलका)

**विजयेन्द्रः-** ईदृश एवायं प्रियविप्रयोगे शशी समुद्वेगपात्रम् । तत्साधु यदमुष्यैवं क्षयमचिन्तयत् प्रिया । ममापि कथ्यताम् कोऽप्युपायो, येन न प्रभवति । (अङ्गुल्या प्रदर्श्य)

लीलावासः कुसुमधनुषो मानिनीमानतन्त्रं
यन्त्रं कोपग्रहविरहणे प्रेमसन्धानमन्त्री ।
निर्गम्योऽयं कथमिव मया वल्लभाविप्रयोग-
ज्वालाजालज्वलितवपुषा रोहिणीप्राणनाथः ।। २७ ।। (मन्दाक्रान्ता)

(सनिःश्वासम्) चन्द्रिके ! एतद्व्यथामपहर्तुं कान्तया स्वहस्त-



Jain Education International For Private & Personal Use Only www.jainelibrary.org

लिखिताऽलङ्कृतं किमप्यनङ्गलेखरूपं वस्तु किं तव हस्ते प्रहितमस्ति उत न ।

**चन्द्रिका** - अनवरतभवत्स्मरणप्रवणतया मुहुर्मुहुर्घूर्णिताङ्गी कथमिव प्रहिणोतु । शृणु -

+एका प्रयाति कथमप्यपराभ्युपैति
मूर्छा द्वयोरपि तयोरभवद्यदान्तः ।
लेखं तदा तव कृते सुतनोर्लिखन्त्याः
स्वस्तीति ता (ना) द्यलिपिरप्यगमत् समाप्तिम् ॥ २८ ॥ (वसन्ततिलका)

**विजयेन्द्रः**- सत्यमेतत् । स्तम्भादयो भावाः कथमपि न्यक्क्रियन्ते मूर्च्छा त्वेकाऽपि सर्वाङ्गं विधुरयति जन्तुम् । तत् कथं द्रष्टव्या प्रिया ? (सोन्मादम्)

चेतः ! कथं विधुरतां भजसे समन्तात्
नन्वस्ति सा स्थितिमती निकटे तवैव ।
तस्मिन्नगे वसति यत् तदिदं व्यलीकं
त्वं प्रत्ययं निजदृशः कुरु मा परेषाम् ॥ २९ ॥ (वसन्ततिलका)

(ततः प्रविशति निजदृष्टिः)

**निजदृष्टिः**- [१३]आणत्तम्हि तत्तभोदीए सिरिचंदलेहाए जं तए विजइंदस्स अणंगलेहो समप्पइदव्वो । ता कह सो मये दट्ठव्वो । (पुरो अवलोक्य) एदु य्येव वट्टदि । (उपसर्प्य) तत्तपवंचणा ! णिवेदेह मं विजइंदाय ।

(तत्त्वप्रपञ्चनः प्रत्यभिज्ञाय तथा करोति)

**विजयेन्द्रः**- (दृष्ट्वा औत्सुक्यं नाटयति)किमियं निजदृष्टिः ? किं कारणं चन्द्रिकाया अन्वागमने निजदृष्टेः ? । कच्चित्कुशलं प्रियायाः ? ।

---

+तुलना – वेविर-सिण्ण-करंगुलि-परिग्गह-क्खलिअ-लेहिणी-मग्गे ।
सोत्थि च्चिअ ण समप्पइ पिअसहि लेहम्मि किं लिहिमो ।।–सरस्वतीकंठाभरणे पृ.६३७
छाया – वेपनशील – खिन्न-कराङ्गुलि-परिग्रहस्खलितलेखिनीमार्गः ।
स्वस्त्येव न समाप्यते प्रियसखि ! लेखे किं लिखामः ।।

१३. **निज.** आज्ञप्तास्मि तत्रभवत्या श्रीचन्द्रलेखया यत्
त्वया विजयेन्द्रस्य अनङ्गलेखः समर्पितव्यः ।
ततः कथं स मया दृष्टव्यः । इत एव वर्त्तते ।
तत्त्वप्रपञ्चन ! निवेदय मां विजयेन्द्राय ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**निजदृष्टिः-** (हस्ताञ्जलिमभिनीय) एवम् । (अनङ्गलेखमर्पयति)

**विजयेन्द्रः-** (उन्मुद्र्य यावद् वाचयति तावद् दृशोर्बाष्पोत्पूरं करे च कम्पं नाटयति) (अत्र १४४ तमं पत्रं त्रुटितमस्ति ।) मिन कि प्रियां ताम् (प्रकाशम्) निजदृष्टे ! पृच्छ तत्त्वप्रपञ्चनं सम्प्रति यादृगवस्थाऽस्मासु वर्त्तते ।

**तत्त्वप्रपञ्चनः-**

नान्ते गुरूणां न पुनर्ममान्ते न वा रजन्यां न च वासरे वा ।
एकोऽथवाऽयं बहुभिर्वृतो वा तया विना न क्षणमेति सौख्यम् ।।३०।।
(उपजातिः)

(तं तथा बाष्पपूरितलोचनपुटं दृष्ट्वा चन्द्रिकां प्रति) अयि ! निजदृष्ट्याऽपि सहिता भवती प्रतियातु यथागतं त्यक्त्वा समस्तं त्वरितमेव तत्रायातममुं जानीहि । (इति विसर्जयति)

**चन्द्रिका-** युष्मदादेशः प्रमाणम् । (इत्युक्त्वा प्रणम्य निजदृष्ट्या सह निष्क्रान्ता)

**तत्त्वप्रपञ्चनः-** (तथैव प्रियाप्रणिधानपरं निरीक्ष्य सनिर्वेदम्)

सर्वथा दुर्निवारोऽयं निबिडः प्रेयसीग्रहः ।
यं विलोक्य ममाप्येति बोधो नात्मनि विक्लवे ।। ३१ ।। (अनुष्टुप्)

(ततः प्रविशति आत्मावबोधः)

**आत्मावबोधः-** आदिष्टोऽस्मि पूज्यपादैर्मनोगतिसन्दिष्टेन यत् –

स ब्रह्मसूनुर्दयितावियोगजातव्यथां बिभ्रदनन्यसाध्यः ।
गत्वा त्वया तात्त्विकिदेवतायाः, समं च तेन प्रतिबोधनीयः ।। ३२ ।।
(उपजाति)

तदत्रैव तत्त्वप्रपञ्चनानुगतः किं स एवैषः (परिक्रम्यावलोक्य) अयि ! तत्त्वप्रपञ्चन ! किमित्युचितक्रियालोपः ?

**तत्त्वप्रपञ्चनः-** (उद्धुर्वमवेक्ष्य) किमात्मावबोधः ?

दिष्ट्या संजातं, गतं व्याकुलतया, मत्त(:) ससम्भ्रममुत्थाय प्रणमति । सुहृद्वैधुर्यवैयग्र्यान्नावगता भवन्तः, ततः क्षम्यतामविनयोऽयम् ।

**आत्मावबोधः-** (विहस्य) न किञ्चिदत्र तवापराध्यति, । इत्युक्त्वा ध्यानं नाट्यति, प्रत्यक्षीकृत्य तात्त्विकीं देवतामादिशति ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

मम त्वं च द्विजस्यास्य, त्वर तात्त्विकिदेवते ! ।
त्यक्त्वा येन प्रियामोहं, पथि न्याय्ये प्रवर्तते ॥ ३३ ॥ (अनुष्टुप्)

(देवताश्रितशरीरो ध्यानाद्विरम्य)

**विजयः-** (तत्त्वप्रपञ्चनं प्रति-)

वयस्य ! सर्वोऽपि कृतः किमर्घ्यपाद्योपचारविधिः ?।

**तत्त्वप्रपञ्चनः-** एवमेव ।

**विजयः-** (पुरोऽवलोक्य)कथममी आत्मावबोधा गुरवः ?

(विजयः साष्टाङ्गं प्रणमति)

**आत्मावबोधः-** स्वस्ति भवते सपुत्राय च सकलत्राय च (अजितदेवेत्यादि मन्त्रं कर्णे निक्षिपति)

**[विजयेन्द्रः-]** (ससम्मदम् ।)

धिक् सर्वं भवचक्रवर्तिविषयव्रातं क्षणे नश्वरं
धिक् विद्याधरचक्रवर्तिपदविं(वीं) ध्वंसो यदस्या अपि ।
एकः केवलमेष नित्यमुदितः ख्यातस्त्रिलोकीतले
भूयाद् वाञ्छितसिद्धये मम परं युष्मत्प्रसादः सदा ॥ ३४ ॥
(शार्दूल.)

भगवन् ! कैः प्रकारैः श्रीमदजितबलां देवीं प्रसाद्य तां महासिद्धिं समासादयिष्यामि, तत् कथ्यतामुपायः, प्रवणोऽस्म्येषः ।

**आत्मावबोधः-** वत्स ! विना भवन्तमितरस्य कष्टसाध्या महासिद्धिः तत्राप्यादितस्तावन्मण्डलाधिष्ठात्री देवता प्रसादनीयास्ति ततस्तदुपदेशलाभेन भविष्यद्विघ्नौघविध्वंसे उत्तरसाधकत्वे स्वसुतं नियुज्य उत्तरकर्मव्यवसायिना भवितव्यम् । (कर्णे मन्त्रं निक्षिपति)

**विजयेन्द्रः-** (तथेति प्रतिपद्य सोत्साहो मनसि निश्चयं बद्ध्वा तत्त्वप्रपञ्चनसंस्कृतभूमितले मण्डलान्तः समुपविश्य ध्यानं नाटयति वदति च ।)

देवि देव नाथ याग याहि पाहि धेहि देवि । यात शेष देवि
चंद्र चन्द्र देवि देव शेष नाथ यात याग देवि याहि पाहि धेहि ॥
हे देवि अजितबले ! विदे-मम ज्ञानोत्पादनाय च सम्मुखी भव ।
त्वत्सम्मुखीभवनेन सर्वकामि(त)फलहेतुरयं चरुपाक-
लक्षणो योगः संसिध्यति । पूर्वमप्यदेवि क्री



Jain Education International For Private & Personal Use Only www.jainelibrary.org

(अत्र १४८ तमं पत्रं त्रुटितमस्ति ।)

**विजयेन्द्रः-** **तथैव बाह्यरत्नस्थानीयत्वादेकेन** सम्बन्धः । तथा हे देवि पुरुषः पुरुष इति वत् देवीत्यर्थान्तरसंक्रमिततत्त्वेन क्षत्रियतादिवृत्तिः । तेन च प्रणतवत्स(ल)त्वं आश्रितदानत्वादि ध्वन्यते । चन्द्रवदाचर त्वयि प्रसन्नायां सर्वाः सिद्धयो भवन्ति देववच्च आचर । श्रीमदजितो हि नवदेवता स च न केनापि जीयत इति । किमिति तस्या आहितातमाया ब्रह्मराक्षस्याः समस्तविघ्नान् न धर्षयसि, अत एवाह – शेषाणां नाथ यातया विघ्नपङ्क्त्या सह वि(धे)हि प्रगल्भय, यथा दूरं याति न च भवत्यशक्ता यतो अगान् पर्वतानपि घसि खण्डयसि अतो देवि पाहि मा धेहि धैर्ये यथा साधयाम्यमूं महासिद्धिम् । (अत्र पदावयवः पूर्वेण उत्तरेण सम्बन्धपदं स्वरूपेणापि वर्त्तते यथा देवनाथेत्यत्र हे देवि ! समस्तं पूर्वं दे इत्यवयवः चन्द्रदे इति चन्द्रपदेन वि इत्यवयवः । विदे मम ज्ञानाय देवपदेनेति एवमन्यत्रापि) उत्तरार्द्धं तु महाबन्धार्थगुणस्थानीयं **हारबन्ध**स्तस्य चन्द्र इति नामा**लोके** चन्द्रबिम्ब इति प्रसिद्धः । (पना)

**तत्त्वप्रपञ्चनः-** भगवन् ! किमिदमाकाशाच्चन्द्रमरीचिमयं हारप्रकाण्डं पुरस्तान्निपतद् दृश्यते ।

**आत्मावबोधः-** वत्स !

याहि पाहीति सम्प्राप्ता धेहीति पदमाश्रिता ।
सिद्धा देवी ददौ हारं चन्द्रमस्मै द्विजन्मने ।। ३५ ।।

(अनुष्टुप्)

तत्रैव क्षणे निजतेजसा गगनान्तरालमुद्योतयन्ती विमानस्था प्रविशति मण्डलाधिष्ठात्री देवता ।

**देवता –** अजितनाथ देव विदितचन्द्रयात तात शेष राजमान ।
सुभगयागताताहृदययाहि देवि नाम धेहि पाहि शं नः ।। ३६ ।।

हे देवशर्मन् ! अजितनाथ देव विदित ! विदितो हि श्रीमतो अजितनाथदेवस्य पूर्वमेव जप्ताऽष्टोत्तरलक्षपञ्चपरमेष्ठिमन्त्रेणाराधितत्वात् **सुभगया** विलसत्प्रभया **चन्द्रया** चन्द्राभिधानया प्रियया सह श्री-शेषराजमत गच्छ । प्राणाहि ततो विसृ(श्रु)तो भवसि । पूजिते हि शेषभट्टारके निर्विघ्ना सिद्धिरुपजायते, पूजयित्वा च आग आगच्छ



Jain Education International For Private & Personal Use Only www.jainelibrary.org

मण्डले यतो अगवत् कठिना नागा गारुडमन्त्रा हृदये यस्यास्तया चन्द्रलेखया देविनी प्रभा यस्यास्तया सह गारुडमन्त्रा धात्री य विलसत्प्रभा एतदर्शनाद्धि निधेः संश्रिता नागाः प्रक्ष्मन्ति (प्रक्षरन्ति) ततः सुखावहा सिद्धिर्भविष्यति । धेहि मण्डलं पुष्टिं नय, एहि च रक्ष मण्डलमस्माकं विधिवत् पूजय अन्यथा मण्डलनाशो भवति क्रियाभ्रंशात्, सुख(हे)तुत्वान्मण्डलं शंशब्देनोच्यत इति ।

**तत्त्वप्रपञ्चनः-** भगवन् ! इदमपि किं कर्णामृतस्यन्दि वचः समाकर्ण्यते ।

**आत्मावबोधः-** मण्डलाधिष्ठात्री हि देवता देवशर्माणं संतुष्टा शिक्षयतीति ।

**देवी-** (स्वहस्तनिक्षिप्तमहाक्षता तात्त्विकीयम्) वत्स ! एभिर्दिव्याक्षतैः श्रीमदजितबलादेवि(वी)प्रसादात् प्राप्तव्यदुग्गेन(र्गेण) खेचरमहासिद्धमतिविभवोपनीतकृष्णचित्रकेन्धनप्रदीप्तहुताशनेन विहितमहाचरुपाके सर्वा अपि ता महासिद्धयस्तूर्णं श्रीशेषराजचरणानुध्यानाद् भविष्यन्ति (इत्युक्त्वा तिरोदधे)

**विजयेन्द्रः-** (ध्यानाद्विरम्य देवीमपश्यन् सिद्धाक्षतैः संभृतं कराञ्जलिं पश्यति ।)
(आत्मावबोधं प्रति) भगवन् ! पूज्यमन्त्रोपदेशादिदं संवृत्तं ।
(-सिद्धाक्षतान् कण्ठकन्दलावलम्बिनं चन्द्रहारं च दर्शयति ।)

**आत्मावबोधः-** सहस्ररत्नसङ्काशा तव देव्याः प्रसादतः ।
अचिरेण तनौ वत्स राजते देविनी प्रभा ।। ३७ ।। (अनुष्टुप्)

[ततः प्रविशति चक्रवर्त्तिश्रीरत्नपुञ्जसमन्विता महाराज्ञी श्रीदेविप्रभा]

**देविप्रभा –** अद्यैव तज्जन्म कृतार्थमेतदद्यैव तेषां गुरुता गुरूणाम् ।
अद्यैव देवी प्रथितप्रभावा प्राप्यो मया येन स जीवितेशः ।। ३८ ।।
(उपजातिः)

(प्रतीक्ष्य पुत्रमनुयायिनं करोति)

**विजयेन्द्रः-** (कलकलमाकर्ण्य) भगवन् ! किमेतदखिलमिलितजनतासंमर्दव्याकुलाऽविस्पष्टप्रजल्पितमभितः श्रूयते ? ।

**आत्मावबोधः-** सैषा देविप्रभा देवी निजपुत्रेण भूषिता ।
त्वामधृष्यं समभ्येति स्वर्धुनीव पयोनिधिम् ।। ३९ ।। (अनुष्टुप्)

**देविप्रभा -** (परिक्रम्याग्रतोऽवलोक्य सानन्दम् । पुत्रं प्रति) तात ! स एष ते तातः पुरतो दृश्यते । अमी आत्मावबोधा गुरवः, अयं च महातपस्वी तत्त्वप्रपञ्चनः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**तत्त्वप्रपञ्चनः-** तत् प्रणम यथाक्रममेतान् ।

(रत्नपुञ्जस्तथा करोति)

(देविप्रभा पुत्रप्रणामानन्तरं गुरून् प्रणम्य अवनतदृष्ट्या तत्त्वप्रपञ्चनमभिनमन्ती बाष्पाकुललोचना भर्तृमुखमीक्षितुमशक्नुवती दूरे स्थित्वा समुपविशति)

**विजयेन्द्रः-** (आत्मावबोधेन प्रत्यभिज्ञापितं पुत्रमालिङ्ग्य अङ्के उपवेशयति शिरसि चुम्बति च ।) वत्स !

राज्यं शासति किं त्वयीन्द्रसदृशे सर्वाः प्रजाः सुस्थिता ?
निर्बाधः सकलोऽपि तापसजनः किं तप्यते स्वं तपः ?।
भूदेवाः सततं मखेषु विबुधान् किं प्रीणयन्त्युद्यताः ?
किं धर्मो जिनशासने स बलवान् संवर्द्धते सर्वतः ॥ ४० ॥ (शार्दूल.)

(नेपथ्ये)

सुखाय प्रभातसन्ध्या भवतु चक्रवर्तिश्रीरत्नपुञ्जाय । तथाहि-

धौते चन्द्रमरीचिसान्द्रसलिलैर्भास्वानयं भानुभिः
कुर्वन् कुङ्कुमपङ्कपत्ररचनां प्राचीकपोलस्थले ।
सम्प्रत्यम्बरमञ्चति स भगवांस्तद्देवदेवार्चन-
व्यापारे दृढभक्तिनाऽपि भवता नाद्यापि किं यत्यते ? ॥ ४१ ॥
(शार्दूल.)

पुनस्तत्रैव ।

[१४] एसो जहा दिणमणी सयलाण तेयं
घित्तूण झत्ति पयडेइ महप्पभावं ।
एवं तुवं पि रिउरायबलं समिद्धं
दंसेसि निज्जिय कहं न नियप्पयावं ॥ ४२ ॥ (वसन्त.)

**विजयेन्द्रः-** (समाकर्ण्य) भगवन् !(भ)गवन् ! प्रभातसमयो वर्त्तते, तद्युष्माभिरपि मयाऽपि सम्प्रति गुरुचरणा दृष्टव्यास्तद्यथा करणीयम् (आलोच्य चक्रवर्त्ती

---

१४. एष यथा दिनमणिः सकलानां तेजः
गृहीत्वा झटिति प्रकटयति महाप्रभावम् ।
एवं तवापि रिपुराजबलं समृद्धं
दर्शयसि निर्जित्य कथं न निजप्रभावम् ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

रत्नपुञ्जोऽपि यथागतं प्रेष्यते ।)

**आत्मावबोधः-** ब्रह्मन् (एवमेव इति रहसि समुपविश्य सर्वे मन्त्रयन्ते एकस्य कर्णे एकः अपरो अपरस्य)

**आत्मावबोधः-** हुं इत्थमेवेति कर्त्तव्यम् ।

राज्यालङ्करणाय यातु नृपतिर्देव्या सह स्वां पुरी-
मादेशं प्रतिगृह्य तत्रभवतां त्वं भूषयामुं क्षणम् ।
गच्छामो वयमप्यतीन्द्रियमहः प्राप्तुं स्वसिद्धाश्रमं
तत्राकाशचरस्य तत् कथयितुं यात्वेष मित्रं तव ।। ४३ ।।

(शार्दूल.)

[इति निष्क्रान्ताः सर्वे]

श्रीदेवचन्द्रमुनिविरचितचन्द्रलेखाविजयप्रकरणे सिद्धाक्षतलाभो नाम चतुर्थोऽङ्कः ।। छ ।।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# पञ्चमोऽङ्कः

पात्रसूचिः

१. कुशाग्रबुद्धिः- विजयेन्द्रमित्रम् ।
२. पिङ्गाक्षी- आहितातमासोदरा ।
३. अजितबला - देवी ।
४. परमानन्दः- पाटलिपुत्रस्थः शिष्यः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

[ततः प्रविशति कुशाग्रबुद्धिः]

**कुशाग्रबुद्धिः-** [1]पेसिद म्हि तत्तपवंचणेण जं तए गोणंदनयरे गंतूण पातंजलिनामेण पच्चक्खट्ठिदसेसरायस्स अणुमदिं घित्तूण सिंधुमइतीरे सिद्धंजणाभिहाणे(वणे)विज्ञापसाहणट्ठाणं सुत्तइदव्वं । तदो कित्तियंतरे, वट्टदि त्ति न मुणेमि । जइ कहवि कोवि सम्मुहो भोदि ता पुच्छेमि (तत्कालमेवोज्ञयिन्यामभिगच्छन्तीं सिद्धव्रतां दृष्ट्वा सहर्षम्) कहं सिद्धवदा । (उच्चैःस्वरम्) सिद्धवदे वयरक्खियाहिदयभूदे ! कहिं चलिदा ? ।

**सिद्धव्रता -** [2]किं कुसग्गबुद्धी ? किं कारणं विजयसमीवं चत्तूण एदस्स इदो गमणे (क्षणं विचिन्त्य) हुं विज्ञासाहणोवयरणं वित्थरिदुं गमिस्सदि । (सबहुमानम्) अइ कुसग्गबुद्धे कुसली विजइंदो ।

**(कुशाग्रबुद्धिः)-** [3](अध इं)

**सिद्धव्रता -** [4]कहं पट्टमहिसीए देविप्पहाए समं विलाससुहं सो अणुहवदि ति निवेदेह ।

**(कुशाग्रबुद्धिः)-** [5]सुरकरिसरिसकरीहि उच्चस्सवमणहरेहिं तुरएहिं ।
पोलोमिए व वट्टए विलसइ इंदो व्व भुवणयले ॥ १ ॥
(गाथाछन्दः)

**सिद्धव्रता -** [6]सो वि पुत्तो चक्कवट्टी कहं पिउणो भत्तिं पयडेदि ।

---

१. **कु.** प्रेषितोऽस्मि तत्त्वप्रपञ्चनेन यत् त्वया गोनर्दनगरे गत्वा पातञ्जलिनाम्ना प्रत्यक्षस्थितशेषराजस्य अनुमतिं गृहीत्वा सिन्धुमतीतीरे सिद्धाञ्जनाभिधाने(वने) विद्याप्रसाधनस्थानं सूत्रयितव्यम् । ततः कियदन्तरे तत् वर्तते इति न जानामि । यदि कथमपि कोऽपि सम्मुखो भवेत् तदा पृच्छामि ।.......कथं सिद्धव्रता ?.,.....सिद्धव्रते......! व्रतरक्षिताहृदयभूते ! कुत्रचलिता !

२. **सि.** किं कुशाग्रबुद्धिः ? किं कारणं विजयसमीपं त्यक्त्वा एतस्य इतः गमने ।....हुं विद्यासाधनोपकरणं विस्तरितुं गमिष्यति..... अयि कुशाग्रबुद्धे ! कुशली विजयेन्द्रः ?

३. **कु.** अथ किम् ।

४. **सि.** कथं पट्टमहिष्या देविप्रभया समं विलाससुखं सोऽनुभवति इति निवेदय ।

५. **कु.** सुरकरिसदृशकरिभिः उच्चैःश्रवोमनोहरैः तुरगैः ।
पौलोम्या इव वर्तते विलसति इन्द्र इव भुवनतले ॥

६. **सि.** सोऽपि पुत्रः चक्रवर्ती कथं पितुः भक्तिं प्रकटयति ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**कुशाग्रबुद्धिः-** [७]तइया अप्पावबोहाएसेण गुरूणं पासे गंतूणं कादव्वकज्जपइट्ठाविहिं मुणिऊण तत्तपवंचणेण समं उज्जेणिं आयादमित्ते वि विजइंदे एस रयणपुंजो सयलं पि रज्जसिरिं समप्पिय सयं घित्तूण छव्विहबलं रिउवग्गविजयाय सुरसरितीरे सम्पदं आवासिदो चिट्ठदि ।

**सिद्धव्रता -** [८]णं कहं विजइंदेण सो विजयजत्ताये अणुमदो, जदो आसन्नं विज्जासाहणाय परिट्ठिदं दिणं वट्टदि, उत्तरसाहएण य एदेण भोदव्वं, ता किं तत्तप्पवंचणस्स वि एदं विसुमरिदं ।

**कुशाग्रबुद्धिः-** [९]नेय, परं सव्वं पि एदं सेसरायनियोएण कादव्वं, तदो जाव अहं इत्थ गोणंदनयरे पातंजलिनामन्तरेण एदस्स सेसरायस्स अणुमदिं घित्तूण इहागमेमि ताव सो वि चक्कवट्टी करेदु निक्कंटयं भुवणयलं । देविप्पहा वि पुत्तलज्जाविमुक्का चिराओ लद्धभत्तारसुहं निम्मक्खियमहु व्व उवभुंजेदु ।

**सिद्धव्रता-** (विहस्य) [१०]किं तत्थ विज्जासाहणकम्मणि तुमं निजुत्तो सि ।

**कुशाग्रबुद्धिः-** [११] (अध इं) साहियविज्जाणंतरं पत्ते महासिद्धिलाहे गुरूणं वद्धावणं पि मए एव कारइदव्वं ।

**सिद्धव्रता -** [१२]ता तुवं य्येव कदत्थो हविस्ससि परं अज्जवि बहुविग्घाइं पिच्छेमि ।

---

७. **कु.** तदा आत्मावबोधादेशेन गुरूणां पार्श्वे गत्वा कर्तव्यकार्यप्रतिष्ठाविधिं ज्ञात्वा तत्त्वप्रपञ्चनेन सममुज्जयिनीमायातमात्रेऽपि विजयेन्द्रे एष रत्नपुञ्जः सकलामपि राज्यश्रियं समर्प्य स्वयं गृहीत्वा षड्विधबलं रिपुवर्गविजयाय सुरसरित्तीरे साम्प्रतम् आवासितः तिष्ठति ।

८. **सि.** तत् कथं विजयेन्द्रेण स विजययात्रायै अनुमतः ? यतः आसन्नं विद्यासाधनाय प्रतिष्ठितं दिनं वर्त्तते उत्तरसाधकेन च एतेन भवितव्यं तस्मात् किं तत्त्वप्रपञ्चनस्यापि एतदपि विस्मृतम् ? ।

९. **कु.** नैव परं सर्वमपि एतत् शेषराजनियोगेन कर्तव्यं, ततः यावत् अहमत्र गोनर्दनगरे पातञ्जलिनामान्तरेण एतस्य शेषराजस्य अनुमतिं गृहीत्वा इहागच्छामि तावत् सोऽपि चक्रवर्ती करोतु निष्कण्टकं भुवनतलम् । देविप्रभाऽपि पुत्रलज्जाविमुक्ता चिरात् लब्धभर्तृसुखं निर्मक्षिकमधु इव उपभुनक्तु ।

१०. **सि.** किं तत्र विद्यासाधनकर्मणि त्वं नियुक्तोऽसि ?

११. **कु.** (अथ किम्) साधितविद्यानन्तरं प्राप्ते महासिद्धिलाभे गुरूणां वर्द्धापनमपि मयैव कारयितव्यम् ।

१२. **सि.** तस्मात् त्वमेव कृतार्थो भविष्यसि परमद्यापि बहुविघ्नानि पश्यामि ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**कुशाग्रबुद्धिः-** [१३]मुद्धे !

[१४]झंझानिलसारिच्छं, सहसफणी जत्थ विग्घसंघायं ।
घुंटेइ तत्थ वि कहं संदेहो कज्जसिद्धीए ॥ २ ॥ (आर्या)

[१५]एयं पि तुमं न याणसि, जं तेण गुरुसयासाओ इंतेण अग्गे एव तत्तपवंचणं उत्तरसाहयं कडुय **'अजियदेवचन्द्रे'** ति मंतेण पञ्चक्खीकदो नायराओ, सव्वाण वि विग्घाणं उम्मूलणाय पसादो पत्तो, संदिट्ठं तेण य जं तए सव्वसिं पि कम्मणि सिंधुनइतटे जएयव्वं एवं एवं मंडलाइजागो य कायव्वो । एरिसी सिक्खा वि वितिन्ना ।

**सिद्धव्रता -** [१६]किं एस विसओ सव्वो वि संवुत्तो, साहु तत्तपवंचणा साहु (क्षणं विचिन्त्य) भोदु एवं एवं मदिविहवस्स पासं तत्तप्पवंचणो सयं गमिस्सदि कसिणचित्तयकज्जेण ।

**कुशाग्रबुद्धिः-** [१७]णं नाणबोहो चिराओ तत्थ गदो, सव्वस्स वि कादव(व्व)स्स सुध्येव एक्को दिव्वदुद्धाणणोवाओ न सु(त्थि)दोऽत्थि ।

**सिद्धव्रता [सि.]-** [१८]मुद्ध, एसो जागो एयाओ महासिद्धीओ कस्स पसाएण ?।

**कुशाग्रबुद्धिः-** (ज्ञानौत्सुक्यं नाटयन्) [१९]– सिरिअजियबलाए ।

---

१३. **कु.** मुग्धे –

१४. झञ्झानिलसदृक्षं सहस्रफणी यत्र विघ्नसंघातम् ।
पिबति तत्रापि कथं सन्देहः कार्यसिद्ध्याम् ॥

१५. एतदपि त्वं न जानासि यत् तेन गुरुसकाशात् आयता (आगच्छता) अग्रे एव तत्त्वप्रपञ्चनमुत्तरसाधकं कृत्वा च 'अजितदेवचन्द्र' इति मन्त्रेण प्रत्यक्षीकृतः नागराजः सर्वेषामपि विघ्नानामुन्मूलनाय प्रसादः प्राप्तः, सन्दिष्टं तेन च यत् त्वया सर्वस्मिन्नपि कर्मणि सिन्धुनदीतटे यतितव्यम् (यजितव्यम्) एवमेवं च मण्डलादियागश्च कर्त्तव्यः । एतादृशी शिक्षापि वितीर्णा ।

१६. **सिद्ध.** किम् एष विषयः सर्वोऽपि संवृत्तः, साधु तत्त्वप्रपञ्चन ! साधु ।.... भवतु एवमेवं मतिविभवस्य पार्श्वं तत्त्वप्रपञ्चनः स्वयं गमिष्यति कृष्णचित्रककार्येण ।

१७. **कु.** ननु ज्ञानबोधः चिरात् तत्र गतः सर्वस्यापि कर्त्तव्यस्य सिद्ध्यै इव, एकः दिव्यदुग्धानयनोपायो न सूत्रितोऽस्ति ।

१८. **सि.** मुग्ध, एष यागः, एताः महासिद्धयः कस्य प्रसादेन ?

१९. **कु.** श्रीअजितबलायाः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**सिद्धव्रता** - [20]ता किं तुअ इह कज्जे, वट्टदि पज्जाउलं (?)(...) हियर्य ।
तुट्ठा सेय करिस्सदि विट्ठिं दि(व्व) स्स दुद्धस्स ॥ ३ ॥ (आर्या)

**कुशाग्रबुद्धिः**- [21]सिद्धवदे जदि ता एवं अणुमन्नेहि मं, तए समं आलावं कुणंतस्स चिरकालो संवुत्तो । परं अक्खेह तुवं कहिं चलिदा सि ।

**सिद्धव्रता** - [22]परमेसरियाए वयरक्खियाए देविप्पहासमीवं पेसिद म्हि एवमादिट्ठं-
[23]वच्छे ! अज्ज हविस्सदि, गुरुपसायेण तुय पई सिद्धो ।
तत्थ तए न विहेया ईसा देवंगणासहिदे ॥ ४ ॥ (आर्या)

अन्नं च –
[24]हविहसि ताणं मज्झे तं सव्वाणं पि पट्टमहिसि त्ति ।
तेण तए कायव्वो, सव्वंगं कुलवहूधम्मो ॥ ५ ॥ (आर्या)

**कुशाग्रबुद्धिः**- [25]तदो एवं पडिवज्जिस्सदि किं देविप्पहा ।

**सिद्धव्रता** - [26]अस्सिं पि कज्जे किं कोवि संसओ, जदो कया वि सा गुरुवयणं न उल्लंघेदि ।

**कुशाग्रबुद्धिः**- [27]जदि एसा एवं करिस्सदि, तदो चंदलेहा कहं ? जा अवराए नामं पि न सहेदि, जदो एक्कस्सिं कोसे दो खग्गाइं न पविसंति ।

---

२०. **सि.** तर्हि किं तव इह कार्ये वर्तते पर्याकुलं हृदयम् ।
तुष्टा सा एव करिष्यति वृष्टिं दिव्यदुग्धस्य ॥

२१. **कु.** सिद्धव्रते ! यदि तावत् एवम्, अनुमन्यस्व मां
त्वया सममालापं कुर्वतश्चिरकालः संवृत्तः । परमाख्याहि त्वं कुत्र चलिताऽसि ।

२२. **सि.** परमेश्वर्या व्रतरक्षितया देविप्रभासमीपं प्रेषितास्मि एवमादिष्टम् ।

२३. वत्से अद्य भविष्यति गुरुप्रसादेन तव पतिः सिद्धः ।
तत्र त्वया न विधेया ईर्ष्या देवाङ्गनासहिते ॥

अन्यच्च –

२४. भविष्यति तासां मध्ये त्वं सर्वासामपि पट्टमहिषीति ।
तेन त्वया कर्तव्यः सर्वाङ्गं कुलवधूधर्मः ॥

२५. **कु.** ततः एवं प्रतिपत्स्यते किं देविप्रभा ।

२६. **सि.** अस्मिन्नपि कार्ये किं कोऽपि संशयः ? यतः कदाचिदपि सा गुरुवचनं नोल्लङ्घयति ।

२७. **कु.** यदि एषा एवं करिष्यति तर्हि चन्द्रलेखा कथम् ? या अपरस्याः नाम अपि न सहते यतः एकस्मिन् कोशे द्वौ खड्गौ न प्रविशतः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**सिद्धव्रता** - (विहस्य) [२८]एण (णं) पडिबोहिय सा वि मह पडिबोहिदव्वा तेहिं य्येव आदिट्ठे वट्टदि ।

**कुशाग्रबुद्धिः**- [२९]किं भणिदव्वा सा ? ।

**सिद्धव्रता** - [३०]सुणादु जं संदिट्ठं ।

मोत्तूण पिम्मगहिलत(त्त)णमज्जपुत्ति;
कंते महाचरुनिमित्तपउत्तजागे ।
पासं खणं पि न तए परिउज्झियव्वं,
विज्जा थिरा हवदि जेण तणूथिरादे ॥ ६ ॥ (वसन्ततिलका)

**कुशाग्रबुद्धिः**- [३१]ता तए वेयड्ढगिरिं जाव जायव्वं, मा करेह विलंबं परं अक्खेह मे गोणंदनयरमग्गं ।

**सिद्धव्रता** - (अङ्गुल्या दर्शयति) कुशाग्रबुद्धे ! ज्ञातं, गच्छाम्यहं, त्वमपि यथानिर्दिष्टं गच्छ ।

(इत्युभौ निष्क्रान्तौ)

**प्रवेशकः ।**

[ततः प्रविशति यथानिर्दिष्टस्तत्त्वप्रपञ्चनेन महाराज्ञीश्रीदेविप्रभया चक्रवर्त्तिश्रीरत्नपुञ्जेन च सह विजयः विभवतश्च परिवारः]

**विजयः**- (तत्त्वप्रपञ्चनं प्रति) एतद् [१]भर्तृस्थानम् ।

उच्चैर्विशालमुत्कृष्टमञ्चितं परमश्रिया ।
आयान्ति यत्र दृष्टेऽपि सम्मुखा इव सिद्धयः ॥ ७ ॥ (अनुष्टुप्)

---

२८. **सि.** एनां प्रतिबोध्य सापि मम प्रतिबोधयितव्या तैरेव आदिष्टे वर्तते ।

२९. **कु.** – किं भणितव्या सा ?

३०. **सि.** श्रृणोतु यत् सन्दिष्टम् ।
मुक्त्वा प्रेमग्रहिलत्वम् आर्यपुत्रि !
कान्ते महाचरुनिमित्तप्रयुक्तयागे ।
पार्श्वं क्षणमपि न त्वया पर्युज्झितव्यं
विद्या स्थिरा भवति येन तनूस्थिरायाः ॥

३१. **कु.** तावत् त्वया वैताढ्यगिरिं यावत् यातव्यम् । मा कुरु विलम्बम्, परम् आख्याहि मम गोनर्दनगरमार्गम् ।

१. शेषभट्टारकस्थानम्



Jain Education International For Private & Personal Use Only www.jainelibrary.org

(अथ नगरमभितोऽवलोक्य –)

देवः पातञ्जलिः सिन्धुर्नदी गोनर्दपत्तनं ।
[सिद्धाञ्जनवनं वेधा]स्त्रयीमेनां ससर्ज सः ॥ ८ ॥ (अनुष्टुप्)

**देविप्रभा -** [३२]हं पुण एवं मन्ने कमलासणसिद्धिबाहिरं एयं ।
जं नयरस्स नदीए एसो पातंजली वेहा ॥ ९ ॥ (आर्या)

**रत्नपुञ्जः-** अहमेवं विकल्पयामि । यत् श्रुतिष्वपि सिन्धुपरिवृतगोनर्दनगराधिष्ठितस्य पातञ्जलेर्गीयमानत्वादिति त्रितयस्य ।

कर्ता न कोऽप्यस्य न कोऽपि हर्त्ता
परस्य सम्भूषणतां गतस्य ।
अनश्वरस्याम्बरवन्महर्द्धे –
र्ब्रह्मादयस्तेऽपि विदन्ति नादिम् ॥ १० ॥ (उपजाति)

**तत्त्वप्रपञ्चनः-** अहं त्विति विचारयामि । यत् –

गोनर्दनगरात् स्वर्गो विश्वं सिन्धुनदीजलात् ।
पातञ्जलेस्तु पातालं त्रितयं त्रितयादभूत् ॥ ११ ॥ (अनुष्टुप्)

**(विजयः-)** सम्प्रति व्याख्यापरैरेव स्थातव्यं, किं कर्तव्यं कर्मणि न प्रस्तूयते ।

**तत्त्वप्रपञ्चनः-** (विजयं प्रति) साधु वदत्ययं, समुपस्थितः समयः । ब्रह्मन् ! विलोकय ।

एतेऽष्टास्वपि दिक्षु मण्डलभुवः संरक्षणाय क्षणा-
दप्यष्टौ कुलपन्नगाः समुदगुः पातालमूलाद्दिवम् ।
इत्थं श्रीभुजगाधिपेन सततं सञ्चिन्त्यमाने शिवे
किं दूरे क्वचिदप्यमूस्तव भवन्त्यष्टौ महासिद्धयः ॥ १२ ॥ (शार्दूल.)

**विजयेन्द्रः-** (तत् तथा दृष्ट्वा) ननु मण्डलान्तर्दीपिका(अ)प्युद्योतिताः केनापि कलकलश्चायं केषाञ्चिदाकर्ण्यते ।

**तत्त्वप्रपञ्चनः-** (विहस्य)

नैते दीपाः स्थापिताः कैरपीह जल्पाको वा कोऽपि नास्त्यत्र तावत् ।
रत्नज्योतिर्भास्वराभिः फणाभिर्भ्राम्यन्त्येतास्त्वत्कृते नागकन्याः ॥ १३ ॥
(शालिनी)

---

३२. दे. अहं पुनरेवं मन्ये कमलासनसिद्धिबाह्यमेतद् ।
यद् नगरस्य नद्या एष पातञ्जलिर्वेधाः ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

एताभिरेव सकलोऽप्युपहारयोगः
संसूत्रितो नियमतः फणिलोकभर्तुः ।
कुण्डानि यानि किल पञ्च भवन्ति यागे
खातानि तान्यपि तदीयगिरा भुजङ्गैः ॥ १४ ॥ (वसन्ततिलका)

**विजयः-** (परिक्रम्य सानन्दम्)
एतद्वितानमभितः कृतमन्तरिक्षे
केनात्र चित्रविलसन्मणिरश्मिजालम् ।
यद् वीक्ष्य निश्यपि मुदा दिनसम्भ्रमेण
कोकप्रिया भजति वल्लभसङ्गसौख्यम् ॥ १५ ॥ (वसन्ततिलका)

**रत्नपुञ्जः-** तात किमेतत् पुरतो गगनतलचुम्बि विकटशिलोच्चयरूपं दृश्यते ।

**(तत्त्वप्रपञ्चनः-)** चक्रवर्तिन् मां पृच्छ, किमत्र तेन
गुरूणामादिशिष्येण खेचरेण चरोः कृते ।
समुत्पाद्य कृतौ चुल्लीर्विन्ध्यसान्ध्यनगाविमौ ॥ १६ ॥ (अनुष्टुप्)

**देविप्रभा-** [३३]अज्जउत्त ! का उण एदाउ मंडलबाहिराहि रामाउ खेल्लंति ।

**तत्त्वप्रपञ्चनः-** योगिन्यश्चतुरधिका, षष्टिर्मधुपात्रराजिकरकमलाः ॥
तव दयितपरमसिद्ध्यै प्रीताः खेलन्ति स्वकरैस्ताः ॥ १७ ॥ (आर्या)

(विजयं प्रति) वयस्य ! त्वर्यताम् । यतः समये प्रवेशनीयम् (अत्र १७० तमं पत्रं त्रुटितमस्ति ।)

(रत्नपुञ्जं प्रति) वत्स ! त्वयाऽप्यत्र मण्डलपरिकरे कलितकरवालेनोत्तरसाधकत्वे स्थातव्यम् । अजितदेवेत्यादिमन्त्रं शिखाबन्धाय उपदिशति (सर्वे यथास्थानमध्यासते)

**विजयेन्द्रः-** (उद्धतक्रमसन्मुखगमनं नाटयति क्रमाद् (क्रमोद्धार) द्वारमवलोक्य) अहह ! यथावर्तामण्डलस्य कामाक्षा(क्ष्या)दयः समस्ता अपि देव्यः स्वस्वस्थाननिवासेन यथाक्रममालिखिताः तन्नमः सर्वाभ्यो देवताभ्यः (इति प्रणमति) (चतुःषष्टिदेवतानामन्तःप्रतिष्ठितसमयाभिधानं परमदेव्याः पादपीडाधस्तात् आलिखितान् नवमहासिद्धान् विलोक्य सचमत्कारम्)
एते तिग्ममहःशशिध्रुवमहासिद्धा दिवो भूषणं
द्रोणापत्यविभीषणाक्षमथना नेपथ्यमेते भुवः ।

---

३३. दे. आर्यपुत्र ! काः पुनर् एताः मण्डलबहिः रामाः खेलन्ति ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

अप्येते बलि-शेष-कूर्मपतयः पातालभूषाकृतो
यस्याः पादतले वसन्ति समया सा नस्तनोतु श्रियम् ॥ १८ ॥ (शार्दूल.)

(इत्युपविश्य मन्त्रसंस्कृताङ्गसमयाय यतते नेपथ्ये)

प्राणेभ्योऽप्यधिकं नियुज्य सुहृदं देविप्रभारक्षणे
संस्थाप्योत्तरसाधकत्वविषये श्रीरत्नपुञ्जं नृपम् ।
उद्युक्तः स्थिरमानसेन समयं गृह्णाति वीरव्रतं
प्रख्यातो विजयेन्द्र एष समया देव्याः पुरः सम्प्रति ॥ १९ ॥ (शार्दूल.)

(विजयेन्द्रः अन्तसमयक्रमोद्धारं दक्षिणेन परिक्रामन् श्रीमदजितदेवाग्रतः स्थापितमण्डलान्तः प्रविशति)

अव्यक्तः प्रभुरद्भुतेन महसा केनापि युक्तो नरै-
र्ब्रह्माद्यैरपि धूवनेऽनवरतध्यानप्रसक्तैरपि ।
सोऽयं गोचरतामुपैति सहसा यन्मन्त्रविस्फूर्जिते –
रप्यस्मादृशि ते जयन्ति गुरवो विश्वत्रयीविश्रुताः ॥२०॥(शार्दूल)

(उपसर्प्य)

बद्धानुरागाय सदैव मुक्तौ कंदर्पवीरे कदनोद्यताय ।
सौन्दर्यलक्ष्मीसमलङ्कृताय तथापि शान्ताय नमोऽस्तु तुभ्यम् ॥ २१ ॥
(उपजातिः)

एवं श्रीमदजितनाथं स्तुत्वा पञ्चकुण्डयागे निध्यधिष्ठातृणां नागानां निर्विषीकरणाय समीहितसिद्धये च सुधाकलशेन अजितबलादिमुखेन निर्विषीकरणादिदमाह –

याग याग देवि देवि तात तात देव देव ।
शेषशेष चन्द्रचन्द्र राजराज मानमान ॥ २२ ॥ (अनुष्टुप्)

हे 'देवि' ! अजितबले साक्षाद्देवता भवती, न च देवतानां किञ्चिदसाध्यमस्ति, हे शेषराज ! 'तातो' भवान्, न च तातस्यापत्यं प्रति किमप्यदेयमस्ति । हे देवराज ! पृथ्वीमण्डलाधिष्ठितः देवोऽसि त्वं, मनसा देवानामिति मानसी सिद्धिर्भवत इति मदभिलषिते यतस्व इति कातराणां मानसाण्डके देशे विशिष्टे स्थितानां यागाय निध्यधिष्ठातृणामहीनामशेषं विषं अत्यजत (अतत?)क्षिपत यूयं, यथाऽविषं भवति । विषाभावे तेषां रज्जुप्रायत्वात् यागः सुग्रहः स्यात् तथा अवत रक्षत मामुपद्रवेभ्यो देशे मानदे स्थितं यथा[या]गसुखं सिध्यति तत्सिद्धौ



Jain Education International For Private & Personal Use Only www.jainelibrary.org

मदीया मा लक्ष्मीः पूर्वोपार्जिता स्फीता सकलजनचमत्कारकारित्वेन विदिता अशेषचन्द्रमसस्तुल्या परिपूर्णाऽराजत मम विदे प्रसिद्धये ज्ञानाय च यथाऽवस्थितस्वपररूपपरिज्ञानशाली जायेय । मानदेव ! यथाहं पूजाशाली दुर्वृत्तमानखण्डकश्च भवामीति सुधाकलशात् स्थापनाऽवसेया। तदेवं श्रीमदजितबलादीन् समीहितसिद्धये स्मृत्वा **अजितदेवे**त्यादि पञ्चपरमेष्ठिमन्त्रं मनसि विन्यस्य षोढान्यासेनात्मानं नियम्य श्रीमदजितबलां देवतां प्रणिधाय ध्यानमुद्रां नाटयति)

(नेपथ्ये)

नत्वा क्रमोद्धारमयं महौजाः क्षिप्त्वाऽपसव्यं जिनमण्डलस्थः ।
स्तुत्वाऽथ भक्त्या परया गुरुं च देवं च तद्ध्यानमलङ्करोति ॥ २३ ॥
(उपजातिः)

तत्रैव (साशङ्कम्)

आः किं व्योमभुवः पतत्यतिमहत् संचूर्ण्य यत् पर्वतान्;
विश्वक्षोभविधायि मण्डलमभि ज्वालाभिरुड्डामरम् ।

(सानन्दम्)

केनाप्यद्भुतसाहसेन सहसा निर्गत्य पातालतः
क्रोधान्धेन हठात् प्रसार्य वदनं वेगादिदं ग्रस्यते ॥२४॥
(शार्दूल.)

**देविप्रभा** - [३४]किं एदं दुवारे विज्जुपुंजु व्व तक्काले दिट्ठं [नट्ठं] च ।

**तत्त्वप्रपञ्चनः**- त्वं येनापहृता पूर्वं भ्राता तस्य सहोदरः ।
करोति विघ्नसंघातं तं निराकुरुते फणी ॥ २५ ॥ (अनुष्टुप्)

**देविप्रभा** - [३५]णं तत्त्वपवंचण ! किं एदं पुरुषदो जुन्हापुंजेण अलक्खभयं सयलदिसामुहाइं उज्जोतयंतं धवलायवत्ततले दीसदि ।

**तत्त्वप्रपञ्चनः**- सहस्रभानुः फणरत्नकान्त्या शरीरतेजःपटलैस्तु चन्द्रः ।
एष स पातञ्जलिनागराजस्त्वद्भर्तृसिद्ध्यै दिशतीह नागान् ॥ २६ ॥
(उपजातिः)

---

३४. **देवि.** – किम् एतद् द्वारि विद्युत्पुञ्ज इव तत्कालं दृष्टं(नष्टं) च ।

३५ **देवि.** ननु तत्त्वप्रपञ्चन ! किम् एतत् पुरुषतः ज्योत्स्नापुञ्जेन अलक्ष्यभयं सकलदिङ्मुखानि उद्द्योतयद् धवलातपत्रतले दृश्यते ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तदत्रैव स्थिता प्रणम प्रभुम् ।

**देविप्रभा** - (संस्कृतमाश्रित्य)

आनन्दकन्दलीकन्द शतचन्द्रसमत्विषे ।
नागाधिपाय भवते धरित्रीधारिणे नमः ॥ २७ ॥ (अनुष्टुप्)

[ततः प्रविशत्याकाशयानेन चन्द्रलेखा]

**चन्द्रलेखा** - (इतस्ततो विलोक्य) [३६]अहह ! रामणीयत्तणं मंडलभूमीए ।

जं पारिजायकुसुमप्पयरो विकिन्नो
नच्चंति सिद्धजुवई य सविब्भमा जं ।
गायंति किन्नरगणा हरिसाउलं जं
दूरे न वट्टदि तदो विजयस्स सिद्धी ॥ २८ ॥ (वसन्ततिलका)

(चन्द्रिकादत्तहस्तावलम्बा निजदृष्टिसमन्विता परिक्रामति)

**तत्त्वप्रपञ्चनः**- कथमियं चन्द्रलेखा । (सप्रणयम्) अयि चन्द्रलेखे ! स्वागतं भवत्याः ।

**चन्द्रलेखा**- (सप्रश्रयम्) [३७]गुरूणं पसाएण ।

**देविप्रभा** - (तत्त्वप्रपञ्चनं प्रति) [३८]का एसा दिव्वतणू तुम्हे आलवेदि ।

**तत्त्वप्रपञ्चनः**- सेयं त्वदीया भगिनी वैताढ्यगिरिनिवासा विद्याधरी चन्द्रलेखा ।

**देविप्रभा**- [३९]जं विजइंदो जीविदाओ अहियं मन्नेदि ।

**तत्त्वप्रपञ्चनः**- नैवम् । विजयस्य उभे अपि भवत्येषा च समाना ।
तत्सर्वथा प्रणय एवास्यां त्वया विधेयः (चन्द्रलेखां प्रति) अयि !
प्रणम एतां अरुंधतीसमां महाराज्ञीं देविप्रभाम् ।

(चन्द्रलेखा तथा करोति उभे अप्येकासनस्थे परस्परं स्निग्धालापान् कुरुतः)
(विजयेन्द्रः मार्गेणात्मानं निरीक्षमाणः परब्रह्मणि मनो बध्नाति)

---

३६. **चन्द्र.** – अहह रामणीयकत्वं मण्डलभूम्याः ।
यत् पारिजातकुसुमप्रकरो विकीर्णः
नृत्यन्ति सिद्धयुवतयः सविभ्रमा यत् ।
गायन्ति किन्नरगणा हर्षाकुलं यत्
दूरे न वर्तते ततो विजयस्य सिद्धिः ॥

३७. **चन्द्र.** गुरूणां प्रसादेन ।

३८. **देवि.** (....) का एषा दिव्यतनुः त्वाम् आलापयति ।

३९. **देवि.** यां विजयेन्द्रो जीवितादधिकं मन्यते ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

(नेपथ्ये)

उद्दामव्यात्तवक्त्रज्वलदनलशिखः कोऽपि रक्षोऽधिवाच्यः
कण्ठे कङ्कालमालामतिबहलगलद्रक्तधारां दधानः ।
मुञ्चन् फेत्कारमुच्चैर्दिशि दिशि चलितो मण्डलग्रासहेतोः
क्षोणीपालेन दुष्टस्तडतडिति जवात् खण्डखण्डीकृतोऽयम् ॥ २९ ॥

(स्रग्धरा)

**देविप्रभा-** (साशङ्कम्) [४०]णं तत्तपवंचण ! किं एदं वियडमुहकुहरउभयपक्खं जीहाए लेलिहंतं कडारकेसरं अइपयंडदाढारउद्दं पुच्छच्छडाभिघाएहिं सयलं पि धरणियलं कंपयंतं अइघोरगरुयनादेणं तिहुयणं पि खोहयंतं अग्गदो दीसदि ।

**तत्त्वप्रपञ्चनः-** सैषा आहितातमासोदरा **पिङ्गाक्षी** नाम राक्षसी व्याघ्ररूपधरा भवत्योर्ग्रसनाय समापतति । तन्न भेतव्यं, यावदेनां निवारयामि । (सम्मुखमुपसर्प्य करकलितकमण्डलुजलेन **अजितदेवे**त्यादिमन्त्रसंस्कृतेन शिरस्यभिहन्ति ।)

(नेपथ्ये)

एषा काचित् कवलनविधावुद्यता राजपत्न्यो-
र्व्याघ्रीरूपा करधृतजलैस्तापसेनाभिषिच्य ।
शान्तिं नीत्वा प्रसभमुभयोर्दर्शितायां नियुक्ता
तत्सर्वास्त्रेष्वपि ननु तपःशस्त्रमेवातितीक्ष्णम् ॥ ३० ॥

(मन्दाक्रान्ता)

**चंद्रलेखा -** [४१]तत्तपवंचणा ! एदं पि किं अंतरिक्खमग्गेण सहस्सभाणुसंकासं अहोमुहवा(मा)वडंतं पिच्छीयदि ।

**तत्त्वप्रपञ्चनः-** (निरूप्य प्रतिभिज्ञाय (प्रत्यभिज्ञाय) सहर्षम्)

सोऽयं सिद्धः प्रमुदितमना अन्तरिक्षेण गत्वा

---

४०. **देवि.** ननु तत्त्वप्रपञ्चन ! किमेतद् विकटमुखकुहरोभयपक्षं जिह्वया लेलिहन्तं कडारकेसरम् अतिप्रचण्डदंष्ट्रारौद्रं पुच्छच्छटाभिघातैः सकलमपि धरणीतलं कम्पयद् अतिघोरगुरुकनादेन त्रिभुवनमपि क्षोभयद् अग्रतो दृश्यते ।

४१. **चन्द्र** – तत्त्वप्रपञ्चन ! एतदपि किमन्तरिक्षमार्गेण सहस्रभानुसंकाशमधोमुखमापतत् प्रेक्ष्यते ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

मेरोः शृङ्गात्तमुपनयते चित्रकं कृष्णमत्र ।
तन्मोदन्तामभिमतफले न्यूनता नैव काचिद्
यागं स्वस्थाः सपदि विधिवत् कुर्वतां साध* [नाय] ॥३१॥ (मन्दाक्रान्ता)

दुर्निर्णीतमनाः परमकलामालोक्य पञ्चभिः कुण्डैश्चरुपाकलक्षणो यागः सिध्यति । तत्र **मानकुण्डात्** पूजाप्राप्तिः, **देविकुण्डात्** क्रीडाप्राप्तिः, **यात-कुण्डात् सर्वप्राप्तिः**, **शेषकुण्डात्** शिष्यमाणार्थलाभः **तातकुण्डात्** सर्वार्थसम्पत्, इत्यणिमादीनामष्टा(नां) महासिद्धिर्भवति । शेष मान देवि यातानां निधीनां प्रवृत्तिनिमित्तं भावः शेष ता(ता)दि सत्त्वं आगच्छ तातकुण्डे अग्निमानय इत्यग्न्यानयने समादिष्टे *अनुक्ततदाधारानयनवत्* अत्र कुण्डागमनं प्रतीयते शेषप्रवृत्तिनिमित्तस्य च ताते आगमनेन तातस्य शेषादिवत् शेषादिरूपता आपद्यते । कुण्डानयनेन तु तत्सम्बन्धमात्रत्वमेव स्यात् न तु तत् स्वरूपापत्तिस्तथा प्रत्येकं शेष मान देवियातात् आनता मदीया बुद्धिः सा त्वं शेषं मानं देविनं यातं च अत गच्छ । बुद्धेः शेषादिषु प्रेषणेन शेषादीनां यत् फलं तदपि स्वीकृतं भवति । बुद्धेरेव बोधनशक्तेः अनेन ध्येयध्यायकयोराभिमुख्यं सिद्ध्यंगं सूचितम् । तथा हे अजितबले देवि ! स्वयमेव यातादीन् निधीन् प्रतिश्रविता गमिष्यति भवती अतः त्वमपि अत गच्छ शेषादीन् अध्येषितासि मम शेष मान देवि यातादीनां निधीनां पालनाय च यावच्च शेषादिनिधिषु तिष्ठसि तावत् शेषया स्वयमुपभुक्तकुसुमरूपया पुनः किंरूपया मानया प्राप्तपूजया देविन्या विलसनशीलया यातया प्रतिप्रापणया तता विस्तृता सती आत आगच्छ शेषायाश्चात्रानयनेन तातादीनां रक्षणं पूज्यत्वं च विहितं गत्वा च तत्र शेषादिना सह आगच्छ शेषादी(न्)निधीन् शेषयति पृथक्करोति अन्येभ्यो विशिनष्टि वा यः स शेषान् तदधिष्ठाता देवता-विशेषस्तेन शेषता "**नाम नाम्ने**"ति+ समासः निध्यधिष्ठात्रीर्देवता गृहीत्वा मण्डलमागच्छ गृहाण पूजां, अनुगृहाण मां, सिद्धिं चोपयाहि, देव्या(:) शेषादिषु प्रेषणेन तेषां रक्षणम् । तदधिष्ठात्रीणां देवतानां च इहानयनेन सर्वदा सर्वेषां समुदितानां एकत्रावस्थानं ध्वन्यते । एवं

* अत्र १८१ तमं पत्रं त्रुटितमस्ति ।
+ सिद्धहैमः, सूत्रांकः ३/१/१८ ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

मन्त्रैराहूता देवता मण्ड[ल]मागत्य पूजां निगृह्णन्ति सिद्धिं चोपयान्ति, अशोकमञ्जर्यादिकुसुमानि शिरसि मुञ्चन्ति अनेन देविप्रभादीनां सर्वेषां विशोकता ध्वन्यते । प्रार्थितफललाभाच्च सौभाग्यस्याप्युपरिमञ्जरीव प्राप्तया तया(प्राप्ततया)स्त्रीत्वात् तयोरविधवात्वं प्रियप्रेमामृतकुण्डे मग्नत्वं च सूच्यते । ताभ्यां परमानन्दसुखात्मिका चिरजीविता ध्वन्यते । तथा पूर्वजन्मनि अल्पायुष्ट्वम्, अजितबलायाः सिद्धत्वं सम्प्रति अयलापन्नत्वं च व्यज्यते ।

अत्र शेषमानदेवियातपदानि दिक्षु परिस्थाप्य मध्ये तातपदम् । क्रमेण तानि तातपदेन सम्बन्धनीयानि शेषतातेति । पुनर्मानतातपदेन शेषमानतात इति एवं देवि तातपदेन शेषदेवितातेति पुनर्यात तातपदेन शेषयाततातेऽपि पुनःशेषतातेन शेषतात इति ४ ।

शेषतात मानतात देवितात याततात शेष मान तातमान मानतात देवि, मान तातयात मान तात । शेषदेवि तात मानदेवि तातदेवि देवितात । यातदेवि तात शेष यात तात । मान यात तात देविं यात तात यात तात शेष तात मानशेष तातदेवि शेष तात यातशेष तात ।

(ग्लौ अशोकमञ्जरी **इत्यशोकमञ्जरीछन्दः** ।)+

कृतपरिकरबन्धं रुद्धनाशा(सा)दिरन्ध्रं
गतपवनविकारं दृष्टिमार्गेऽप्यगम्यम् ।
उपगतदृढभग्नं वीक्ष्य लक्ष्ये निषण्णं
विगलितदृढसत्त्वाः क्षोभमापुः क्षणेन ॥ ३२ ॥ (मालिनी)

वज्रासननिबन्धेन षडिन्द्रियजये कृते ।
ध्यायमानाऽपि सा देवी चिरयत्यत्र किं मयि ॥ ३३ ॥ (अनुष्टुप्)

[ततः प्रविशत्याकाशयानेन श्रीमदजितबलादेवी]

(नेपथ्ये)

यथावद्ध्यानमुद्रायां स्थितेऽस्मिन् विजयप्रभौ ।
द्योतयन्ती त्विषा विश्वं सैषा देवी समाययौ ॥ ३४ ॥ (अनुष्टुप्)

---

+ **हैमछन्दोऽनुशासन** – द्वितीय अध्याय पृ. ९८.
ग्लावशोकमञ्जरी – ग्लावशोकपुष्पमञ्जरी ॥ ३९८ ॥
यत्र यथेष्टं निरन्तरौ गुरुलघू प्रयुज्येते, सोऽ**शोकपुष्पमञ्जरी** नामा दण्डकः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**देवी-** (तं तथा दृष्ट्वा) –

नमस्कारपरब्रह्मलीनो विघ्नशतैरपि ।
न यः क्षोभयितुं शक्यः स एष मम पुत्रकः ॥ ३५ ॥ (अनुष्टुप्)

(सानन्दम्) वत्स ! विरम ध्यानात्, लभस्व स्वसमीहितम् । मुञ्च ध्यानावेशक्लेशम् ।

शेषमानदेवियातराजनाथनागदेवतात ।
याततातमान शेष राजमानदेवराजमान देविनाथमाननाग ।

नाथमाना देवी तुष्टा सती यागं प्रयच्छति । हे वत्स ! विजय ! स्थिरत्वात् शेषकल्पः स्थिरत्वं कार्यसिद्धावंगं वियातप्रगल्भ उपायज्ञ मानदे पूजाप्रदे ना(ग)मदे दुष्टखण्डके माने आत आगच्छ । सिद्धत्वात् तं तातं यागं अवपालय तत्रैव च राज शोभस्व नाथ स्वामी भव, एवं च सिद्धप्रयोजनत्वादिष्टान् देवताविशेषान् अत पूजार्थं गच्छ । तत्र प्रधानत्वात् शेषराजं तथा देवराजं परमैश्वर्यवन्तं पृथिवीमण्डलाधिष्ठातारमिन्द्रम् । स्वर्गगमनेन तत्सिद्धिरुक्ता । तथा देविनाथं दीव्यन्ति क्रीडन्ति सर्वत्रेति योगिनस्तेषां नाथं तव गुरुमाज्ञासिद्धमनेन सर्वत्र अस्खलितक्रीडात्वं ध्वन्यते । नागानां पातालनिवासिनां यागमण्डलाधिष्ठातृणां नाथान् ता विस्तृतः सन् गच्छ पातालगामिनां चाह तेषां पूजां च गृहाण तुष्टा हि ते सर्वे तव सत्त्वातिशयेन प्राणो हि सर्वेषां भवान् संवृत्त इति प्रत्येकं विवक्षितसम्बन्धत्वात् आने(ते)ति भूयसा निर्देशः अनेन अणिमादीनां सिद्धिरुक्ता । तत्र चतुःकोणं पृथ्वीमण्डलं संस्थाप्य चतसृषु दिक्षु अग्निमण्डलं मध्ये चाऽप्मण्डलं तत्राग्निमण्डलमूर्द्धनि क्रमेण शेषमानदेवियातपदानि, पृथिवीमण्डलकोणेषु राजनाथनागदेवपदानि, मध्ये तातपदं संस्थाप्य तातपदं मानेन सम्बन्धनीयम् । ततः शेषराजपदं मानेन ततो देवराजपदं ततो देविनाथपदम्, ततो नागनाथपदमिति स्थापना ।

अनेन स्थिरः सन् तेजोमयरूपः अमृतवर्षी चिरञ्जीवेति सूचितम् ।

**देविप्रभा-** [४२]तत्तपवंचणा ! पच्चक्खीभूदा देवी । ता एहि मंडलसंनिहिदा हवेमो ।

**तत्त्वप्रपञ्चनः-** एवं क्रियते । (सर्वे तथा कुर्वन्ति, तुष्टा देवी देविप्रभां वर्द्धापयति)

४२ **देवि.** तत्त्वप्रपञ्चन ! प्रत्यक्षीभूता देवी । तावद् एहि मण्डलसन्निहिता भवामः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

हे देविप्रभे ! मानव्येव भवती मनोरपत्यं तव भर्त्ता दृढप्रतिज्ञत्वात् कथमन्यथा दुष्करममुं यागं साधयति । अनेन साजात्यवैवाह्ये सपत्नीत्वं सूचितम् । शेषराजं यावत् चन्द्रं यावत्, अगं सुमेरुं यावत् अशेषचन्द्रमा परिपूर्णचन्द्रोज्ज्वला तातयागस्य तता या मा लक्ष्मीः सा तावत्कालं राजतामेव । सर्वेषां मानदानाय पूजाप्रदानाय च विदे ज्ञानार्थं चेति ।

याग याग, देव तात, देवि देवि, शेष शेष, चन्द्र चन्द्, मान मान, राज राजेति श्लोकः कोष्ठकत्रये यागया इति द्वितीयपंक्तिकोष्ठके तात इति उपरितनकोष्ठकद्वये चन्द्रराज इति अधस्तनेऽपि चन्द्रराज इति मूर्ध्नि च देव इति अधः देवि इति मध्ये मा इति तदधो न इति मुखे शेष इति **पदकबन्धः** ।

(नेपथ्ये)

ता एताः प्रथिताः कुतोऽपि सहसैवाष्टौ महासिद्धयो,
देव्याः पादपुरः स्थितं विजयिनं प्राप्ता वरीतुं द्विजम् ।
नृत्यत्वप्सरसां गणः प्रमुदिता गायन्त्यमी किंनरा,
योगिन्यः सकला अपि स्वसदनं गच्छन्तु दत्त्वाऽऽशिषः ।। ३६ ।।
(शार्दूल.)

**देविप्रभा-** तत्त्वप्रपञ्चन ! इत ऊर्द्ध्वं चरुपाकाय प्रस्तुते कर्मणि प्रवर्तितव्यम् । तद्दिव्यदुग्धमपि समायातमेव जानीहि ।

(इत्युक्त्वा विजयस्य कण्ठे पारिजातमालामारोप्य तिरोदधे)

[ततः प्रविशति पाटलिपुत्रस्थः परमानन्दः]

**परमानन्दः-** अहह वैचित्र्यं किमप्यस्य सिद्धाश्रमस्य !

स्वस्था यत्र मृगी मृगारिनखरैः कण्डूयते स्वं वपु-
र्यत्र छागवृकौ भुजङ्गनकुलौ प्रीत्या मिथः क्रीडतः ।
तस्मिन्नत्र समस्तवैरशमनेऽप्येकः परं नोज्झति
क्रोधं धर्महरिः पलायनपरे दीनेऽपि पापद्विपे ।। ३७ ।। (शार्दूल.)

तदभ्यन्तरं प्रविशामीति (परिक्रम्यावलोक्य)

कृत्वा देवार्चनं सैष प्रभुरास्थानमञ्चति ।
लीलालापैरपि ब्रह्म प्रपन्नेषु तनोति यः ।। ३८ ।। (अनुष्टुप्)

(उपसर्प्य) नमो गुरुभ्यः (इति साष्टाङ्गं प्रणमति)

**आज्ञासिद्धः-** अयि परमानन्द ! हर्षाकुल इव दृश्यसे, कुतः सम्प्रत्यागम्यमानमस्ति ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**परमानन्दः-** अष्टापदात् । परमद्य मार्गे समागच्छता अद्भुतमदर्शि ।

**आज्ञासिद्धः-** किम् ?

**परमानन्दः-** अवधत्तां प्रभुः ।

गोनर्दनगरनद्यास्तीरे नागेन्द्रभूषिते नित्यम् ।
अजितबला सा देवी दृष्टा साक्षाज्जगज्जननी ।। ३९ ।। (आर्या)

**आज्ञासिद्धः-** (सविस्मयम्) किं प्रत्यक्षीकृता विजयेन ।

**परमानन्दः-** न केवलं प्रत्यक्षीकृता वितीर्णफलाऽपि तस्मिन् समजनि ।

**आज्ञासिद्धः-** किं महाचरुपाकोऽपि तत्र संवृत्तः ।

**परमानन्दः-** अथ किम् ।

**आज्ञासिद्धः-** कथं कथम् ?

**परमानन्दः-** अवधारयन्तु प्रभुपादाः ।

देवीप्रसादमधिगम्य स कामधेनोः, स्तन्येन लब्धपरमाक्षतमिश्रितेन ।
कृष्णेन खेचरसमाहृतचित्रकेण, प्रज्वालिते चरुमुरुं पचति स्म वह्नौ ।। ४० ।।
(वसन्ततिलका)

तत्प्राशनादथ वधूद्वितयेन सार्द्धं सिद्धस्य तस्य निखिला अपि सिद्धयस्ताः ।
सिद्धाः क्षणादपि गुरुर्जयतीति वक्तुः सिद्धव्रजः
स निखिलोऽपि चकार सेवाम् ।। ४१ ।।
(वसन्ततिलका)

ततोऽञ्चितः सिद्धकदम्बकेन, सिद्धैः समस्तैरभिनन्द्यमानः ।
सुतेन मित्रेण सह प्रियाभ्यां, द्रष्टुं गुरोः पादयुगं समेति ।। ४२ ।। (उपजातिः)

[ततः प्रविशति यथानिर्दिष्टो विजयः]

**विजयः-** अमी ते गुरवः शुक्ल-ध्याननिर्णिक्तचेतसः ।
निष्पन्दाक्षमवेक्षन्ते, मम पन्थानमुन्मुखाः ।। ४३ ।। (अनुष्टुप्)

(उपसर्प्य सपादोपग्रहम्)

आत्मना प्रेक्षमाणाय, नित्यमात्मानमात्मनि ।
परब्रह्मानुरक्ताय, चिद्रूपाय नमोऽस्तु ते ।। ४४ ।। (अनुष्टुप्)

(इतरेऽपि नमस्कृत्य यथास्थानमुपविशन्ति)

**आज्ञासिद्धः-** (शिरसि स्पृष्ट्वा)

प्राचीनजन्मसमुपार्जितदिव्यविधे, कामाशिषं त्वयि वयं वितराम एते ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

शिक्षा त्वियं मनसि पुत्रक ! धारणीया, देव्याः
समाधिविषये नहि यद् विरम्यम् ॥ ४५ ॥ (वसन्ततिलका)

प्रसङ्गायातं च किञ्चिदाशास्महे –

तस्मिन्नेव गिरौ प्रसिद्धनगरे मायापुरीसंज्ञके
तां विद्याधरचक्रवर्तिपदवीं प्राप्नोत्वयं ते सुतः ।
सर्वत्रास्खलितप्रचारविभवैः सिद्धैस्त्वमेभिर्वृतो
नन्द्याः पुण्यवधूद्वयाञ्चिततनुर्यावत् त्रिलोकीतलम् ॥ ४६ ॥
(शार्दूलविक्रीडितम्)

(अथाङ्के समुपवेश्य पाणिपङ्कजेन मुखमुन्नमय्य) तात ! किं ते भूयः प्रियमुपकरोमि ।

**विजयेन्द्रः-** अतः परमपि किं प्रियमस्ति । तथापीदमस्तु ।

अजितदेवचन्द्रशेषराज विदितनाथयागतातमान ।
सुभगनागयाग देविभाग हृदय याहि पाहि धेहि शं नः ॥ ४७ ॥

ये केनचित् विद्याविशेषेण न ज(जी)यन्ते तेषु दीव्यसि तेषु राजसे तान् वा देवयसि क्रीडयसि उत्कृष्टाष्टाङ्गमहानिमित्तसमन्वितत्वात् श्रीमता-**देवचन्द्रेण** श्रीशेषभट्टारकेण शेषराजेनापि विदित ज्ञात, जानीते हि ज्ञास्यति च त्वां श्रीशेषभट्टारकस्तत्पूजया ऽवाप्तमहानिधित्वात् तथा विदितनाथेभ्योऽपि परमयोगिभ्योऽवाप्तं विस्तृतं माननं-पूजनं तत्त्वया, नाथा अपि सिद्धपुत्रत्वात् अष्टाङ्गं महानिमित्तज्ञातृत्वेन पूजयन्ति तेषां गुरुत्वात्, किं पुनरन्ये गुरुलाघवादिवद् धर्मप्रधानत्वात् प्रधानसौभाग्येन पूज्या देविनी भा प्रभा भवतो, यत आहितातमाप्रभृतयो महाप्रभावा अपि सोढुं न शक्ता न च वैरायंतो(ते) अग कठिनानां हृदये यासि कथमन्यस्य(था)कठिनहृदया नाथा(:)पूजयन्ति भवन्तम् । समाधिशब्द-त्वात् अहीन(न्) दुष्टान् ये रक्षन्ति दुष्टनागाः अहयश्च तानपि धारयसि पोषयसि निर्भयत्वात्, को हि त्वत्तो अन्यः शक्तिमानप्यात्मसन्निधौ वैरिणो बिभर्त्ति कियन्तो वा तवातिशया वर्णयितुं शक्यन्ते । भवत्प्रसादावाप्तसर्वसमीहितसिद्धिरहमिति प्रार्थनीयं नास्ति, सुखं च नः मम चन्द्रलेखाया देव्याश्च सपुत्रायाः तव प्रसादाद्विजयी च संवृत्तः । विजय इति नाम्ना च प्रसिद्धिमाप एव एतच्चाशास्महे ।

अजितदेवचन्द्र शेषराज विदितनाथ यात तात मान ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

सुभगनाग याग देविभाग हृदय याहि पाहि धेहि शं नः ॥

बलवताऽपि ये न जीयन्ते तानपि खण्डयन्ति या प्रभा तया अग कठिनहृदये आगच्छ विशेषेण दिताः खण्डिताः नाथाः स्वामिनोऽपि यया सुभगनागया अतिशयवत् सौभाग्यसमन्वि[त]तया अगवत् सु[मे]रु-शैलवत् परिदृढा देविनी विलसनशीला यका भा प्रभा तया कठिनानां हृदये कठिनहृदयवत्सु वा इहीति पूर्वेण सम्बन्धः । राज च (स्व) तत्र स्वेन च रूपेण एवंविधप्रभया सह तेष्वागच्छ । तेऽपि तव प्रभावादस्माकं यत् सुखं तच्छालिनो यथा भवन्ति ।

कठिना आत्माबहुमानित्वेन आराधने न यतन्ते पाषाणहृदयास्तु सत्त्वरहितत्वादज्ञानदिग्धत्वाच्च भवन्तमाराधयितुमशक्ता, न च त्वदाराधनं विनोत्तमं सुखमवाप्यते इति म[त्व]दाराधनेनैव सर्वं जगत् सुखोपेतं विधेहि पाहि च जीवलोकमिति हि प्रसत्तिर्यथा तेषां तता विस्तृता तमा अज्ञानरूपा न भवति, नहि पूर्वं भवानेवंविध इति आह्लादकत्वपरिपूर्ण-कलत्व-अमृतमयत्व-प्रकाशत्व-मार्गदर्शित्वादिभिः चन्द्रमपि शेषयति लघूकरोति यः स चन्द्रशेषः स इव त्वं स्या इति निश्चिनोमि कथमन्यथा एवंरूप इति । महिषीरूपमिव महिषीवेयमाकृतिरितिवद्भिन्नक्रमेणैव सम्बन्धात् चन्द्रशेष इव त्वं हे आज्ञासिद्धयोगिन् **अजितदेवे**त्यादिविशेषेण विशिष्टया प्रभया सह मानिनाममानिनां च हृदये आगच्छ तत्रैव च राजस्वेति यथा तेऽपि अजिता नाथनाथाः सौभाग्यनिधयः प्रभास्वरा नित्यसुखशालिनश्च जायन्ते इत्याशास्महे ॥ छ ॥

[इति निष्क्रान्ताः सर्वे]

अथ **सुधाकलश**श्लोकः-

यागयाग देविदेवि तात तात देव देव ।
शेष शे[ष] राज राज चन्द्र चन्द्र मान मान ॥ ४८ ॥ (अनुष्टुप्)

एकस्यां बाह्यपङ्क्तौ यागया वाक्षराणि द्वितीयपङ्क्तौ तात तावेति मध्यपङ्क्तौ षचन्द्रवेति । द्वितीयपङ्क्तौ ष राज स इति, अधस्तात् नेति मध्ये मा इति कलशमुखे विशिवि इति, मूर्ध्नि बुध्ने इति **कलश-स्थापना –**

हे मानव मनोरपत्यविजयदेवेति उपलालनायां पुत्रत्वादद्- भुतक्रिया-



Jain Education International For Private & Personal Use Only www.jainelibrary.org

कारित्वेन कृतसकलजनचमत्कारत्वाद्वा यावत् चन्द्रमा यावत् शेषराजस्य मा लक्ष्मीः । यावत् अगस्य सुमेरोर्लक्ष्मीः तावदेव तता या विस्तृता कृतिः प्रकरणरूपा तस्यास्तता या मा तता माहात्म्यं राजतां अशेष-चन्द्रोज्ज्वलपरिपूर्णचन्द्रमसा तुल्या तता विस्तृता देविता क्रीडनशीला वियाता प्रगल्भा जायते हि अमूं कृतिं परिशीलयतां कविपुङ्गवानां वाचि चित्रे[त्ते]च प्रागल्भ्यम् किमर्थं तव मानदे पूजार्थं विदे ज्ञानार्थं च ॥ छ ॥

धवलयति सुधाभिर्यावदिन्दुस्त्रिलोकीं
जनितजनसमृद्धी शेषराजाङ्गराजौ ।
कृतसकलविशेषौ नन्दतस्तावदेषा
विलसतु जगति **श्रीदेवचन्द्र**स्य कीर्त्तिः ॥ ४९ ॥ (मालिनी)

अपि च –

विद्याम्भोनिधिमन्थमन्दरगिरिः **श्रीहेमचन्द्रो** गुरुः
सान्निध्यैकरतिर्विशेषविधये श्रीशेषभट्टारकः ।
यस्य स्तः कविपुङ्गवस्य जयिनः **श्रीदेवचन्द्र**स्य सा
कीर्तिस्तस्य जगत्त्रये विजयतां शार्दूललीलायितैः ॥ ५० ॥
(शार्दूलविक्रीडित्)

इति **श्रीदेवचन्द्र**मुनिप्रणीत**चन्द्रलेखाविजयप्रकरणे**
निर्वहणसन्धौ महासिद्धिलाभो नाम पञ्चमोऽङ्कः ॥ छ ॥

कलयति भुजगेन्द्रो मौलिना यावदुर्वी
प्रमदमुकुलिताक्षा[स्ता]वदेते कवीन्द्राः ।
नवरसवसति**श्रीदेवचन्द्र**प्रती[णी]त –
प्रकरणमधुधारां श्रोत्रपात्रैः पिबन्तु ॥ ५१ ॥ (मालिनी)

❊ ❊ ❊



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# परिशिष्टम्-१

## अकारादिक्रमेण नाटकान्तर्गतश्लोकानां सूचिः ।

(प्रथमाङ्केन अङ्कसङ्ख्या द्वितीयाङ्केन श्लोकसङ्ख्या ज्ञेया ।)

| | |
|---|---|
| अज्ज कयत्था जम्मा | १-४४ |
| अजितनाथ देव विदित | ४-३६ |
| अजित देव चन्द्रशेष १-२८, | ५-४६ |
| अणुमन्नसु जामि घरं | ३-१५ |
| अद्यैव तज्जन्म कृतार्थ | ४-३८ |
| अनुज्झतस्तत्त्वहितो | १-२० |
| अप्येतस्यामुदयति | १-३७ |
| अमी ते गुरवः शुक्ल | ५-४२ |
| अमुणिय परमत्थेहिं | २-४ |
| अये सेयं दोला तिलक | ३-२२ |
| अर्हत्सिद्धाचार्योपाध्याय | १-२९ |
| अव्यक्तः प्रभुरद्भुतेन | ५-१९ |
| अवद्यमनवद्यं स्यात् | ३-२७ |
| अस्याः समस्तविपदा | २-२३ |
| आणासिद्धगुरूहिं गुरुया | २-२ |
| आत्मना प्रेक्षमाणाय नित्य | ५-४३ |
| आनन्दकन्दलीकन्द शत | ५-२६ |
| आपद्गते प्रणयिनि प्रलय | ३-४२ |
| आलिङ्गन्तो गगनतटिनी | ३-६ |
| आवर्त्य तारककदम्ब | ४-२४ |
| आसेदुषः स्वजन | १-१८ |
| आः किं व्योमभुवः पत | ५-२३ |
| इतः कुसुमसायकः | २-२२ |
| उच्चैर्विशालमुत्कृष्ट | ५-६ |
| उज्जृम्भमाणनवकाञ्चन | ३-१० |
| उदञ्चति कुचस्थलात् | ३-२३ |
| उद्दामव्यात्तवक्त्रज्वलद् | ५-२८ |
| उम्मीलिदकुमुएहिं | २-१५ |
| ऋजुहृदय किमेतज्ज्ञात | ३-३८ |
| एकाकिनी कथमगात् | ३-३७ |
| एकाकिनैव वीरेण | २-७ |
| एक्काणं सलहिज्जइ | २-९ |
| एका प्रयाति कथमप्यपरा | ४-२८ |
| एतद् विमानमभितः कृत | ५-१४ |
| एताभिरेव सकलोप्युपहार | ५-१३ |
| एतारिसं गिरिकन्दरे तुह | ३-३१ |
| एतेऽष्टास्वपि दिक्षु | ५-११ |
| एते तिग्ममहःशशिध्रुव | ५-२७ |
| एदस्सा नवपिम्मभाव | २-३ |
| एनमेव कुरु दूरवर्तिनं | ४-२१ |
| एस कक्कसमणो निसायरो | २-२१ |
| एसा जं तनयं जणिस्सदि | २-५ |
| एसो जहा दिणमणी | ४-४२ |
| एषा काचित् कवलनविधा | ५-२९ |
| एसा मृगी वलितकन्धर | ३-४० |
| कइया सहि सो भत्ता | ४-२ |
| कयाऽपि युवत्या हरभाल | ४-२२ |
| करुणं काऊण परं देउ | २-४० |
| कस्तैः समस्त्रिजगति | १-२७ |
| कान्तावियोगवडवानल | १-२६ |
| कामः पञ्चशरः किलेति | ४-१३ |
| किं किं पुव्वभवे थिरेण | २-११ |
| किं चित्रं नववल्लभा | १-४९ |
| कित्तियकालं कुसलं | ४-११ |



Jain Education International For Private & Personal Use Only www.jainelibrary.org

किमु निशि हिमपिण्डैरात्त ३-१९
कुकूलतितरां तनौ ४-१४
कृतकृत्येन मित्रेण ३-४१
कृतपरिकरबन्धं रुद्ध ५-३१
कृत्वा दैवार्चनं सैष प्रभु ५-३७
क्षुण्णे मार्गे सूत्रयन्तः १-१४
गगनतलमलङ्घ्यं १-२१
गन्तव्यं पुनरेव तत्र ४-८
गुरुसन्निहगमणमिसा ३-५५
गुरूणामादिशिष्येण खेचरेण ५-१५
गृह्णाति स्म सखीजनस्य ४-१९
गोनर्दनगरनद्यास्तीरे ५-३८
गोनर्दनगरात्स्वर्गो विश्वं ५-१०
घोरं फोसिय घोस २-२६
घोरैः खड्गप्रहारैः कर ३-५३
चन्द्रमानयागविदित २-१७
चन्द्रोऽयमेकः क्रियते ४-२५
चिन्मयमूर्तिः परमो १-१
चेतः कथं विधुरतां ४-२९
जं थंभो चलणेसु १-४६
जं दीणं विरहिजणं २-१६
जं दूरट्ठिदवल्लहेण २-३६
जं पारिजायकुसुमप्पयरो ५-२७
जत्थ सदोदिदललिदा ३-३
जहूरे स कदो पिओ २-६
जादो वि नेय मुणिदो २-१२
जो अमयवुट्ठिसरिसो २-३८
जो च्चिय पियसंभोओ २-७
ज्योत्स्नापूरं ननु कथमलं ४-२३
ज्ञानदर्शनचारित्रत्रयं १-४३
झंझानिलसारिच्छं सहस ५-२
तं वेयड्ढगिरिनिवासम् १-३९
तत्प्राशनादथ वधूद्वितयेन ५-४०
ततोऽर्चितः सिद्धकदम्बकेन ५-४१
तथेव कान्तया युक्तः ४-७
तनयस्य च पत्न्याश्च ४-१२
तरुश्रेणिः सेयं सुरभि १-३५
तस्मादेतत्प्रसादव्यपगत २-४१
तस्मिन्नेव गिरौ प्रसिद्ध- ५-४५
तस्मिन् पुराभव १-२२
तस्या एव पदाम्भोज १-५४
ता एताः प्रथिताः कुतोऽपि ५-३५
ता किं तुअ इह कज्जे ५-३
त्रिभुवनजयोद्दाभभ्राम्य १-२
त्वं येनापहृता पूर्वं भ्राता ५-२४
दक्षिणाक्षिभुजस्पन्दो १-४१
दवतमसविटंका ३-५४
दसणवलिदसुंडो १-५०
दूट्ठावयाावियडसंकड २-१
दूरंगते प्रियतमे प्रसर २-१८
दूरं चत्ते वि नगे तुह ३-२५
दूरध्वस्तसमस्त २-३२
दूरे कुरुष्व शशिनः ४-२०
दृशोरेका वृत्तिः वचसि १-४७
दृष्ट्वा कूपमगाधं ३-५१
दृष्ट्वाऽन्धकारकलितं १-४
दृष्टः क्वापि श्रुतो वा १-६
देवः पातञ्जलिः सिन्धुर्नदी ५-७
देवीप्रसादमधिगम्य स ५-३९
देवो सिरि अजियजिणो ३-३३



Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | |
|---|---|
| दोलान्तरालतरलं वदनं | ३-२४ |
| धवलयति सुधाभिर्यावद् | ५-४८ |
| धिक् सर्वं भवचक्रवर्ति | ४-३४ |
| धौते चन्द्रमरीचिसान्द्र | ४-४१ |
| नक्तं दिनं विषमबाण | ४-१७ |
| न कयापि तुम्हाणं | ३-२९ |
| नत्वा क्रमोद्धारमयं | ५-२२ |
| न त्वेषा पदवी तनोति | ३-५ |
| नमदविरलशाखाहस्त | २-१३ |
| नमस्कारपरब्रह्मलीनो | ५-३४ |
| नवोन्मीलन्नीलोत्पल | १-३३ |
| नान्ते गुरूणां न पुन | ४-३० |
| नायं ललाटे कान्तायाः | ३-२० |
| निब्भच्छिदमुत्ताहल | ३-८ |
| नियतदिनमवेत्य | १-१७ |
| नीरक्षीर विवेकमेकम | १-४८ |
| नीलीरागमकृत्रिम | ३-४१ |
| नेयं भालतले तिर्यक् | ३-२१ |
| नैते दीपाः स्थापिताः | ५-१२ |
| पक्षद्वन्द्वममन्द | १-४२ |
| पथादित्याशासे इति | २-२० |
| परिम्लानं वक्त्रं | १-२४ |
| पश्यामि मित्रमहमत्र | ३-४६ |
| पातालान्तः प्रविश्य | १-६० |
| पातालवासी विकटाक्षनामा | ३-४७ |
| पिच्छ वयंसि विवायं | १-५२ |
| पुत्रोत्पत्तिसुखानन्द- | २-३४ |
| पुष्यन्ती रजनीचरान् | २-१४ |
| पूर्ववैरानुबन्धन- | १-५७ |
| पृथुलकुचा सद्वंशा | १-३८ |
| प्रणयं मनसि दधत्या | ३-२८ |
| प्राचीमुखं भजति कुंकुम | ३-५७ |
| प्राचीनवन्मत्स्मृति | १-३१ |
| प्राचीनजन्मसमुपार्जित | ५-४४ |
| प्राणेभ्योऽप्यधिकं नियुज्य | ५-१८ |
| प्रियविश्लेषसन्ताप | ४-१ |
| प्रेम्णो धनस्य पठितस्य | ४-४ |
| बद्धानुरागाय सदैव मुक्तौ | ५-२० |
| बाष्पप्रवाहसलील | १-२५ |
| भयवं फुडु अवियारिय | ३-४८ |
| भविष्यत्यचिरेण | १-५३ |
| भाषाः प्रपञ्चितरसा | १-१५ |
| मन्त्रन्यस्तहृदेषा | २-२८ |
| मनुष्यस्यापि तद्दिव्य | १-५१ |
| मम त्वं च द्विजस्यास्य | ४-३३ |
| मा गाः खेदं क्वचिदपि | ३-४४ |
| मान्धातृप्रमुखान् विहाय | १-८ |
| मा पतिज्ञ नराणं | ४-१० |
| मा वच्चसु पिय असिं न | ३-१३ |
| मित्रापदि गतेनाद्य | ३-४५ |
| मृत्युतुलामधिरूढं | २-२४ |
| मृत्योर्मुखाद्यतिरसौ | १-५५ |
| मोत्तूण पिम्मगहिलत्तेण | ५-५ |
| यथावद्ध्यानमुद्रायां | ५-३३ |
| यद्वस्तु तापोपशमाय | ४-१८ |
| यदि कथमपि जातस्तापस | ३-३९ |
| यस्यैषा पदपङ्क्तिः | १-३० |
| याग याग देवि देवि ५-२१, | ५-४७ |
| यावद्दुष्टमिमं हत्वा | ३-३२ |
| याहि पाहीति सम्प्राप्ता | ४-३५ |




Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | | | |
|---|---|---|---|
| युक्तं यज्ञनयनिवेष | ३-४ | श्रद्धासारा मालिनी यस्य | २-३१ |
| येनाशेषमपीदमन्धतमसं | १-५ | श्लोकानामिह षण्णां | २-१९ |
| येषां सर्वजने मनः | १-३४ | श्वापदभयेन पार्श्वे | २-२५ |
| योगिन्यश्च चतुरधिका | ५-१६ | संज्ञानवर्म हृदये विनि | २-३९ |
| यो भाष्यार्णवमन्थ | १-११ | संसारोर्जितकर्ममर्म | १-१३ |
| रक्षो निजप्रियतमा | २-३३ | स जातमात्रोऽपि निज | ३-१ |
| राज्यं शासति किं त्वयी | ४-४७ | सततमामनुक्तं त्यक्त्वा | ३-२६ |
| राज्यालङ्करणाय यातु | ४-४३ | सततं सन्निधिवासाद् | १-१९ |
| राहोर्जडत्वमसमं सखि | ४-२६ | सतां तत्त्वोपदेशेन | १-४० |
| रे पाप प्रकटं मम प्रियतमां | ३-५२ | सदेनामुद्दामज्वलन | १-५८ |
| लक्ष्मीः प्रेम च घटितं | ३-१६ | सन्ध्यावधूं भजति | ३-३० |
| लायण्णलच्छिविणिभ | १-५६ | स ब्रह्मसूनुर्दयिता | ४-३२ |
| लीलागारे लिखितमसकृच् | ४-१६ | सम्भाषणेऽपि शयनेऽपि | १-३२ |
| लीलावासः कुसुमधनुषो | ४-२७ | सर्वगुणेष्वप्यस्मिं | ३-१७ |
| लुक्का पुव्वदिसाए एस | ३-१८ | सर्वथा दुर्निवारोऽयं | ४-३१ |
| वज्रासननिबन्धेन षडि | ५-३२ | स लहिज्जइ एस परं | ३-११ |
| विकचकमलचक्रा | ३-९ | सहस्रभानुः फलरत्न | ५-२५ |
| विकटकरजकोटी | १-५१ | सहस्ररत्नसंकाशा | ४-३७ |
| विकलः स्वस्थितचेष्टो | १-९ | सिद्धिं दिशन्नपि ममाद्य | ४-५ |
| विगतसकलदोषा | २-३० | सुभुवनमभिपुनानः | ३-७ |
| विगतसकलदोषं | २-२९ | सुरकरिसरिसकरीहि | ५-१ |
| विततविटपिशाखा | १-३६ | सुसहो पियरवियोगो | २-८ |
| विद्यापहारान्तरदुष्ट | १-२० | सूरो वि हु एक्कंगो | ३-३५ |
| विद्याम्भोधिमन्थमन्दर | ५-४९ | सैषा देविप्रभादेवी | ४-३९ |
| विपुलमतेरपि कस्मात् | ३-४३ | सोऽयं सिद्धः प्रमुदितमना | ५-३० |
| विरहानलतत्ताए तिस्सा | ३-४ | सो देवदूसवसणाइं | ३-२ |
| वैवर्ण्यं तनुते यदेतदु | ४-१५ | सो पियविरहो सो चाओ | २-३७ |
| व्योमाभोगविजृम्भि | १-३ | स्निग्धान्धकारकलिता | ३-५० |
| व्रजत्यधोऽधो यात्यु | ४-६ | स्फुरत्परभृतस्वरा | ३-१४ |
| शेष मान शेष यान | ३-५६ | स्ते रामचन्द्रप्रभुखा | ४-९ |




Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

| | | | |
|---|---|---|---|
| स्मरसि किमिह मुग्धे | ३-१२ | हविहसि ताणं मज्झे तं | ५-४ |
| स्रोतोभिः क्रमशस्त्रिभि | १-१२ | हसियसिहिकलावो | १-४५ |
| स्वस्था यत्र मृगी मृगारि | ५-३६ | हा हा एस पयंडो | ३-३४ |
| स्वैरं समुल्लसतु | १-२३ | हा सव्वसुंदर ह हा तय | २-३५ |
| हं पुण एवं मन्ने कमला | ५-८ | हे सावया सुणध दाव | २-१० |
| हतः सपदि रक्षित | ३-३६ | हृदय देविभागसुभग | २-२७ |


## परिशिष्टम्-२

(प्रथमअङ्के (पृ.१३) उल्लिखित)

### "या सा सा सा" कथा

(त्रिषष्टि० पर्व १० सर्ग ८)

आयोजनविसर्पिण्या सर्वभाषानुयातया ।
गिरा श्रीवीरनाथोऽथ विदधे धर्मदेशनाम् ॥ १८७ ॥
सर्वज्ञोऽसाविति जनाच्छ्रुत्वैको धन्वभृत्पुमान् ।
संशयं मनसाऽपृच्छद् दूरस्थो जगद्गुरुम् ॥ १८८ ॥
तं बभाषे जगन्नाथो वचसा पृच्छ संशयम् ।
अन्येऽपि प्रतिबुध्यन्ते भव्यसत्त्वा अमी यथा ॥ १८९ ॥
इत्युक्तोऽपि त्रपानिघ्नो व्यक्तं वक्तुमनीश्वरः ।
स ऊचे भगवन् या सा सा सेति प्रमिताक्षरम् ॥ १९० ॥
एवमेतदिति स्वामी प्रोचे मुकुलिताक्षरम् ।
पप्रच्छ गौतमः स्वामिन् ! या सा सा सेति किं वचः ॥१९१॥
अथाचचक्षे भगवानिहैव भरते पुरि ।
चम्पायां स्वर्णकारोऽभूदेकः स्त्रीलम्पटः पुरा ॥ १९२ ॥
यां यां रूपवतीं कन्यामपश्यद् विचरन् भुवि ।
पञ्चस्वर्णशतीं दत्त्वा तां तां परिणिनाय सः ॥ १९३ ॥
पर्यणैषीत् क्रमादेवं स्त्रीणां पंचशतानि सः ।
सर्वांगीणाभरणानि तासां प्रत्येकमप्यदात् ॥ १९४ ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

वारकोऽभूद्यदा यस्याः सर्वालंकारभृत्तदा ।
स्नानांगरागलिप्तांगी तेन रन्तुं ससज्ज सा ॥ १९५ ॥
अन्यदाऽस्थुरुपशान्तवेशाः सर्वाश्च तत्स्त्रियः ।
अन्यथाऽशिक्षयत्ताः स तर्जनाताडनादिभिः ॥ १९६ ॥
अतीर्ष्यालुतया तासां रक्षणार्थं समुद्यतः ।
न जातु स गृहद्वारं सौविदल्ल इवामुचत् ॥ १९७ ॥
भोजनं स्वजनेभ्योऽपि न सोऽदत्त निजे गृहे ।
नाभुक्त स्वयमप्यन्यगृहे तासामविश्वसन् ॥ १९८ ॥
अन्यदा प्रियमित्रेणानिच्छन्नपि कथंचन ।
निन्ये निजगृहे भोक्तुमिदं मैत्र्या हि लक्षणम् ॥ १९९ ॥
तदा च दध्युस्तत्पत्न्यो धिगृद्धिं धिक् च यौवनम् ।
धिग्जीवितं च तिष्ठामो यद्गुप्ताविव यन्त्रिताः ॥ २०० ॥
यमदूत इव द्वारं पापः पतिरयं हि नः ।
न जातु मुंचति चिरादद्य साध्वन्यतो ययौ ॥ २०१ ॥
तिष्ठामः स्वेच्छया तावत् क्षणमद्येति बुद्धितः ।
स्नात्वाङ्गरागमाकल्पं वरमाल्यादि चादधुः ॥ २०२ ॥
यावद्दर्पणमादाय स्वं पश्यन्त्योऽवतस्थिरे ।
तास्तावदाययौ स्वर्णकारो दृष्ट्वा च सोऽकुपत् ॥ २०३ ॥
तत्रैकां महिलां पापः स तथाऽताडयद् भृशम् ।
यथा व्यपादि सा दन्तिपादाक्रान्तेव पद्मिनी ॥ २०४ ॥
मन्त्रयाञ्चक्रिरेऽथान्या हनिष्यत्येष नोऽपि हि ।
संभूय हन्मस्तदमुं रक्षितेनामुना हि किम् ? ॥ २०५ ॥
एवं विचिन्त्य तास्तस्मै चक्राणीव प्रचिक्षिपुः ।
शतानि पंचैकोनानि दर्पणानामशंकिताः ॥ २०६ ॥
विपेदे सोऽपि तत्कालं सानुतापाश्च ताः स्त्रियः ।
चितावज्ज्वालयित्वौको व्यपद्यन्त क्षणादपि ॥ २०७ ॥
सानुतापतया ताश्चाकामनिर्जरया मृताः ।
शतानि पंचैकोनानि मनुष्यत्वेन जज्ञिरे ॥ २०८ ॥
दैवदुर्योगतश्चौर्यजीविनो मिलिताः क्रमात् ।
एकत्र दुर्गे तिष्ठन्तश्चौर्यं संभूय कुर्वते ॥ २०९ ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

सोऽप्युत्पेदे स्वर्णकारस्तिर्यक्षु प्राग्मृता तु सा ।
तत्पत्न्युत्पद्य तिर्यक्षु पुत्रो विप्रकुलेऽभवत् ॥ २१० ॥
पंचाब्दके तत्र जाते तिर्यक्त्वात् स्वर्णकृत् स तु ।
तत्कुले भगिनीत्वेन तस्यैव समजायत ॥ २११ ॥
तस्याश्च पालकश्चक्रे पितृभ्यां स तु दारकः ।
अतिदुष्टतयाऽरोदीत् पाल्यमानाऽपि तेन सा ॥ २१२ ॥
उदरस्पर्शनं तस्याः कुर्वता तेन चान्यदा ।
गुह्ये कथमपि स्पृष्टा सा न्यवर्तिष्ट रोदनात् ॥ २१३ ॥
तद्रोदनप्रतीकारं तं ज्ञात्वा स तु दारकः ।
तस्या रुदत्यास्तत्स्थानस्पर्शं चक्रे तथैव हि ॥ २१४ ॥
तथा कुर्वन् पितृभ्यां सोऽन्यदा ज्ञातो निहत्य च ।
निर्वासितो निजगृहाद्ययौ च गिरिगह्वरे ॥ २१५ ॥
शतानि पंचैकोनानि दस्यवो यत्र तेऽवसन् ।
तां पल्लीं सोऽगमत्तैश्च चौरैः संयुयुजेतराम् ॥ २१६ ॥
तत्स्वसाऽनाप्ततारुण्याऽप्यभवत् कुलटैव सा ।
स्वेच्छया पर्यटन्ती च ग्रामे क्वाप्यन्यदा ययौ ॥ २१७ ॥
तैस्तस्करैः स तु ग्रामस्तदैवागत्य लुण्टितः ।
गृहीता दारिका सा तु भार्याचक्रेऽखिलैरपि ॥ २१८ ॥
तेऽन्यदाऽचिन्तयंश्चौरा यदेकेयं वराकिका ।
सर्वेषां सेवयाऽस्माकं मरिष्यत्यचिरादपि ॥ २१९ ॥
ते विमृश्यैवमानिन्युरपरामपि योषितम् ।
ईर्ष्यया पूर्वभार्या सा तच्छिद्राणि स्म मार्गति ॥ २२० ॥
चौराश्चौर्याय चान्येद्युर्ययुः साप्याप्य तच्छलम् ।
उपकूपं सपत्नीं तां निन्ये व्याजेन केनचित् ॥ २२१ ॥
ऊचे च भद्रे ! कूपान्तः किमप्यस्तीह पश्य तत् ।
साप्यृजुर्द्रष्टुमारेभे मध्ये क्षिप्ता ततस्तया ॥ २२२ ॥
आगता दस्यवस्ते च तां पप्रच्छुः क्व सा ननु ।
साऽवोचत् किमहं वेद्मि स्वप्रियां किं न रक्षथ ? ॥ २२३ ॥
तैर्ज्ञातमनया यत्सा वराकी मारितेर्ष्यया ।
दुःशीला मत्स्वसैषां किं विममर्शेति स द्विजः ॥ २२४ ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

सर्वज्ञोऽत्रागतोऽस्तीति श्रुत्वा लोकादिहागतः ।
प्रागेष मनसाऽपृच्छत् स्वसृदुःशीललज्जया ॥ २२५ ॥
मयोक्तं पृच्छ वाचेति **या सा सा सेति** पृष्टवान् ।
अस्माभिश्चैवमित्युक्त्वा तां जामिं ज्ञापितो ह्यसौ ॥ २२६ ॥
एवं च रागद्वेषाद्यैर्मूढात्मानो भवे भवे ।
भ्राम्यन्ति भविनो नानादुःखभाजनतां गताः ॥ २२७ ॥

## परिशिष्टम्-३

(सिद्धपुत्रलक्षणस्वरूपवर्णनात्मकाः सन्दर्भाः ।)

ननूप्रव्रजिताः सिद्धपुत्र सारुपि लक्षणा भिक्षाका जिनागमे श्रूयते यतो व्यवहारचूर्ण्यां-उक्तम् –

"जो अणुसासिओ न पंडिनियत्तो सो सारुवियत्तणेण वा सिद्धपुत्तेण वा अच्छिउं किंचिकालं, सारुविओ नाम सिरमुण्डो अरजोहरणे अलाउएहिं भिक्खं हिण्डइ अभज्जो य, सिद्धपुत्तो नाम सवालओ भिक्खं हिण्डइ वा न वा वराडएहिं वेंटलियं करेइ लट्ठिं वा धरेइ ॥" – इति ।

पृ. २९ हारिभद्रीय अष्टकप्रकरण – पञ्चमाष्टके अष्टमश्लोकटीकायाम् – (संस्कृत छाया)

योऽनुशिष्टो न प्रतिनिवृत्तः स सारुपिक्त्वेन वा सिद्धपुत्रत्वेन वा स्थित्वा कश्चित् कालम्, सारुपिको नाम मुण्डशिरा अरजोहरणः अलाबुकैः भिक्षां हिण्डते वा न वा बराटकैः वेण्टलिकां करोति (यष्टिं) व्यापारयति ॥

पच्छाकडित्ति जेणयचरणं पच्छाकडं कयंरम्मे ।
उक्खित्ता गिहीजाओ ससिहो भिक्खइ अभज्जो यं ॥
ससिहो सभज्जमोविय सिद्धपुत्तो सकूचिओ भणिओ ।
नो भिक्खइ सिप्पाइकम्मं काउण जीवेइ ॥
केविय भणंति पच्छाकडपुत्तो सिद्धपुत्तमो भणिओ ।
ससिहो वा असिहो वा सभज्जगो वा अभज्जगो वा ॥

संबोधप्रकरणे – हरिभद्रसूरिरचिते – गा. ३३-३३४

(संस्कृत छाया)

पश्चात्कृत इति येन च चारित्रं पश्चात्कृतं कृतं रम्यं ।
उत्क्षिप्त वा गृहीजातः सशिखो भिक्षतेऽभार्यश्च ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

सशिखः सभार्यगोऽपि च सिद्धपुत्रः सकूर्चको भणितः ।
नो भिक्षते शिल्पादिकर्म कृत्वा जीवति ॥
केऽपि भणंति पश्चात् कृतपुत्रः सिद्धपुत्रको भणितः ।
सशिखो वाऽशिखो वा सभार्यगोवाऽभार्यो वा ॥

गाथा ३३३ - ३३४

सभार्यकोऽभार्यको वा नियमा शुक्लाम्बरधरः क्षुरमुण्डः ।
सशिखोऽशिखो वा नियमेना दण्डकोऽपात्रकश्च सिद्धपुत्रः ॥

श्री क्षेमंकरगणीकृते (वि.सं. १४६६) षट्पुरुषचरित्रे–

पत्र - ९

अत्रावसरे देहद्युतिद्योतिताम्बरः शोभमान सर्वाङ्गश्वेतांबरः परमब्रह्मचारी सम्यक्त्वमूलद्वादशव्रतधारी आकाशगामी अवधिज्ञानी स्वपरसंमयपारीणः धर्मधुराधुरीणः श्री सर्वज्ञशासनप्रभावकः सिद्धपुत्रः श्रावकः रत्नत्रयोपलक्षण सुवर्णमय सूत्रत्रयधारको गगनमार्गेण तत्र राजसभायामयासीत्

पत्र - १०

भो धर्मशील ! को भवान् ! कुतः समायातः ! क्व गन्ता ! कस्य शिष्यश्चेति ! सप्राह - हे राजन् प्रथमार्हत्तीर्थे भरतेश्वरचक्रवर्ती साधर्मिकभक्त्याऽणुव्रतधारिणां ब्रह्मचारिणां पुरा काशिपुचिन्तामकरोत् ततस्तेषामाधिक्यं दृष्टवा रत्नत्रयपरीक्षापूर्वकं तदुपलक्षणं कनकरत्नमयं यज्ञोपवीतमदात् ते च ततः सर्वेषां महनीया अभवन् ततःश्री भरतान्वयेऽष्टभिर्नृपैस्तथैव परीक्षापूर्वं स्वर्णमयं ततः परमपरैः रुप्यमयं यावत् श्रीअजितजिनपिता ततः परं सूत्रमयं अभूत् तदनु ते ब्रह्मचारिणो नवमजिनान्तरे साधुव्युच्छेदे सतिप्रगते यतिधर्मे केपि मिथ्यादृष्टयोऽब्रह्मचारिणो गृहस्था अभूवन् केपि सम्यग्दृष्टयो वैराग्यभाजो ब्रह्मचारिणः तेषामन्वयेऽहं सिद्धार्थनामाश्रावको महर्षिकृत सिद्धपुत्रापरनामा श्रीपरमानन्दकेवलिपार्श्वे गृहीताणुव्रतो ब्रह्मचारी तच्छिष्योमेरुगिरौ कृतपात्रः शत्रुञ्जयं प्रतिप्रस्थितो व्योममार्गस्थस्तवसभायां नास्तिकमतानुसारीणं मोहरतिमंत्रिणं जीवादिभावान् सतोपि निन्हनुवानमवलोक्याऽचागतवान् । इति



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# परिशिष्टम्-४

(नाटकान्तर्गतानि-गूढमन्त्राणि ।)

१. अजित देव चन्द्र शेष राज विदित नाथ यातं तात मान ।
सुभग नाग याग देविभाग हृदय याहि पाहि धेहि शं नः ॥
(अङ्क १, पृ.१२)

२. चन्द्रमानयागविदित नाथमान यात तात मानहृदय धेहि शं नः ।
चन्द्रमानयागविदितनाथमान यात तात मानहृदय धेहि शं नः ॥
(अङ्क २, पृ. ३०)

३. चन्द्रनाथमान याग ।
राजदोष याग तान यागनाथ पाहि याहि ।
अजितनाथ-राजविदितमाननागहृदय याहि ।
नाथमाननाग याहि ।
चन्द्रविदितयागहृदय ।
शेषयातनाथमान ।
(अङ्क २. पृ. ३१)

४. विद्यापते नरपते सततं वियुक्ता
देविप्रभा गतविभा, विगतप्रभाऽऽशा ।
कान्तारकान्तपरिरम्भणकान्दिशीका
तारस्वरं प्रलपिता गतचेतनाशा ॥ (अङ्क २. पृ. ३४)

५. अजित, तातमान विदितशेषराज
हृदयदेविभाग सुभग धेहि शं नः ।
अजिततातमान विदितशेषराज
हृदयदेविभागसुभग धेहि शं नः ॥
(अङ्क २, पृ. ३७)

६. देव याहि तातमान देव या हि तातमान
(अङ्क ३, पृ. ६१)

७. शेष मान शेष यात, यात शेष यात देवि ।
देवि यात देवि मान, मान देवि नानशेष ॥
(अङ्क ३, पृ. ६२)



Jain Education International For Private & Personal Use Only www.jainelibrary.org

८. देवि देवि नाथ याग याहि पाहि धेहि देवि ।
यात शेष देवि चंद्र चन्द्र देवि देव शेष
नाथ याग याग देवि याहि पाहि धेहि ॥ (अङ्क ४, पृ. ७६)

९. अजितनाथ देव विदितचन्द्रयात तात शेष राजमान ।
सुभगयागतातहृदययाहि देवि नाम धेहि पाहि शं नः ॥
(अङ्क ४, पृ. ७७)

१०. शेषतात मानतात देवितात यातमान शेष मान
तातमान मानतात देवि, मान तातयात मान तात ।
शेषदेवि तात मानदेवि तातदेवि देवितात ।
यातदेवि तात शेष यात तात ।
मान यात तात देवि यात तात यात तात शेष तात मानशेष
तातदेवि शेष तात यातशेष तात ।
(अङ्क ५, पृ. ९४)

११. अजितदेवचन्द्र शेषराज विदितनाथ यात तात मान ।
सुभगनाग याग देविभाग हृदय याहि पाहि धेहि शं नः ॥
(अङ्क ५, पृ. ९८)

१२. यागयाग देविदेवि तात तात देव देव ।
शेष शे[ष] राज राज चन्द्र चन्द्र मान मान ॥ (अङ्क ५, पृ. ९९)

## परिशिष्टम्-५

(नाटकान्तर्गतवृत्तानां तालिका)

| छंद | अङ्क | श्लोक |
|---|---|---|
| अनुष्टुप् | १ | ८, ७, ४०, ४१, ४३, ५३, ५४, ५७, ५८ |
| | २ | २०, ३६ |
| | ३ | २०, २१, २७, ३२, ४५, ४९, ५०, |
| | ४ | १, ६, ७, ३१, ३३, ३५, ३७, ३९, |
| | ५ | ७, ८, ११, १६, २२, २५, २७, ३४, ३५, ३८, ४४, ४८ |
| अपरान्तिका | २ | २१ |



Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | | |
|---|---|---|
| अशोकमञ्जरी | ५ | पृ. ९८ |
| आर्या | १ | १, ९, १९, २९, ३०, ३८, ५२ |
| | २ | २, ४, ७, ८, ९, १२, १५, १९, २४, २५, ३०, ३९, ४०, ४२ |
| | ३ | ३, ८, ११, १३, १५, १६, १८, २५, २६, २८, २९, ३४, ३५, ४३, ४८, ५१, ५५ |
| | ४ | २, ३, १२ |
| | ५ | २, ३, ४, ५, ९, १७, ३९ |
| उपजाति | १ | १०, २०, ३१ |
| | ३ | १, ४७ |
| | ४ | १८, २२, २५, ३०, ३२, ३८ |
| | ५ | १०, २१, २३, २६, ४२ |
| गाथा | १ | ४४ |
| | ५ | १ |
| गीति | २ | १६, |
| | ३ | ३३ |
| | ४ | १० |
| पृथ्वी | २ | २२ |
| | ३ | १४, २३ |
| | ४ | १४ |
| मन्दाक्रान्ता | १ | ३७ |
| | ३ | ६, ४४ |
| | ४ | १६, २३, २७ |
| | ५ | ३०, ३१ |
| मालिनी | १ | १७, २१, ३६, ४५, ५०, ५१ |
| | २ | ३१, ३२ |



Jain Education International    For Private & Personal Use Only    www.jainelibrary.org

| | | |
|---|---|---|
| | ३ | ७, ९ १०, १२, १९, ३८, ३९, ५४ |
| | ५ | ३२, ४९, ५१ |
| वसन्ततिलका | १ | १५, १६, २२, २३, २५, २६, २७, ३२, ५५, ५६ |
| | २ | १, १०, १८, २३, २७, २८, ३५, ३७, ४२, |
| | ३ | २, २४, ३०, ३६, ३७, ४०, ४२, ४६, ५७, |
| | ४ | ४, ५, १७, २०, २४, २६, २८, २९, ४२ |
| | ५ | ६, १४, १५, २८, ४०, ४१, ४५ |
| शार्दूलविक्रीडितम् | १ | ३, ५, ८, ११, १२, १३, ३८, ३९, ४२ ४६, ४८, ४९ |
| | २ | ३, ५, ६, ११, १८, २६, ३४, ३८ |
| | ३ | ४, ५, ३१, ४१, ५२ |
| | ४ | ८, १३, १५, १९, ३४, ४०, ४१, ४३ |
| | ५ | १८, १९, २०, २४, ३६, ३७, ४६, ५० |
| शालिनी | १ | १८ |
| | २ | ३३ |
| | ५ | १३ |
| शिखरिणी | १ | २४, ३३, ३५, ४७, ५८ |
| | ३ | २२ |
| स्रग्धरा | १ | ६, ६० |
| | २ | ४३ |
| | ३ | ५३ |
| | ५ | २९ |
| हरिणि | १ | २ |



Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org



Jain Education International For Private & Personal Use Only www.jainelibrary.org



Jain Education International For Private & Personal Use Only www.jainelibrary.org



Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org